॥ मलयमारुतः ॥

संस्कृतसाहित्ये विद्यमानानाममुद्रितानां
काव्य-रूपक-स्तोत्र-शतक-सुभाषितादीनां लघुग्रन्थानां
संग्रहः ।

चतुर्थः स्पन्दः

राष्ट्रीयसंस्कृतसंस्थानीय-प्रकाशनसमित्यध्यक्षैः
आचार्यैः डा० वे. राघवार्यैः
सम्पादितः



केन्द्रीयशिक्षामन्त्रालयाङ्ग-राष्ट्रीयसंस्कृतसंस्थानेन
प्रकाशितः

नवदेहली १९७८

MALAYAMARUTA

A collection of minor works in Sanskrit poems, plays, hymns, anthologies etc.

Part Four


Edited by

Dr. V. RAGHAVAN

Chairman, Publication Committee, Rashtriya Samskrita Samsthan, Ministry of Education and Social Welfare, New Delhi







Published by
THE RASHTRIYA SAMSKRITA SAMSTHAN,
NEW DELHI
1978

Price : Rupees Five
मूल्यं - पञ्च रूप्यकाणि

भारती विजयम् प्रेस्, मद्रास्-600005

॥ मलयमारुतः ॥

संस्कृतसाहित्ये विद्यमानानाममुद्रितानां
काव्य-रूपक-स्तोत्र-शतक-सुभाषितादीनां लघुग्रन्थानां
संग्रहः ।

चतुर्थः स्पन्दः

राष्ट्रीयसंस्कृतसंस्थानीय प्रकाशनसमित्यध्यक्षैः
आचार्यैः डा० वे. राघवार्यैः
सम्पादितः



केन्द्रीयशिक्षामन्त्रालयाङ्ग-राष्ट्रीयसंस्कृतसंस्थानेन
प्रकाशितः

नवदेहली १९७८

आमुखम्

तुरीयोऽयं स्पन्दो मलयमारुतनाम्न्याः संस्कृतसञ्चिकायाः, यत्र अमुद्रिता लघ्व्यः कृतयः हस्तलिखितकोशेभ्य उद्धृत्य प्रकाश्यन्ते ।

मुद्रणालये कर्मकराणां कार्यस्थगनव्यापारैर्विसंष्ठुलिते मुद्रणे, अनिवार्यो विलम्बोऽजनि प्रकाशने ।

पूर्वासु सञ्चिकासु या परिपाटी समाश्रिता सैवास्यामपि । नव लघुकृतयोऽत्र सप्तहस्तलिखितकोशसङ्ग्रहेभ्यः प्राप्य प्रकाशिताः, स्तोत्रत्रयम्, द्वौ सुभाषित-ग्रन्थौ, त्रीणि खण्डकाव्यानि, एकं प्रहसनं चेति । एषु ग्रन्थद्वयं नैकमातृका-संवादपूर्वकं पाठभेदान् प्रदर्श्य सम्पादितम् । दुर्घटपदपदार्थविषये टिप्पण्यो दत्ताः । नीतिशतकस्य प्रतिश्लोकं श्लिष्टस्य टीका च विरच्य योजिता ।

प्रतिग्रन्थमुपक्रमे अवष्टिप्पण्यां मातृका-ग्रन्थ-ग्रन्थकार-विषयाः निर्दिष्टाः ।

मातृकाः साक्षाद्वा प्रतिलिपिरूपेण वा दत्त्वा उपकृतवद्भ्यः कोशालयाधिकृतेभ्यः, अन्येभ्यः सुहृद्भ्यः, सहयोगिभ्यश्च धन्यवादा वितीर्यन्ते ।

महाशिवरात्रिः
मद्रास्
७-३-१९७८

वे. राघवः

PREFACE

The fourth volume of the *Malayamāruta* has been unfortunately delayed; although most of it had been printed off in 1975–76, owing to labour trouble and the break-down of the work of the Press which has been printing it, it was possible to resume its printing only in December 1977 and complete it in April 1978.

The present volume carries nine works, three *Stotras*, three minor poems, two *Subhāṣita*-works and one farce. The opening *Stotra* on Sarasvatī was a rare discovery that I made in Jaipur in a private collection and it is a composition of the well-known Anubhūtisvarūpācārya, author of *Sārasvatavyākaraṇa* and a number of commentaries on standard Advaita works, as I have shown in a paper on him in the *ABORI.*,Poona, Silver Jubilee Volume, 1949' pp. 352-68. This *Stotra* in 15 verses is followed by another in 10 verses on the Goddess Jñānaprasūnāmbikā at the famous shrine at Kālahasti, by a scholar and poet named Narakaṇṭhīrava Śāstrī attached to the court of the Rajah of the nearby Karvetinagar in the last century. Information on his other works is to be had in the footnote on p. 5. The third work is also a *Stotra*, on Lakṣmīnārāyaṇa, and is one of the numerous productions of the court of King Anup Singh of Bikaner. The last issue also carried a *Stotra*, a short one, ascribed to that King and patron. The speciality of the long Stotra in 133 verses in the present volume is that it illustrates a large number of metres, mentioning their names. The short *Kuraṅgī-pañcaka* that follows is on the pathetic plight of a doe in the midst of a forest-fire, with a hunter and his dog in front, and the unexpected saving of it by providence.

The *Nītiśataka* is a century of gnomic verses in Anuṣṭubhs, every one of which is in *double entendre* and I have, for this reason, added my own gloss to these verses. The author of this work, Śrīnivāsa, the family of writers to which he belonged and the court where they were patronised have all been dealt with a great length by me in a paper in the *Andhra Historical Research Society Journal*, XIII. 1940.

The next is a century of verses describing the Moon *Mṛgāṅkaśataka*, each one of which embodies a fresh conceit. The author, *Kavi Kaṅkaṇa*, was earlier than the 17th century.

The seventh is a collection of didactic verses, *Subhāṣitas*, called *Upadeśaprakaraṇa*, dealing with several virtues; the author appears to be a Jain and some of the verses here are found in other collections.

The *Jaganmohanam* is an interesting description of women of different parts of the country, different faiths, avocations and activities and in different situations. The anonymous author was evidently a South Indian. The work is perhaps incomplete.

The last work in this volume is a *Prahasana* (farce), noteworthy for several original motifs introduced by the poet. Of the author, who was in the court of Singabhūpāla of Āndhra and this play, *Kuhanābhaikṣava*, I have given a full account and appreciation in the *Samskrita Ranga Annual*, V, 1967, pp. 55–62.

Except the second *Stotra* which is said to have been printed somewhere, and the *Jaganmohana* which has figured in an article on it, all the other works are published here for the first time. The manuscripts of these come from seven Manuscript Libraries and collections, two of which are private. In the case of some of these works, two or three mss. have been used and their critically edited texts are presented with the variants duly noted. Wherever necessary, difficult words and passages have been explained in the foot-notes and as already mentioned, one *Śliṣṭa kāvya* has been provided with a regular commentary.

Thanks are due to the Mss. Libraries and individuals who supplied transcripts of the mss. or lent the originals themselves. References to them have been given in the foot-notes at the beginning of each of the texts.

Madras
Mahasivaratri
7—3—78

V. RAGHAVAN

CONTENTS



अनुक्रमणिका

शुद्धिपत्रिका

पृष्ठम्	पङ्क्तिः	शुद्धिः
३	१९	६. संग्रहा
४	२३	एषः
४	२४	°निर्णायकः
५	२१	अभिनववासवदत्ता
६	६	निबध्यायमान°
७	१९-२०	मातृकात उद्धृत्य
१३	५	°ङ्घ्रि
१४	२४	°स्तत्रां
१६	११	°भेदाः
२१	४	द्वा°
२२	१६	कुसुम°
२३	६	विधृतमुकुट
	२५	४
३०	१८	यादव°
३७	१	पद्मे
५०		पृष्ठसंख्या ४२
५१		,, ४३
,, (४३)	१२	भृगु°
५२		पृष्ठसंख्या ४४
,, (४४)	१८	गीरुपपन्ना
५३		पृष्ठसंख्या ४५
,, (४५)	१७	सामुद्रिक°
५४		पृष्ठसंख्या ४६
,, (४६)	२४	°समुद्भवम्
५५		पृष्ठसंख्या ४७
५६		,, ४८
५७ (४९)	१७	द्रावणार्थम् ४९
५८		पृष्ठसंख्या ५०
,, (५०)	२०	धर्मस्य
	२३	शूराणाम्
५९		पृष्ठसंख्या ५१
,, (५१)	७	°(ज्ञ)दनामिकाः
,,	२३	प्रसृताङ्गुष्ठ°

पृष्ठम्	पङ्क्तिः	शुद्धिः
,, ५९		गतिः
,,		परभृतः
६०	,,	पृष्ठसंख्या ५२
६१	,,	५३
,,	२२	कार्यैः
६२		पृष्ठसंख्या ५४
६३	,,	५५
,, (५५)	२०	चन्द्रः २
६४		पृष्ठसंख्या ५६
,,	१२	अन्यत्र
,,	२१	चन्द्रः
५७	२७	स्वराजत्वस्य
५९	११	भूभृतः
६०	१४	उपकण्ठं
६१	११	प्राणिभिः
,,	२२	शङ्खचक्र°
६२	२०	सुराणां
,,	२१	द्युलोक°
६३	१८, १९	तच्छ्लिषः
६४	२०	शतकात्
७५	२३	नापि
७७	२१	वदनं
७८	५	म. कोशपाठोऽत्र दत्तः; T. कोशपाठः—शामलिता पूपग्रष्टिरियम्; सम्यक् पाठस्तु 'श्यामलता पोतयष्टिरियम्' इति स्यात्।
८५	७	(त्या)गः
१०२	२०	रम्याभोग°
१०३	१८	कवेर्नाम
१०४	५	°वक्त्रा
१०५	५	प्रोद्यद्भौ°
१०५	७	घर्मां°
१०७	२	घन°

	१८	°भक्षिनी
१०८	२	°वन्ध°
	११	लतया……
	२३	४९
१०९	२२	°भङ्गः, अक्षरभ्रंशश्च°
११२	१	°भैक्षवं
	१०	°सञ्चिकायामाङ्गल
	२०	(राचकोण्ड)
	२१	B=R. ५२२४
११३	१२	°नगर°
१२३	१	शं°
१२५	२	भ्र°
१३३	११	गन्धोल्लिका°
१३४	९	करिष्यावः
१४२	२२	पर्यन्ता
१४४	४	माल्यम्
१४९	२,१६	गीत्वा
१५३	२	ऽहिन
१५४	३	वा
१५५	६	स्थितया
	१४	दुर्विनीते
१५६	५	भवत्याः
	७	भवतीं
१६२	१२	कुहना°
	१३	भैक्षवं

|| श्रीः ||

|| सरस्वतीस्तोत्रम् ||*

|| अनुभूतिस्वरूपाचार्यकृतम् ||†

कलमरालविहङ्गमवाहना
सितदुकूलविभूषणभूषिता ।
प्रणतभूमिरुहामृतसारिणी
प्रवरदेहविभा[1] भरहारिणी ॥

अमृतपूर्णकमण्डलधारिणी
त्रिदशदानवमानवसेविता ।
भगवती परमैव सरस्वती
मम पुनातु सदा नयनाम्बुजे[2] ॥ २ ॥

---

*जयपुरे केनचिन्मातृकासंग्रहकृता मित्रेण दत्तां मातृकामेकामशुद्धां संशोध्य अत्र मुद्रितमिदम् ।

†अनुभूतिस्वरूपाचार्यः प्रसिद्ध-सारस्वतव्याकरणकर्ता, तथा अद्वैते प्रकटार्थविवरणादिबहुव्याख्या-ग्रन्थकर्ता च । तं तत्कृतीश्चाधिकृत्य मया भाण्डारकर-प्राच्यविद्यासंशोधन-संस्थापत्रिकाया रजतोत्सवसञ्चिकायां (ABORI. Silver Jubilee Vol., 1949, pp. 352-68), संस्कृतादिमातृकाबृहत्सूच्यां प्रथमभागे (New Catalogus Catalogorum, Vol. I. Revised edn. pp. 208b, 209a) च विस्तरतो विचार्य लिखितम् । अत्र मुद्र्यमाणस्याचार्यस्य सरस्वतीस्तोत्रमितः पूर्वमज्ञातमिदंप्रथमतया यदृच्छया मया जयपुरं गतेनासादितम् ॥

१, मातृकायां 'भां' ; विभा कान्तिः । भरः दुःखादीनाम् ।

२. द्विवचनम् ; दर्शनदानेनेति शेषः ।

जनयति प्रथिताखिलवाङ्मयं[१]
गणधराननमण्डपनर्तकी ।
गुरुमुखाम्बुजखेलनहंसिका
विजयते जगति श्रुतिदेवता ॥ ३ ॥

अमृतदीधितिबिम्बसमाननां[२]
त्रिजगतीजननिर्मितमाननाम् ।
नवरसामृतवीचि[३]सरस्वतीं[४]
प्रमुदितः प्रणमामि सरस्वतीम् ॥ ४ ॥

विकचकेतकपत्रविलोचने
विहितसंस्कृतदुष्कृतमोचने[५] ।
धवलपक्षविहङ्गमलाञ्छने[६]
जय सरस्वति पूरितवाञ्छने ॥ ५ ॥

भवदनुग्रहलेशतरङ्गिताः
[७]तदुचितं प्रवदन्ति विपश्चितः ।
नृपसभासु यतः कमलाबला-
कुचकलाकलितानि[८] वितन्वते ॥ ६ ॥

---

१. मातृकायां °मयी

२. सर्वत्र प्रथमान्त एव मातृकायाम् ।

३. °वीच°

४. अयं 'सरस्वती'-शब्दो नदीवाची ।

५. 'दुष्कृत'-शब्दः संस्कृतव्यतिरेकितया प्राकृतवाची स्यात् ; संस्कृत-प्राकृत-उभयभाषासृष्टिकरि इत्यर्थः स्यात् ; अथवा विहितं संस्कृतानां संस्कृतात्मनां दुष्कृतान्मोचनं ययेति योज्यम् ।

६. वाहनभूतहंस-लाञ्छने । °वाञ्छने °वाञ्छिते ।

७. तत् प्रवदन्ति यत इति संबन्धः ।

८. कमला श्रीः, तां वशीकुर्वन्तीत्यर्थः ।

गतधना [1]अपि हि त्वदनुग्रहात्
कलितकोमलवाक्यसुधोर्मयः ।
चकितबालकुरङ्गविलोचना[2]-
जनमनांसि[3] हरन्तितरां नराः ॥ ७ ॥

करसरोरुहखेलनचञ्चला
तव विभाति वरा जपमालिका ।
श्रुतपयोनिधिमध्यविकस्वरो[4]-
ज्ज्वल[5]तरङ्गकलाग्रहसंग्रहा[6] ॥ ८ ॥

द्विरद-केसरि-मारि-भुजङ्गम-
ज्वलन-तस्कर-राज[7]-रुजां भयम् ।
तव गुणावलिगानतरङ्गिणां
न भविनां[8] भवति श्रुतिदेवते ॥ ९ ॥

*ओं ह्रां[9] क्लीं क्रूं[10] ततः श्रीं तदनु हसकलां ह्रीमथो ऐं नमोऽन्ते
लक्षं सख्यं जपन् (यो ?)[11] नमकरविधिना[12] सत्तपा[13] ब्रह्मचारी ।

---

१. अत्र मातृका अस्फुटा
२. 'वा' इत्येव मातृकायाम्
३. युवतिजनमनांसीत्यर्थः ।
४. °स्वरा
५. °ज्वलि°
६. सग्रहा। श्रुतपयोनिधेर्विद्यावारिधेर्मध्ये उदिताः उज्ज्वलाः तरङ्गरूपाः याः कलाः चतुष्षष्टिसंख्याकाः, ता गृहीत्वा संगृहीता संग्रथितैषा अक्षमाला भातीत्यर्थः। अक्षमालाया एकैका गुटिका एकैककलारूपेति भावः। अन्यत्र जलतरङ्गपक्षे कला भागाः, जलकणा इत्यर्थः।
७. °राज्य°
८. संसारिणां नराणाम्
* मन्त्रप्रदः श्लोकोऽयमपपाठपूर्णः ।
९. मातृकायाम् 'हूं'
१०. मातृकायाम् अस्फुटम्
११. अक्षरमेकमत्र लुप्तम्
१२. अर्थोऽस्फुटः
१३. सतपाः

निर्षान्तं (निष्क्रान्तं ?) चन्द्रबिम्बात्कलयति मनसा त्वाम्बुजे[1] चन्द्रकाभां
[2]सत्यर्थं [3]ब्रह्मकुण्डे विहितघृठहति(घृतहुतिः?) [4]स्यादृशां सिम(?)[5]
विद्वान् ॥ १० ॥

रे रे लक्षण-काव्य-नाटक-कथा-चम्पूसमालोकने
कायासं वितनोषि बालिश मुधा किं नम्र[6]वक्त्राम्बुजः ।
भक्त्याराधय मन्त्रराजमहसानेनानिशं[7] भारतीं[8]
तेन त्वं कवितावितान[9]सविताऽद्वैतप्रबुद्धायसे ॥ ११ ॥

चञ्चच्चन्द्रमुखी प्रसिद्धमहिमा स्वच्छन्दराज्यप्रदाऽ-
नायासेन सुरासुरैर्नरगणै[10]रभ्यर्चिता भारती[11] ।
देवी संस्कृतवैभवामलगुणा स्वच्छाङ्गरागद्युतिः
सा मां पातु सरस्वती[12] भगवती त्रैलोक्यसञ्जीवनी ॥ १२ ॥

स्तवनमेतदनेकगुणान्वितं
पठति यो [13]भविकं ⏑ ⏑ - ⏑ -[14] ।
स सहसा मधुरैर्वचनामृतै-
र्नृपगणानपि रञ्जयति स्फुटम् ॥ १३ ॥

इति श्री-अनुभूतिस्वरूपाचार्यकृतं सरस्वतीस्तोत्रं सम्पूर्णम् ॥[15]

---

१. मनसा त्वा त्वाऽम्बुजे इति च्छेदः ; अम्बुजासीनां कलयति इत्यर्थः । २. अर्थोऽस्फुटः ; 'अत्यर्थम्' इति पाठः स्यात् । ३. चह्म° ४, ५. एवमेत्र अवद्धं मातृकायाम् ६. नभ°; नम्रं लज्जया वक्त्राम्बुजं यस्य सः । ७. अभिसम् ८. भारती ९. कविता न°; कवितावितानस्य सविता स्रष्टा, तथा अद्वैतज्ञाने प्रवुद्धश्च ; अथवा अद्वितीयो ज्ञानी भविष्यसि । १०. °गुणै ११. भारति १२. °ति १३. भविकं शुभम् । १४. मातृकायां 'प्रयाग्नं(ग्रं) ज्ञः' इति एकाक्षरन्यूनमवद्धं च । १५. इतः परं लेखकालः 'संवत् १११०' इति लिखितः । इयं मद्धस्ते वर्तमाना मातृका अर्वाचीनकागितलिखिता ; अतश्च मूलमातृकायाः काल एष ; स च सत्यश्चेदनर्घोऽयं विषयोऽनुभूतिस्वरूपाचार्यस्य जीवितकालनिर्णायकः ; मूलमातृकया च कर्तुः समकालिकया भाव्यम् ॥

॥ नवरत्नमालिका ॥

(श्रीकालहस्तिक्षेत्रस्थज्ञानप्रसूनाम्बिकास्तुतिः)

॥ श्रीनरकण्ठीरवशास्त्रिविरचिता ॥*

श्रीनाकनाथमुखनानासहस्रसुरसेनाग्रमौलिवलभी-
सूनावलीबहुललीनालिनीमधुरगानाञ्चिताङ्घ्रिनलिना ।
मानातिलङ्घिमहिमानादिरानतजनानामनेकफलदा
ज्ञानाम्बिका भवतु दीनावनी कुशलदानाय मे भगवती ॥ १ ॥

राकाशशाङ्करुचिराकारचारुपादना(पतदा)काशसिन्धुलहरी-
नीकाशसूक्तिसरणीकारिणी प्रकृतिमूकात्मनामपि नृणाम् ।
पाकाहितप्रमुखनाकालयप्रकरशोकापनोदनचणा
श्रीकालहस्तिनगरैकायनावतु पिनाकायुधस्य दयिता ॥ २ ॥

श्रेणीभवद्द्विषदेणीदृगुल्लसितवेणीपिनद्धसुमनो-
द्रोणीमरन्दरसवेणीप्रसारभृशशोणीकृताङ्घ्रिकमला ।
श्रोणीनटत्स्मरकृपाणीमनोज्ञघनवेणी कृपार्द्रहृदया
क्षोणीधरेन्द्रतनयाणीयसीमपि च वाणीं प्रगल्भयतु मे ॥ ३ ॥

केलीसमाकलिततालीदलश्रवणपालीविभूषणमणी-
वा(पा)ली मदोद्धतमरालीगतिर्दिशतु नालीकदीर्घनयना ।

---

* कविरयम् आन्ध्रो वट्टिपल्लिवंशीयः १९-शतकान्ते मद्रास्-नगराच्चातिदवीयसि कार्वेटिनगरनाम्नि स्थले तदधीशस्य बोम्मराजस्यास्थानकविरासीत् । अस्य पौत्रा अद्यापि जीवन्ति । अस्य कृतयः—

१. अभिनवासवदत्ता (सुबन्धुकृत-वासवदत्तागद्यकाव्यस्य पद्यैः संग्रहः),
२. यतिसार्वभौमोपहारः (श्रीशङ्कराचार्यपारम्पर्यवर्णनम्),
३. कपिलेश्वरस्तुतिः (तिरुप्पतिक्षेत्रस्थशिवस्तुतिः); गैर्वाण्यां (४-११, १५-११-६६) मुद्रिता ।
४. ज्ञानप्रसूनाम्बिका नवरत्नमालिका (अत्र मुद्यमाणा).

एता अद्य उपलभ्यन्ते । केचन शास्त्रग्रन्थाश्चानेन रचिताः । नवरत्नमालिकाया मातृका अडयार्-कोशागारेऽप्युपलभ्यते । इयं क्वचिदन्यत्र मुद्रितेति श्रूयते, किन्तु अप्रसिद्धा दुर्लभा च ।

चूलीतलाभरणनालीकवैरिशकलालीभवत्सुरवधूः
काली गिरं मृदु मृणालीभुजा मम मधूलीरसोर्मिमधुराम् ॥ ४ ॥
हृद्यानवद्यतरगद्यानुबद्धमृदुपद्याभिरूपकवितां
दद्याज्जगन्महितविद्यां त्रयीशिखरवेद्या हिमाद्रितनया ।
आद्या परा मम शरद्यामिनीशभृदविद्याविलासशमनी
विद्याधरी समभिवाद्या ज्वलन्मणिनिषद्यायमाणरशना ॥ ५ ॥
हालामदाकलितहेलालसद्बहुललोलारुणाक्षियुगली
लीलापिनद्धसुरसालावलीप्रसवमालासुगन्धचिकुरा ।
कैलासनाथहितशीला कराञ्चितशुकालापलोलहृदया
वेलातिलङ्घिशुभजालाय मे भवतु शैलाधिनाथतनया ॥ ६ ॥
चण्डापदानयुतचण्डाभिधासुरपिचण्डावदारणचणा
भण्डासुरोग्रभुजदण्डाग्रनिर्दलनशौण्डायुधोद्धतकरा ।
शुण्डानुकारिकरकाण्डावदीर्णजगदण्डाट्टहासभयदा
दण्डायुधाय शशिखण्डावतंसितशिखण्डा न चार्पयतु माम् ॥ ७ ॥
हुङ्कारनिर्गलदशङ्कापतद्द्विषदहङ्कारभारतिमिरां
अङ्कान्तलग्नसितकङ्कालहारसदलङ्कारबन्धुरगलाम् ।
ह्रींकारिणीं भयदटङ्कारकार्मुककरां कालहस्तिनिलयां
पङ्कापहामपकलङ्कावतंसहरिणाङ्कां भजे भगवतीम् ॥ ८ ॥
कण्ठारवोद्यदुपकण्ठारिदुर्विषहकण्ठीरवेन्द्रगमनो-
त्कण्ठा निकामशितिकण्ठानुकर्षिकलकण्ठानुलापललिता ।
शुण्ठीभवद्दनुजकण्ठीरवप्रकरकुण्ठीकृतिक्षमबला
कुण्ठीकरोतु नरकण्ठीरवाख्यकविकण्ठीरवस्य दुरितम् ॥ ९ ॥
श्रीकालहस्तिनिलयज्ञानप्रसवांबिकामुदे रचिता ।
नरकण्ठीरवकृतिना नवरत्नस्तुतिरियं चिरं जयतु ॥ १० ॥

॥ नवरत्नमालिका समाप्ता ॥

॥ लक्ष्मीनारायणस्तोत्रम् ॥*

॥ महाराजश्रीमदनूपसिंहविरचितम् ॥

लक्ष्मीनारायणप्रीत्यै नानाच्छन्दःसमन्वितम्।
कुरुतेऽनूपनृपतिर्लक्ष्मीनारायणस्तुतिम् ॥ १ ॥

श्रीः स्यान् मे शम् ॥ २ ॥

एकाक्षरः [1]श्रीश्छन्दः।

वन्दे विष्णुं
स्तुत्यं नम्यम् ॥ ३ ॥

द्व्यक्षरं कामश्छन्दः ।

मनोज्ञा सकान्तिः
प्रपायात्तमा(द् रमा) माम् ॥ ४ ॥

त्र्यक्षरं शशी छन्दः ।

नमामि ते रमापते
पदाम्बुजं मनोहरम् ॥ ५ ॥

चतुरक्षरं नगाणिका[2]च्छन्दः।

सत्प(द्म)हस्तां वन्दे प्रशस्तां
श्रीविष्णुकान्तां दे(वे)ष्टकान्ताम्।

पञ्चाक्षरं हारीच्छन्दः ॥ ६ ॥

---

* नानाच्छन्दःस्वरूपनिदर्शकमिदं स्तोत्रं बीकानीरस्थ-अनूपग्रन्थागार-मातृकादुद्धृत्य मुद्रितम्। पर्यायेण लक्ष्मीं नारायणं च स्तौति। प्रतिलिपिः श्री कुञ्जन् राज-संग्रहादुपलब्धा। छन्दसां नामानि प्रायः प्राकृतपैङ्गलानुसारीणि ॥

१. अस्य 'स्त्री' इति नामान्तरम्।

२. न गणिका इति मातृकायाम्।

केशयादीनां हन्ता
गोपालीभी रन्ता ।
रक्षेद्विद्यामन्ता
वृन्दारण्ये गन्ता ॥ ७ ॥

षडक्षरं [1]शेषाच्छन्दः ।
मुक्तानां हारालीभि-
र्दीव्यन्तीं सिन्धोः कन्याम् ।
दारिद्र्यघ्नीं भक्तानां
वन्दे लक्ष्मीं तां धन्याम् ॥ ८ ॥

सप्ताक्षरं शीर्षाच्छन्दः ।
समस्तदेववन्दितं
मुनीन्द्रवृन्दनन्दितम् ।
स्वभक्तिसिद्धिदायकं
भजे त्रिलोकनायकम् ॥ ९ ॥

अष्टाक्षरं प्रमाणिकाच्छन्दः ।
या सुवर्णसवर्णाङ्गी
सर्वगीर्वाणवर्णिता ।
कान्ता सुपर्णयानस्य
वन्दे तामर्णवात्मजाम् ॥ १० ॥

अनुष्टुप्-छन्दः
[2]दैत्यखण्डनोद्धताय
शङ्खचक्रशोभिताय ।

---

१. विद्युल्लेखेति विदिततरमस्य नाम ।
२. 'नि' मातृकायाम्

गोपिकाविलोभिताय [1]ते नमोऽस्तु गोहिताय ॥ ११ ॥

मल्लिकाच्छन्दः[2] ।

इभयुगलाभिषिक्ता[3] धनवलितविरक्ता[4] ।
कनकसदृशगात्री जयति भुवनधात्री ॥ १२ ॥

तुङ्गाच्छन्दः[5] ।

कृतदितिजक्रन्दनः[6] सुरविहितवन्दनः ।
व्रजयुवतिचन्दनः शुभति[7] यदुनन्दनः ॥ १३ ॥

कमल-वृत्तम्[8] ।

पद्मविशोभितहस्ता सर्वसुरव्रजशस्ता[9] ।
स्वर्णमनोहरभाङ्गी[10] पातु मुरारिकृशाङ्गी ॥ १४ ॥

चित्रपदा-वृत्तम्[11] ।

चारुगतिं कान्तियुतं कुञ्जगृहं देवनुतम् ।
नन्दसुतं सौख्ययुतं विश्वपतिं नौमि सदा ॥ १५ ॥

माणवकक्रीडं छन्दः ।

---

१. मे इति मातृकायाम् ।

२. अस्य 'समानिका' इति विदिततरं नामान्तरम् ।

३. अत्र 'ला' इति पञ्चमाक्षरेण लघुना भाव्यम्; 'इभयुगजलसिक्ता' इति पाठः स्यात् । ४. धनेन वलितेषु धनिकेषु विशेषेण रक्ता इत्यर्थः स्यात् ।

५. प्रा. पै. २.७३.

६. कदि क्रदि क्लदि वैक्लव्ये इति भ्वादेः क्रन्दननिष्पत्तिः ।

७. शुभ शोभार्थे इति तुदादेः धातोः ।

८. प्रा. पै. ७५; भरते ध्रुवाध्याये (३२.१३३) 'मही' इत्यस्य नाम ।

९. शास्ता इति मातृकायाम् ।

१०. स्वर्णवन्मनोहरा भा येषां तादृशानि अङ्गानि यस्यास्सा ।

११. पिङ्गलच्छन्दसि वितानभेदः ।

मनोज्ञरूपशालिनी चलद्भुजामृणालिनी ।
विचित्ररत्नमालिनी श्रियेऽस्तु विश्वपालिनी ॥ १६ ॥

नगस्वरूपिणीच्छन्दः[१] ।

सर्वे देवा भक्ता नित्यं फुल्लैः पद्मैः कुर्वन्त्यर्चाम् ।
तुष्यंस्तर्षं[२] तेभ्यो दश्मे(दत्से) लक्ष्मीकान्त त्वं तच्छ्रेष्ठः ॥ १७ ॥

विद्युन्मालाच्छन्दः

प्रतिष्ठाक्षरारम्भः ॥

[३]मौक्तिकहारस्रग्हृदये[४] भासि सदा विष्णोर्वनिते[५] ।
पश्यति यां[६] विष्णुः सततं कौस्तुभतोऽप्यत्यन्तमुदा ॥ १८ ॥

नवाक्षरं मणिबन्धच्छन्दः[७] ।

नीलाम्भोयुक्तायाः कालिन्द्याः कूले यो गोपीभिर्गोपालैः ।
क्रीडन्नित्यं मोदं बिभ्राणः पातु त्वां स श्रीमान् लक्ष्मीशः ॥ १९ ॥

रूपमालाच्छन्दः[८] ।

भूषणैर्भाति यानेककैः काञ्चनै रत्नसंराजितैः ।
वाससा योज्ज्वलेनावृता पातु सा मां प्रिया शार्ङ्गिणः ॥ २० ॥

महालक्ष्मिकाच्छन्दः[९] ।

एते नवाक्षरभेदाः ॥

---

१. 'प्रमाणिका' इत्यस्य प्रसिद्धं नाम ; किन्तु प्रमाणिका-श्लोकः पूर्वमेव दत्तः(९)।

२. 'तुष्यस्तर्षं' इति मातृकायाम् ; तर्षं भक्तिरूपां तृष्णामित्यर्थः स्यात् ; अथवा हर्षमिति पाठः स्यात् ।

३. तादृग् विलसन्ती त्वम् । ४. हृदये वक्षसि । ५. वनिते हे पत्नि

६. 'तम्' इति मातृकायाम् ।

७. मणिमध्या इति छन्दःकौस्तुभे ।

८. एवं प्रा. पै. । ९. एवं प्रा. पै. ; क्वचिद् वीरलक्ष्मीरिति दत्तम् ।

यस्य तु देवाः सेवनसक्ताः सिद्धिममन्दां संददते यः ।
भक्तियुतेभ्यः स्वीयजनेभ्यः तं कमलेशं संप्रणतोऽहम् ॥ २१ ॥
दशाक्षरं [1]चम्पकमालाच्छन्दः ।
अम्भोजास्या मधुपनयना स्फूर्जद्बाहुः किसलयकरा ।
प्रेङ्खन्मध्या त्रिवलिललिता ध्येया लक्ष्मीर्विशदहृदयैः ॥ २२ ॥
दशाक्षरं हंसीच्छन्दः[2] ।
नवचारुचन्द्रकधारिणं यमुनानिकुञ्जविहारिणम् ।
कृतदुष्टदानवकन्दनं[3] स्मर संततं यदुनन्दनम् ॥ २३ ॥
दशाक्षरं संयुतं[4] छन्दः ।
फुल्लाम्भोजे रुचिचयरुचिरे[5] क्लृप्तावासां विविधविलासाम् ।
सिन्दूराभां सुविमलवस्त्रां विष्णोः पत्नीमहमभिवन्दे ॥ २४ ॥
दशाक्षरं मत्ताच्छन्दः ।
जलनिधिमध्यकृतावसतिः कनकनिभं वसनं बिभृते[6] ।
नवघनसुन्दरदेहधरः स जयति निर्जरमुख्यहरिः ॥ २५ ॥
सुमुखीच्छन्दः[7] ।
पार्वणचन्द्रविनिन्दकमास्यं मध्यमिदं तव केसरिजैत्रम् ।
बाहुलते च मृणालकजिष्णू रूपमिदं कमलेऽतिमनोज्ञम् ॥ २६ ॥
दोधक-वृत्तम् ।

---

१. एवं प्रा. पै.; अन्यत्र रूपवती, रुक्मवती, विशाला चेति ।

२. नवाक्षरवृत्तेः कामिन्या एकलध्वधिका, एकादशाक्षरवृत्तेः भ्रमरविलसितादेकलघुन्यूना इयं हंसी ; अस्या आकरो दुरन्वेषः ।

३. कदि कदि क्लदि वैक्लव्ये इति धातो. (भ्वा. ५०७) ।

४. संजु(यु)ता प्रा. पै. २-९१ , 'उपस्थिता' इत्यस्याः प्रसिद्धतरं नाम ।

५. 'रुचिरे' इत्यत्र गुरुद्वयेन भाव्यम् ; 'रम्ये' इति चेत्साधु स्यात् ।

६. डुभृञ् धारणपोषणयोः, जुहोत्यादिः ७ ।

७. प्रा. पै. २. १०३

यं योगिनो भक्तियुता भजन्ति ध्यायन्ति गायन्ति च यत्स्वरूपम् ।
यो वेणुधारी व्रजधेनुचारी दद्यान्मुरारिः परमां मुदं मे ॥ २७ ॥

इन्द्रवज्राच्छन्दः ।

वक्त्रं पद्मादुत्तमं ते चकास्ति दन्ताः स्वच्छा जित्वरा हीरकाणाम् ।
केशाः श्यामा जिष्णवः शैवलानां श्रीलक्ष्मि त्वं संप्रसीद द्रुतं मे ॥ २८ ॥

शालिनीच्छन्दः ।

नवीनपाथोदसमानवर्णः सुवर्णरम्याम्बरबद्धमध्यः ।
मयूरपिच्छावलिमञ्जुमौलिः स मे रमेशः कुशलं करोतु ॥ २९ ॥

उपेन्द्रवज्रा ।

लक्ष्मि त्वदीयः किल सेवको यस्तस्मै प्रयच्छस्यमितं धनं त्वम् ।
द्वारे तदीये करिणस्तुरङ्गा गर्जन्ति वल्गन्ति सुवर्णभूषाः ॥ ३० ॥

उपजातिच्छन्दः ।

वंशीरवस्ते मधुरो नितान्तं गोपालनारीर्विवशीकरोति ।
त्यजन्ति तातान्तिकमिष्टरूपाः क्रीडस्यजस्रं सममेव ताभिः ॥ ३१ ॥

आख्यायिका[1]च्छन्दः ।

वासवादिविबुधैरुपासिता नाशितानतजनाघसंहतिः ।
गीतकीर्तिरसि किन्नरीगणैर्व्याहरामि तव किं गुणान् रमे ॥ ३२ ॥

रथोद्धता ।

पूजितं प्रणमितं सुरसङ्घैः फुल्लचारुसरसीजसमानम् ।
भक्तमौलिमधुपावलिसेव्यं नौमि कृष्णचरणद्वितयं ते ॥ ३३ ॥

स्वागता ।

---

१ आख्यानिकीत्यपि ; इयमुपजातेरेवावान्तरविशेषः ।

एते एकादशाक्षरभेदाः ॥

कमले तव वैभवमुच्चतमं हृदये निहितासि यतो हरिणा ।
तदवैति स एव रमे न परे चतुराननशंभुमुखास्त्रिदिवाः ॥ ३४ ॥

त्रोटकं छन्दः ।

देवैर्वन्द्याङ्घ्रिं विश्वविख्यातवीर्यं श्रीपद्मानाथं शेषनागे शयानम् ।
श्यामाङ्गं वन्दे पीतवासो वसानं भक्तैर्ध्यानप्रैर्वारिजैः पूज्यमानम् ॥ ३५ ॥

वैश्वदेवीच्छन्दः ।

रुचिरकौस्तुभदीप्तिमतो हरेर्विशदमौक्तिकहारसमन्विते ।
त्रिजगतीसुखवासमहागृहे मधुरिपोर्हृदि लक्ष्मि तव स्थितिः ॥ ३६ ॥

द्रुतविलम्बितम् ।

समारुह्य यो वैनतेयं खगेन्द्रं भ्रमन् सर्वलोके जयत्युग्रशत्रून् ।
महातीक्ष्णशस्त्राणि दोर्भिर्दधानो भृशं भ्राजमानो हरिः पातु नित्यम् ॥ ३७ ॥

भुजङ्गप्रयातम् ।

श्रोत्रे मनोज्ञे धृतरत्नभूषणे पुष्पालिरम्याश्चिकुरास्तवोत्तमाः ।
पद्मालये ते मुखमिन्दुसुन्दरं हस्तौ त्वदीयौ सरसीरुहोपमौ ॥ ३८ ॥

इन्द्रवंशा ।

सहचरि पश्य पुष्पकृतहारं तपनसुतातटे कृतविहारम् ।
मधुरनिनादवेणुकृतगानं व्रजयुवतीमनोरथनिधानम् ॥ ३९ ॥

नवमालिनी[1] ।

अवाप राज्यं त्रिदिवस्य वासवः सदा सुराद्यैः प्रणतैर्निषेवितः ।
जगत्त्रयाधीश्वरविष्णुवल्लभे तव स्तुतेर्जाग्रदिदं महत्फलम् ॥ ४० ॥

वंशस्थम् ।

---

१. मालिनी इत्येव मातृकायाम् । प्रसिद्धा मालिनी पञ्चदशाक्षरा अधो दत्ता । इयं तु नवमालिनी नवमालतीति च विदिता वृत्तरत्नाकरादिषु दत्ता ।

एते द्वादशाक्षरभेदाः ॥

यस्यानतं तव पदपद्मयोः शिरः पाणी तथा बुधवरपूजने रतौ ।
जिह्वा तथा विधिमुखवन्दित स्तुतौ [1]धन्यः क्षितौ भवति स एव मानवः॥४१॥

प्रभावतीच्छन्दः[2] ।

वक्त्रं ते रुचिरहिमांशुबिम्बतुल्यं[3] नेत्रे ते नलिननिभप्रभे विशाले ।
बाहू ते मृदुललतामृणालजिष्णू रूपं ते सकलसुरीषु[4] कान्तिरम्यम् ॥४२॥

प्रहर्षिणीच्छन्दः ।

दृगन्तेन मन्दस्मितेनापि रागेण विलासेन वंशीनिनादेन लास्येन ।
मनो मे नितान्तं हृतं माधवेनालि विधेयं मया किं न शक्नोमि [खिन्नास्मि ॥४३॥

कन्द[5]वृत्तम् ।

या शक्राद्यैर्देवसमूहैरुपसेव्या तत्तत्सिद्धीः संददते[6] सेवनकृद्भ्यः[7] ।
क्षीराम्भोधेर्जन्म यदीयं बहुशस्ता[8] सा पातु त्वां केशवयोषित्प्रतिघस्रम्[9] ॥ [४४ ॥

माया[10]च्छन्दः ।

गरुडेन यासि जवनेन भास्वता निशितेन शत्रुमसिना निहंसि च ।
विविधैर्वचोभिरभिभूयसेऽसुरैः[11] कमलापते तव वदामि किं गुणान् ॥४५॥

मञ्जुभाषिणी ।

विस्फुटसरसिजदर्पणहारिणि वित्तभरितवरभाजनधारिणि ।
[12]देवधरणिरुहकाननचारिणि लक्ष्मि कृपय[13] मयि सज्जनतारिणि ॥४६॥

पङ्क्तावली[14]च्छन्दः ।

---

१. हे विधिमुखवन्दित तव स्तुतौ ; अथवा विधिमुखवन्दितस्य तव स्तुतौ इति समस्तम् । २. इयं लक्ष्मीरित्यपि । ३. मातृकायां तुल्यबिंबम् । ४. सुरीषु सुराङ्गनासु । ५. प्रा. पै. २. १४७ ६. दद दाने, भ्वादिः १७ ; मातृकायां संददाते । ७. मातृकायां °कृद्यः । ८. बहुस्तुना ९. प्रतिदिनम् १०. प्रा. पै. २.१४२ ११. मातृकायां °सुराः । असुरास्त्वा बहुधा निन्दन्ति इत्यर्थः । १२. देवधरणिरुहः कल्पवृक्षः । १३. कृपय कृपां कुरु । १४. प्रा. पै. २-१४८.

पाथोधरं तृणयति यः स्वकान्तिभिः शम्पारुचिं लघयति चारुवाससा ।
इन्द्रायुधं कृशयति चित्रमालया लक्ष्मीपतिं तमहमनारतं भजे[1] ॥ ४७ ॥
लक्ष्मी[2]च्छन्दः ।

एते त्रयोदशाक्षरभेदाः ॥

वासवमुखसुरनिकरविनमिते सुन्दरसुरतरुविरचितवसते ।
त्रस्तहरिणशिशुसुललितनयने पाहि विकचतरसरसिजनयने ॥ ४८ ॥
चक्रवृत्तम्[3] ।
योऽस्ति त्वदीयचरणार्चनसक्तचेतास्त्वच्चिन्तनप्रणमनस्तवनप्रवीणः ।
तस्य त्वमाशु जगदीश महाप्रसन्नः सर्वान् क्षणेन परिपूरयसीह [कामान् ॥४९॥
वसन्ततिलकाच्छन्दः ।
मुनिगणपनितां[4] बहुगुणसहितां फणिकुलमहितां[5] हिमकरवदनाम् ।
जलरुहनयनां .... मधुरिपुललनां प्रणमत मनुजाः ॥ ५० ॥
प्रहरणकलिकावृत्तम् ।
श्रीकृष्णं प्रणमामो वंशीवादनशीलं कालिन्दीतटभूमौ गोपीभिः कृतलीलम् ।
[6]उक्षाचारणदक्षं रम्ये पर्वतदेशे गोपानां कृतपक्षं पुष्पाद्यम्बरकेशे(?) ॥५१॥
लीला (लोला)[7]वृत्तम् ।

एते चतुर्दशाक्षरभेदाः ॥

सकलविबुधवृन्दैर्यानिशं वन्द्यमाना
प्रणतनिजजनेभ्यो दत्तभूयोनिधाना ।
दिशि दिशि कविपुञ्जैर्गीतकीर्तिप्रताना
जयतु जयतु सिन्धोरात्मजा भ्राजमाना ॥ ५२ ॥
मालिनीवृत्तम् ।

---

१. मातृकायां अनिरतं भजो । २. हेमचन्द्रेण २. २१४, जयकीर्तिना च दत्तमिदं छन्दः । ३. चक्रपदमिति प्रा. पै. २.१५३. ४. स्तुताम्; पन स्तुतौ ५. समुद्रपुत्रीत्वात् नागैः महितामित्याशयः स्यात् । ६. मातृकायाम् उक्षा° ७. लोला, अलोला इति वृत्तरत्नाकरादिषु ।

जलधरसमकान्तिः पीतवासो वसान-
श्चटुललकुटधारी गोपिकाचित्तहारी ।
कनकरशनयुक्तः स्वर्णमञ्जीरराज-
च्चरणकमलयुग्मः पातु मां नन्दसूनुः ॥ ५३ ॥

मालिनीच्छन्दः[१] ।

भाति या विभोः[२] सतामनारतं[३] हृदम्बुजे
क्रीडया करोति या त्रिलोकपालनं परम् ।
ब्रह्ममुख्यदैवतैः सदैव या निषेव्यते
श्रीरमा प्रयच्छतु प्रियाण्यभीप्सितानि मे ॥ ५४ ॥

चामरच्छन्दः[४] ।

एते पञ्चदशाक्षरभेदाः ॥

कालियाहिरञ्जसा व्यमर्दि येन रोषणेन
पीतवाससा कटिं निबध्य भूरि भासुरेण ।
कौतुकेन गोपगोपिकाकदम्बवीक्षितेन
सैष नन्दनः करोतु मां युतं शुभेन[५] ॥ ५५ ॥

चञ्चलावृत्तम्[६] ।

उदारहारविस्फुरन्महामनोज्ञवक्षसं
प्रभातभानुभासमप्रभासमानविग्रहाम् ।
नवीननीलनीरजोल्लसद्विलोललोचना-
मजेश्वरादिवन्दितां भजे मुकुन्दसुन्दरीम् ॥ ५६ ॥

पञ्चचामरवृत्तम् ॥

---

१. मातृकायां मानिनी; किमर्थं मालिनी द्विर्दत्ता इति न ज्ञायते ।

२. मातृकायां विभुः ३. मातृकायां अनिरतम् ४. प्रा. पै. २.१७८ ; तूणकम् इत्यन्यत्र ५. मातृकायाम् अक्षरद्वयं लुप्तम् । ६. प्रा. पै. २.१७३

तोयदपटले विद्युद्द्योते वर्षति नितरां
गोपसमुदये भूरिव्यग्रे खिन्नसुरभिके ।
बालकनिचये क्रन्दत्युच्चैः कुप्यति सुरपे[1]
शैलमधृत यो विष्णुर्दोष्णा रक्षतु स तु माम् ॥ ५७ ॥

चकितावृत्तम्[2] ।

शङ्खगदावराभयरथाङ्गशार्ङ्गविशिखान्[3]
वारिरुहं च या वहति पाणिभिः सुरुचिरैः ।
भक्तभयापहा भुवनवन्दिताङ्घ्रिकमला
सिन्धुसुता भृशं मम शुभानि यच्छतु सदा ॥ ५८ ॥

ललितवृत्तम्[4] ।

एते षोडशाक्षरभेदाः ॥

धरोऽधारि[5] स्वीये करसरसिजे येन बलिना
गवां रक्षाहेतोरमरपतिगर्व[6]क्षयकृता ।
प्रमोदो गोपानां व्यरचि कुतुकं गोपसुदृशां
स देयादस्मभ्यं प्रतिदिवसमिष्टं मुररिपुः ॥ ५९ ॥

शिखरिणीवृत्तम् ।

निषेवितपदद्वया प्रणतमौलिभिर्निर्जरै-
र्महाविभववाञ्छया विपुलवैभवं बिभ्रती ।
मुकुन्दवरवर्णिनी सकलशुद्धिसिद्धिप्रदा
ददातु मम सत्वरं करुणयाखिलं वाञ्छितम् ॥ ६० ॥

पृथ्वी ।

---

१. इन्द्रे २. छन्दोमञ्जरी २.१६.३ ३. प्रभोरस्त्राणां देव्यामपि वर्णनं संप्रदाय-संप्रतिपन्नमेव । ४. धीरललितेति पूर्णं नाम; महिषीति हेमचन्द्रे । ५. मातृकायां °री ६. मातृकायां गर्वि°

विश्वव्यापी विबुधमहितः सर्वदेवाग्रगण्यः
श्रुत्या गीतस्त्रिभुवनपतिर्दृप्तदैत्यौघहन्ता ।
सर्वाराध्यो मुनिभिरनिशं ध्यातशोभाढ्य[1]मूर्तिः
कल्याणं मे वितरतु सदा सिन्धुजाप्राणनाथः ॥ ६१ ॥

मन्दाक्रान्ता ।

नमितमुकुटो देवैर्भक्त्या तथा मुनिपुङ्गवै-
र्विरचितमहापूजा नित्यं प्रसूनफलादिभिः ।
सकरुणमनोवृत्तिः सिद्धिं जनेषु वितन्वती
वितरतु सदा द्रव्यं भव्यं रमा परमाशु मे ॥ ६२ ॥

हरिणी ।

एते सप्तदशाक्षरभेदाः ॥

नीलमेघलसद्वपुस्तडिदाभवस्त्रविराजितः
किङ्किणीयुतमध्यमः पटुनूपुराङ्घ्रिसरोरुहः ।
वेणुनादवशीकृतव्रजसुन्दरीपरिवेष्टितः
कामकेलिविचक्षणः प्रददातु कामफलानि मे ॥ ६३ ॥

चच्च(र्च)रीच्छन्दः[2] ।

स क्षीराब्धिर्धन्यः शुम्भति यत्कन्या कमले त्वं ख्याता
गेहे गेहे लोकश्चायति[3] यामेकां सुरसङ्घैर्वन्द्याम् ।
यन्मुक्तोऽयं लोको नश्यति दारिद्र्येण भुवि प्रम्लानो[4]
बन्धुत्यक्तो निर्मानो[5] बत, सा लज्जां मम पायाल्लक्ष्मीः ॥ ६४ ॥

मञ्जीरा[6] ।

एते अष्टादशाक्षरे छन्दसी ॥

---

१. मातृकायां शोभाय २. प्रा. पै. २. १८५. ३. पूजयति; चायृ पूजानिशामनयोः, भ्वादिः ४. मातृकायां प्रम्लानैः ५. मातृकायां निर्मिनो
६. प्रा. पै. २. १८०

घनविटपिकुललुलितगन्धमरुदिह चलति
शिशिरजलतपनतनया पुलिनमनुवसति ।
विलसति मदनपरवशो हरिरयमनुसर
सखि रचय मम कथितमत्र चलकनकतनु ॥ ६५ ॥

चन्द्रच्छन्दः[१] ।

सिन्दूरारुणकायकान्तिरतुलं क्षौमाम्बरं बिभ्रती
भास्वत्कर्णसुवर्णभूषणवती दिव्याङ्गरागान्विता ।
काञ्चीवल्गुवलग्नका [२]पदयुगप्रोल्लासि[३]सन्नूपुरा
श्रीदेवी कमलालया कलयतादह्नाय मे मङ्गलम् ॥ ६६ ॥

शार्दूलविक्रीडितम् ।

एते एकोनविंशत्यक्षरे छन्दसी ॥

वरबर्हिबर्हकिरीटिनं सुरनागमानववन्दितं
व्रजकेलिलोलुपचेतसं[४] समगोपबालकसेवितम् ।
नवनीलनीरदविग्रहं तडिदाभवस्त्रविराजितं
वसुदेवनन्दनमानमामि समस्तकामितपूर्तये ॥ ६७ ॥

गीतिका[५] ।

रम्यां नम्यां स्तुत्यां चिन्त्यां सेव्यां ध्येयां ज्ञेयां पूज्यां दृश्यां वर्ण्यां
श्रव्यां भव्यां नित्यां गेयां धन्यां कन्यां क्षीराम्भोधेर्विष्णोः कान्ताम् ।
सर्वाराध्यां सर्वाकारां सर्वाभीष्टां सर्वश्रेष्ठां विश्वख्यातां[६]
स्वर्णाभाङ्गीं ख्याताभिख्यां राजीवाक्षीं लक्ष्मीं देवीं वन्दे नित्यम् ॥ ६८ ॥

योगानन्दवृत्तम्[७] ।

एते विंशत्यक्षरे छन्दसी ॥

---

१. चन्द्रमालेति प्रा. पै. २. १९१ २. मातृकायां यद° ३. मातृकायां प्रोल्लादि° ४. मातृकायां वेतस्य ५. गीतेति प्रा. पै. २. १९७ ६. मातृकायां विख्याता ७. ह. दा. वेलनकरेण सन्दृब्धासु वृत्तसूचीष्वपि नामेदं नोपलभ्यते ।

गोपिकागणसतृष्णमानसविलासपूरितविनोदिनं
वेणुवादनविचक्षणोदितविलासिनीहृदयचेष्टितम् ।
भानुजातटनिकुञ्जपुञ्जगविहारलोलुपकलान्वितं
भावयामि रुचिरं सदा जलदवर्णविग्रहधरं हरिम् ॥ ६९ ॥

[1]मञ्जरीवृत्तम् ।

आस्यं यस्याः सहास्यं विकसितसरसीजन्मने दत्तदास्यं
लास्यं यत्रातनोति त्रिजगदधिपतेर्नेत्रमत्तालियुग्मम् ।
कर्णौ प्रायेण पाशौ विबुधपतिहरेश्चञ्चलस्वान्तबन्धे
धन्या दुग्धाब्धिकन्या मनसि मम मुदं मेदुरामातनोतु ॥ ७० ॥

स्रग्धरा ।

एते एकविंशत्यक्षरे छन्दसी ॥

सजलजलदगणनिचितगगनमन्धकारमलीमसं
रजनिरजनि बहुलभयभरयुगायता गतदिङ्मतिः[2] ।
असितसलिलभरितविपुलतटभीषणा शमनस्वसा[3]
विमलयदुकुलनलिनदिनमणिरीदृशे समयेऽभवत् ॥ ७१ ॥

[4]अच्युतवृत्तम् ।

त्वं सखि मुञ्च रुषं तरसा कुरु मे कथितं कमले
शौरिरयं नतिमातनुते ननु ते सदयं कुपितं[5] हि कुतः ।

---

१. तरङ्गः, तरङ्गमालिका इत्यन्यत्र ।
२. गतं दिग्विभागज्ञानं यस्यां सा ; जातदिङ्मोहा ।
३. यमुना ।
४. इदं किरीटच्छन्दसो (प्रा. पै. २.२११) गुरोः स्थाने लघुद्वयं बिभर्ति ।
५. कोपः ।

याति शशी चरमाचलकेल्लिरतानि[1] विहायसि तानि पुन-
स्त्वं हवमाशु जहीहि रमे परमे हितमाशु विधेहि हिते ॥ ७२ ॥

[2]मदिरावृत्तम् ।

एते द्वाविंशत्यक्षरे छन्दसी ॥

सर्वसुपर्वसमुच्चयवन्दितनन्दितगोपवधूनिकुरुम्बं
वेणुकलध्वनिकृष्टमृगीगणहुङ्कृतिमोदितधेनुकदम्बम् ।
सुन्दरनूपरशिञ्जितसंयुतभूतलसञ्चलिताङ्घ्रिसरोजं
चन्द्रकचारुकिरीटविराजितमद्भुतनृत्यपरं हरिमीडे ॥ ७३ ॥

मालतीच्छन्दः ।

अलिसन्निभकेशी कमलमुखी चन्द्रद्युतिशोभिललाटतटा
हरिणायतनेत्रा लसदधरा वेल्लद्भ्रि्ना[3] (?) वल्गुभुजायुगला ।
घटभास्वदुरोजा त्रिवलियुता रम्भासदृशोरुविलासवती
मणिनूपुरयुग्मा मृदुचरणा लक्ष्मीर्विदधातु सदा कुशलम् ॥ ७४ ॥

[4]सुन्दरिकावृत्तम् ।

एते त्रयोविंशत्यक्षरे छन्दसी ॥

नलिननयन कुसुमहसित रुचिरचिकुरचटुलमुकुट
विशदरदन मदनसदृश सुकृतसदन धृतलकुट ।

---

१. मातृकायां °लानि ।

२. लताकुसुममित्यन्यत्र ।

३. अत्र लघुद्वयमपेक्षितम् ; भ्रूवाचकशब्दश्चापेक्षितः ।

४. प्रा. पै. २. २०७.

परमविकट दलितशकट विटपियुगलहतिसुभट
सदयहृदय कलुषहरण भुवनभरण विबुध जय ॥ ७५ ॥[1]
कनकवलयवृत्तम् ।

सागरकन्येऽरुणरुचिनयने नम्रमुखी किमु रचयसि[2] कोपं
त्वामतिधन्यामवनतशिरसः साधुवचः सहचरि कथयाम[3] ।
हन्त वसन्ते विकसितकुसुमे गुञ्जितभृङ्गनिचयपरिजुष्टे
रोषमुपेता गमयसि समयं संभज केशवमसुसममेतम् ॥ ७६ ॥
[4]तन्वीवृत्तम् ।

एते चतुर्विंशत्यक्षरे छन्दसी ॥

अमरनिकररचितनमन दितिजदमन मदनजनिकर
परमपुरुष समरपरुष गरुडगमन व्रजयुवतियुत ।
सजलजलदसदृशतनुविभव नतमनुज सकलभयहृ
कमलनयन भुजगशयन कनकवसन जय विबुधवर ॥ ७७ ॥
[5]मणिगणवृत्तम् ।

या हरिणाक्षी चन्द्रनिभास्या मधुकरनिकरसदृशकचनिचया
सिंहसुमध्या पीनकुचाढ्या कुसुमविशिखधरयुवतिरुचिरभा[6] ।
शोभनशीला कल्पितलीला प्रणमदमरसमुदयकृतकरुणा
काञ्चनगौरी शुद्धसुवस्त्रा मम हृदि निवसतु जलनिधितनया ॥ ७८ ॥
क्रौञ्चपदावृत्तम् ।

एते पञ्चविंशत्यक्षरे छन्दसी ॥

---

१. २. ३, ४ पादेषु २३ अक्षराणि सन्ति । छन्दसोऽस्याप्याकरो दुर्लभः ।
२. मातृकायां °सित । ३. मातृकायां °यामा
४. प्रा. पै. २. २८१. ५. आकरो दुर्लभः
६. कुसुमविशिखधरो मन्मथः, तद्युवतिः रतिः, तद्वद्रुचिरकान्तिः .

दुरितहरण सुकृतकरण भुवनभरण
सुकृतितरण जय
रुचिरचरित सुगुणभरित मदनजनक
कनकवसन जय
कुसुमहसित ललितलसित कलितमुकुट
विधृतलकुट जय
अचलधरण सुजनशरण मृदुलचरण
गरुडशरण जय ॥ ७९ ॥

[1]कमलदलवृत्तम् ।

या कन्यास्ते दुग्धाम्भोधेः सिद्ध-
र्ध्येया देवैर्ज्ञेया प्राज्यैः(ज्ञैः ?)
स्तुत्या नागैर्नम्या श्रेष्ठा,
विद्युद्वर्णा भूषाकर्णा (कीर्णा ?) दत्तस्वर्णा[2]
स्त्रीभिः पुंभिर्जुष्टा तुष्टा
राज्यश्रीदात्री श्रीः ।
विद्वद्वन्द्या सैर्वेर्वेदै-
र्लोकेशेड्या पद्मारूढा
विष्वक्सेनप्रेमाधारा[3] नित्यं
भक्तौघानां दारिद्र्यघ्नी मत्तेभानां
तुङ्गाश्वानां मुक्तादीनां
दानेऽजस्रं सक्ता ॥ ८० ॥

[4]श्रीगोविन्दानन्दवृत्तम् ।

एते षड्विंशत्यक्षरे छन्दसी ॥

१, ४. आकरो न ज्ञायते २. अलङ्कारभरिता ; भक्तेभ्यः स्वर्णप्रदात्री ।
३. मातृकायां ° धारो ।

१ यो दुग्धाब्धौ शेते कृत्वानल्पं भुजङ्गपतितल्पम् ।
विरचितरुचिराकल्पं नमामि तमहं रमानाथम् ॥ ८१ ॥

गाथाच्छन्दः ।

या वृन्दारकवन्द्या
भृशमभिनन्द्या समस्तगुणैः ।
सा दुग्धसिन्धुकन्या
धन्या मम मानसे सदा वसतात् ॥ ८२ ॥

विगाथा ।

नीरज[१]सुन्दरनेत्रं
लसदतसीसुमसन्निभतनुम् ।
धन्ये वृन्दारण्ये
विहारिणं[२] नौमि तं कृष्णम् ॥ ८३ ॥

उपगीतिः ।

गाङ्गे निवसति सरसिज-
मध्ये विबुधध्येयाङ्घ्रिव(प)ल्लवद्वन्द्वा ।
करकलितविकचकमला
सा मम कमला सुखाय बोभूयात् ॥ ८४ ॥

उद्गाथा गीतिः ।

शिखिचन्द्रककृतमुकुटः
करधृतलकुटः प्रचारयन्धेनूः ।
वृन्दारण्यविहारी
गिरिवरधारी ममाशये सदा वसतु ॥ ८५ ॥

गाहिनी ।

१. मात्रावृत्तविषये प्रायः प्रा. पै. अत्रानुसृतम् ।

यां नागौ सिञ्चेते
मुक्तामणियुक्तकनककुम्भसलिलेन ।
सा जयति कमलहस्ता
महाप्रशस्ता सरोजनिलया श्रीः ॥ ८६ ॥

सिंहिनी ।

पाथोदकान्तकान्तिः
सुवर्णसङ्काशवस्त्रवलितशुभतनुः ।
भक्तावन[3]प्रवीणो
देवधुरीणो हरिः पुनातु मामाशु ॥ ८७ ॥

स्कन्धकम् ।

या मधुरिपुहृदि वसति सततमनुरक्ता
प्रणमति याममरराजिरमितमतिरुद्दामाम् ।
सततोदारां यामनुभजति सदा नृपगणः
सर्वाराध्या मुदिता गुणसमुदययुताऽवतु सा ॥ ८८ ॥

गन्धाणकवृत्तम् ।

कमलामानसमोदकर व्रजयुवतीगणसेह[4] ।
परिपालय माममरवर मेघमनोहरदेह ॥ ८९ ॥

देहो (दोहा १) ।

---

१. मातृकायां :नीर° । २. मातृकायां विहरणं । एतत् टिप्पणीद्वयं पृ. २४, श्लो. ८४-संबन्धि ।,

३. मातृकायां भक्ताह्व° ।

४. सेह ईहया सहित ।

नतजनमभिवर्धयसि तुरगनागानुपयच्छसिं
धनविरहितमपि नियतमवनि[1]पतिसाम्यं दाशसि[2] ।
बल(खल ?)नरमाशु कनयसि(?)बहुदु:खैरनुयोजयसि
लक्ष्मि गुणं क्षमः कस्तव वक्तुं ततो भवते(ति ?) ॥ ९० ॥

रोलावृत्तम् ।

जय जय ! यदुवर ! विबुध-
नुत ! धुतकलिमल ! सुभट !
मुनि[3]गणनुत ! समयुवति-
युत ! परमरसिक ! सुरप !
विलसदलकचयरुचिर-
मुख ! विशदहसितसहित ! ॥ ९१ ॥

रसिकाच्छन्दः ।

विपुलजलनिधिनन्दिनि दुरितगञ्जिनि जनगणदु:खदलने[4] ।
गरुडवाहनरञ्जिनि कलुषभञ्जिनि मामवतु भवती कमले ॥ ९२ ॥

घत्तानन्दः ।

नित्यं भज ललितं सुसखीवलितं
ताडितवैरिह(वि)तानं
हतकेशिमहासुर-लक्ष्मीभासुर-विरचितवेणुसुगानम् ।

---

१. मातृकायाम् ‘अवति’ ।

२. ददासि ; दाश्ट दाने भ्वादिः ६११. उपयच्छसि, दाशसि इत्युभयत्र विभक्ति-विपरिणामः कार्यः ।

३. ‘मुनि’ इति द्विर्लिखितं मातृकायाम् ।

४, मात्राद्वयसंमितो भागो लुप्तः ।

रविजावरकूले मरुदनुकूले
कारितबालक्रीडं व्रजबाधाशमनं विद्विड्धमनं दारितजनपीडम् ।
मुनिगणकृतसेवं भासुरदेवं
वारितघनवनधेनुं
चन्दनयुतदेहं कृतवनगेहं वादितमृदुलसुवेणुम् ।
मधुदानवमारं स्वीकृतहारं
मुनिगणविरचितपूजं
तनुविजितपयोदं कलितविनोदं पातितकिन्नर(कालिय ?)भुजगम्[1] ।
रजनीपतिवदनं द्विषतां कदनं
पाणितल[2]स्थितचक्रं निजभक्तकृपालुं
शेषशयालुं विदलितगजरिपुनक्रम् ।
करतलधृतशैलं चोरितचेलं
गुञ्जाहारसमेतं कृतवंशीनादं दुर्जनसादं गुणगणरत्ननिकेतम् ।
कृतदितिजविनाशं हसितविकाशं
मोदिततरुणीपुञ्जं नाशितभवखेदं विलसद्वेदं गेहीकृतघनकुञ्जम् ।
कृतधरणीधरणं जगदाभरणं
कल्पितभूरिविलासं
कृतपापनिरासं भुवनावासं कंसरिपुं घनभासम् ॥ ९२ ॥

चौपेया ।

रुचिरकमलपरिशोभितहस्ता
शक्रमुखप्रमुनिकेतनशस्ता ।

---

१. मातृकायां भुजम् ।
२. मातृकायां °स्थल°

शोभनमाल्यसमन्वितहृदया
भवतु सदा हरियोषित्सदया ॥ ९४ ॥

पादाकुलकम् ।

रविजायाः कूले, विधृतदुकूले, कृतजलकेलिं कलय(ये)[1] ।
बुधरिपुपीडाकरणं धन्याचरणं श्रीरममाणं भज मनुजम् ॥ ९५ ॥

घत्तावृत्तम् ।

दिशि दिशि विनमति भवतीं[2]
लोकः सुरनिचयोऽप्यभिवादयते ।
सा मम चेतसि तिष्ठतु
कमला निजहृदये कृत्वा करुणाम् ॥ ९६ ॥

चौवोलि[3]वृत्तम् ।

असितमसृणनवजलदसदृशतनुनिहितघुसृणरस !
तुहिनकिरणवरवलय[4]रुचिरमुख ! सुखदतरहसित ।
सकलदितिजकुलमथन ! विविधनुत ! कनकमुकुटधर !
शतमखमहित ! समरभयरहित ! करधृतलकुट ! जय ॥ ९७ ॥

शक्रवृत्तम् ।

प्रणमति तव पदकमलयुगं यः
तस्य गृहे त्वं कलयसि वासम् ।
धन्यतमो भवतीह स लोके
त्वामत एव दधौ हृदि विष्णुः ॥ ९८ ॥

अरिला[5]वृत्तम् ।

---

१. तृतीयभागे त्रयोदशैव मात्रा अपेक्षिताः; अत्र तु अर्धद्वयेऽपि चतुर्दश दृश्यन्ते ।
२. मातृकायां भवतां
३. चउवोला इति प्रा. पै.
४. तुहिनकिरणेत्यत्र वलयशब्दो मण्डलवाची ।
५. अडि(लि)ल्ला इति प्रा. पै.

हृदय[1]कलितवनमाल ! बाल[2]सञ्चयपरिशोभित !
गोपवधूचयनयनचारुलक्ष्मीपरिलोभित !
हस्तकमलधृतचक्र ! शक्रमुखनिर्जरवन्दित !
रिपुरणचालितरोप(ष ?) !
गोपगोपीगुणसन्दित[3] ! देवाधिदेव ! परबलदलनचलन[4] ! चण्डकोदण्ड-
धरवरबाहुविततविक्रमधरण ! गरुडयान जय योधवर ॥ ९९ ॥

षट्पदवृत्तम् ।

पद्मे ! ध्यानं तव जयति हारि[5]
प्रणतजनानामघचयनिवारि ।
सुकृतिजनानाममितधनकारि
नरेशनिवहो(हे ?) दययोद्यमधारि ॥ १०० ॥

पकुटिका (पज्झटिका ?) ।

करतलधृतवेणुः परिचितधेनुः
कंसासुरकुञ्जरगञ्जी
यमुनातटवासी बहुसंलासी भक्तोच्चयपृथुभयभञ्जी ।
कृतनिजजनरक्षः समरसुदक्षः
सुरगणरोपितशुभपक्षः
मम भावुकदाता
भवकृतिधाता हतभीषणदानवलक्षः ॥ १०१ ॥

पद्मावतीच्छन्दः ।

---

१. उदय इति मातृकायाम् ।
२. मातृकायां वाल°
३. सन्दित वद्ध ।
४. दलनचलन दलनार्थक-रणभूसञ्चार ।
५. हारि मनोहारि ।

मम हृदयं त्वयि सततं, [1]मय्यपि तव, यादवकुलपात-
जलनिधिजे[2] तव वचनमिदमाशु मनोरथदं भवतु मे || १०२ ||

द्विपदी[3] ।

हृदयं सदयं भवतु तव सततं नन्दकुमार
व्रजतरुणीगणहृदयहर ! तनुजितसुन्दरमार[4] ।
गोपशिशुमण्डलमण्डित कुसुमरुचिरतर ! दास-
भक्तजनपालन !
पण्डित ! कुसुमरुचिरतरहास !
भवति चरितं लसदुदयं गिरिवरधारण !
धीर ! वसतु तव चरणे हृदयम्[5] || १०३ ||

कुण्डलिका ।

मम भवनमनुकलय रमे !
मयि करुणं नयनं परिरोपय ।
तव भक्तोऽहममितरुचे ! दारिद्र्यं
त्वं परिलोपय[6] || १०४ ||

चुलिया[7]वृत्तम् ।

---

१. 'मयि' द्विर्लिखितं मातृकायाम् ।

२. यादवकुलेति ; यः पश्चाद् स्वतीरे यादवानपातयत् तस्यैव जलधेः पूर्वं संजाते ।

३. द्विपद्याः पादचतुष्टये प्रतिपादमष्टाविंशतिमात्राः ; अत्र पादद्वयमेव दृश्यते ।

४. इदं समस्तपदं द्विर्लिखितं मातृकायाम् ।

५. षष्ठः पादो मात्राभिरेकादशभिर्न्यूनः ।

६. मातृकायां °लोभय

७. चुलिआला इति प्रा. पै.

विबुधवर [1]शैलधर जगदवन[2]
धर्मपर राधिकामोदक रासरसकेलौ
प्रणतजनमनुपाहि
मम हृदयमुपयाहि त्वयि मतिरुदेतु हृत्कमलहेलौ[3] ॥ १०५ ॥

कुल्लणा[4] ।

बहुलचमत्कृतिरूपवतीं
पीताम्बरधरहरिसुदतीम् ।
चन्द्रकलायुतभालतलां
स्तौमि रमामति[5]मञ्जुगलाम् ॥ १०६ ॥

हाकलिच्छन्दः ।

दन्तविनिर्जितहीर ! सजलनीरदनिभविग्रह !
जय जय कंसविपक्ष चण्डदानवकृतविग्रह ॥ १०७ ॥

सोरवा(रड्ड)वृत्तम् ।

तस्य जनुः पुरुषस्य रमे सफलं तव नतिरुचिता विहिता ।
तस्य गतं सकलं कलुषं ननु बहुला शुभपटली विदिता ॥ १०८ ॥

रुचिरावृत्तम् ।

मधुधेनुकमर्दन-कृतबहुतर्जन-
कलितसकलमुनिगणमननं
गोपावलिवेष्टित-सुन्दरचेष्टित-
विश्वविनिर्मितबहुनमनम् ।

---

१. मातृकायां शिल । २. मातृकायां जगदद्ध° । ३. हेलिः केलिः, हृदयकमलविहारिणी ।

४. झुल्लण इति प्रा. पै.

५. 'रमापति' इति मातृकायाम् ।

कृतगोपीलालन-कृतभवपालन-
निर्दयदितिसुतनाशकरं
तरुयुग्मविदारक-पर्वतधारक-दुरितहरं भज देववरम् ॥ १०९ ॥

दण्डकलावृत्तम् ।

अतिभासुरमणिगणरुचिसहिते
विनयानतमुनिसमुदयमहिते ।
परिपूरितनिजजनकमित[1]भरे
परिपालय नवनलिनयुगधरे ॥ ११० ॥

सिंहावलोकितवृत्तम् ।

विहितजनपाल ! शोभिगुणजाल ।
कृतयुवतिलाल[2] जय नन्दबाल ॥ १११ ॥

मधुभारवृत्तम् ।

चन्दनचर्चितदेहकलितवरभूषणे
सद्गुणराजिविराजितनाशितदूषणे ।
वातविकम्पितकञ्जविलोलविलोचने
तव मतिरस्तु सदा मम दुःखविमोचने ॥ ११२ ॥

प्लवङ्गमवृत्तम् ।

वंशीरवमोहित-गोकुलदोहित-सुरभीसन्दोहं
देवावलिवन्दितमुनिगणनन्दितमन्दितसज्जनहतमोहम् ।
नीरदसमदेहं व्रजकृतदे(गे)हं विरचितदधिदुग्धविलेहं
स्मर नन्दकिशोरं गोरसचोरं गोपीजनसमुदयसेहम्[3] ॥ ११३ ॥

लीलावतीवृत्तम् ।

---

१. कमितं कांक्षितम् ।
२. लाल लालन ।
३. साभिलाषम्

विष्णुरमणि विश्वजननि दुःखहरणविक्रमे
पद्मसदृशचारुचपलनेत्रमधुरविभ्रमे ।
कान्तिकलितरत्नघटितभूरिकनकमण्डने
देहि मह्यमतुलशर्म विहितदुःखखण्डने ॥ ११४ ॥

हीरच्छन्दः ।

धृतगुञ्जाहारं तनुजितमारं सततमुदारं गुणसहितं
कल्पितपटुरासं कृतमृदुहासं रचितविलासं सुरमहितम् ।
कृतदितिसुतदमनं खगपतिगमनं मुनिकृतनमनं देववरं
व्रजयोषिदधीनं घनवनलीनं भज दधिपीतं[1] वेणुधरम् ॥ ११५ ॥

त्रिभङ्गीवृत्तम् ।

गुणनिचयशालिनि पृथुलमुक्ति[2]मालिनि रम्ये
धननिवहदायिनि जनपायिनि[3] मुनिवरनम्ये ।
कुसुमसमहासिनि मदलासिनि जलनिधि[4]कन्ये
[5]वलयहारिणि पद्मचारिणि मयि वस[तु] धन्ये ॥ ११६ ॥

विगलितकम्[6] ।

कृतदितिसुतलय कमलललितशय[7] निजजनकृतदय विबुधपते
व्रजयुवतिवसनहर निरुपम गिरिधर सेवकसुखकर विमलमते
सितकमलसमनयन भुजगपतिशयन कृतकुसुमचयन चटुलगते

---

१. पीतं दधि येन सः, तम् ; घृतपीत-तैलपीतादिवत् परनिपातः ।
२. मुक्तिः = मौक्तिकम् ; ‘पृथुमौक्तिकमालिनि’ इति समीचीनः पाठः स्यात् ।
३. पा रक्षणे, अदादिः ५९
४. मातृकायां जलधि°
५. अत्र अक्षरलोपः
६. अत्र दत्ता गलितकभेदा नामतो हेम. दृष्टाः, लक्षणतस्तु भिन्नाः ।
७. शयो भुजः

जय जय गरुडगमन कृतकलुषशमन मुनिविहितनमन सुकृततते ॥११७॥

जनहरणवृत्तम् ।

विकचवारिजरम्यकरद्वयां
शरदिजैन्दव[1] बिम्बसमाननाम् ।
[2]द्रुतसुवर्णसवर्णतनुप्रभां
हरिमृगीदृशमन्वहमाश्रये ॥ ११८ ॥

भूषणगलितकम् ।

गोपावलिवेष्टित बहुसंवेष्टित व्रजवनविहितविहार
वनमालाविलसित विहितामितहित परिहितशोभनहार ।
वृन्दावननायक मङ्गलदायक जलनिधिविरचितवास
तरुणीगणनागर गुणगणसागर जय जय विहितविलास ॥ ११९ ॥

मरहवा[3] वृत्तम् ।

इन्द्रमुखामरनिवहनुतां मुनिमहितां
दारितसेविकलुषभरदत्तबहुसुखाम्[4] ।
नम्रनरेशनिकरनिखिलोदयप्रदां
स्तौमि रमां जलजसुदृशमतुलभायुताम् ॥ १२० ॥

सुखगलितकम् ।

नीरदाभविग्रह प्रसूनमालिकासुवेष गोपनागरीसहास लक्ष्मीनाथ सन्मते
धेनुकादिनाशचण्ड सिद्धसङ्घसेव्यतम दुष्टजनपीडाकर मत्तगजसद्गते[5] ।

---

१. शारदेन्दुसंबन्धि इत्यर्थः ।
२. मातृकायां प्लुत इति ।
३. मअणहरा इति प्रा. पै.
४. सेविनां जनानां दारितकलुषभरा, तेभ्यो दत्तबहुसुखा च, ताम्
५. मत्तगजोदारगमन

भक्तपुञ्जरक्षणप्रगल्भ भूमीधरोद्धार[1] दानवीर णेकुलेन्द्र(?) लुप्तसाधुदुर्गते
सेवते पदं तवाशु यो नरः सभक्तिमान्न तस्य जायते भयं सदाप-
कृष्टदुर्मते[2] ॥ १२१ ॥

धनाक्षरम्[3] ।

सकलमुनिकुलमहितां नीरजसुन्दरचरणयुगलां
उज्ज्वलवसनरुचिरविभास[4]मनुत्तमकञ्जकराम् ।
स्तौमि विबुधगणकथितगुणावलिसुयुजमिन्दुमुखीं
सिन्धुतनूजां नृपतिवृन्दमहोदयदानपराम् ॥ १२२ ॥

समगलितकम् ।

पीतं पटं निदधता व्रजबालसमन्वितेन
[5]वेणुं सदाधरपुटेन निवादयता वरेण ।
सच्चन्द्रकाञ्चितकिरीटनवमण्डनशालिना
स्वान्तं हवेन विवशीकृतं मे वनमालिना ॥ १२३ ॥

विषमितागलितकम् ।

[6]यदकृत गिरिमन्दरं हि मन्थं
भुजगपतिं दृढरज्जुमाततान ।

---

१. मातृकायां °धरे धीर
२. सदा अपकृष्टा अपसारिता दुर्मतयो येन
३. छन्दोग्रन्थेषु दुर्लभमिदम्; वेलङ्करवृत्तसूचीष्वपि न दृश्यते ।
४. अत्र 'भास्' इति शब्दः ।
५. मातृकायां वने वेणुं स दधार इति; 'वने' इत्यत्र अधिकम् ।
६. इतः परं वर्णवृत्तेषु अर्धसमभेदाः ।

सह सुरदनुजैर्ममन्थ सिन्धुं
स मधुरिपुर्भवतीमवाप्तुमेव ॥ १२४ ॥

पुष्पिताग्रा ।

यमुनातटवृक्षसुमावली-
विरचितोत्तममाल्यविराजितः ।
चपलासमवस्त्र[1]भूषितो
मम करोतु सुखं कमलापतिः ॥ १२५ ॥

हरिणप्लुता ।

परिहरसि नृणां दरिद्रतां
स्वपदसरोरुहभक्तिकारिणाम् ।
गजतुरगपदातिवेष्टिताः
क्षितिपसमा विलसन्ति लक्ष्मि ते ॥ १२६ ॥

अपरवक्त्रम् ।

तव केशव पत्पयोरुहं
रुचिरं यः स्मरतीह मानवः ।
धनधान्ययुतः स भूतले
भवति प्राज्यजनावलीवृतः ॥ १२७ ॥

सुन्दरीवृत्तम्[2] ।

व्यानम्रमुनीन्द्रवन्द्यमानं
स्वीयाभा-जितरक्तवारिजातम् ।
[3]सन्नूपुरराजिराजितं तत्

---

१. मातृकायां 'समस्त्र' इत्येव; चपला विद्युत्; पीताम्बरभूषितः ।
२. वियोगिनी, प्रबोधिता इत्यादिनामभेदा अस्या अन्यत्र ।
३. मातृकायां सनूपर° ।

म्भे ते चरणद्वयं स्मरामि ॥ १२८ ॥

भद्रविराट्छन्दः ।

[1]ननर्त रासकुतुकेषु
वरयुवतिमण्डलीयुतः ।
बर्हमुकुट(क)मसौ कलयन्
यमुनातटे हरिरनङ्गसुन्दरः ॥ १२९ ॥

उद्ध(द्ग)तावृत्तम् ।

[2]त्वयका कृपयातिरक्षितः
क्षितिपः सत्वरमेव जायते ।
तव वच्मि कथं गुणानहं
कमले केशवसत्कृतालये ॥ १३० ॥

वैतालीयवृत्तम् ।

प्रबलोद्धतवक्रनक्रदंष्ट्रा-
कलिताधीरमतङ्गमोक्षदक्षम् ।
दितिजावलिपीडितादितेया[3]-
वनधीरं प्रणमामि वासुदेवम् ॥ १३१ ॥

औपच्छन्दसवैतालीयवृत्तम् ।

जय जय मुनिगणाराध्य विष्णुप्रिये दिव्यभूषा[4]म्बरन्यासदेहे प्रशस्ते
धनविरहितजनोदग्रदारिद्र्यवि[5]खण्डनप्रोद्यते पद्मरम्याक्षियुग्मे ।

---

१. मातृकायां विनर्त ।

२. त्वया ; मातृकायां त्वकया ।

३. आदितेयाः सुराः । ४. मातृकायां भूषण° ।

५. अत्र 'वि' इत्यत्र दीर्घेण भाव्यम् ; 'संखण्डन' इति वा 'विध्वंसन' इति वा भवितुमर्हति ।

सकलसुरपरिगीताखिलोदारलक्ष्मि[१] देवेशि दामोदरप्राणरूप(पे)
मुख(वदन)[२]कमलसुचारुप्रभोल्लासदन्तावलीकान्तिरम्ये (नम):[३] ते
नमोऽस्तु ॥ १३२ ॥

सर्वतोभद्रदण्डकम् ।

माधुरे मण्डले बाललीलायुतं देवकीमोदनायोद्यतं
दैवतौघस्तुतं चारुमुक्ताविभूषा[४]वलत्कुण्डलं वलद्(वरगु ?)वंशीरवं सुन्दरं
बालकैर्वेष्टितं कंसभूपालविध्वंसनप्रोद्धतं भक्तसन्दोहशर्मप्रदं
सिन्धुजावल्लभं नीपभूमीरुहाधःस्थितं बर्हिबर्हावतं-साञ्चितं
सर्वदा चक्रपाणिं भजे ॥ १३३ ॥

मत्तमातङ्गदण्डकम् ।

इति श्रीमहाराजाधिराजमहाराजश्रीमदनूपसिंहदेवविरचिता

श्रीलक्ष्मीनारायणस्तुतिः

सम्पूर्णा ॥

---

१. मातृकायां लक्ष्मिणि ; अत्र एकं गुरु, एकं लघु चापेक्षितम् ।
२. अत्र लघुत्रयमपेक्षितम् ।
३. अत्रैवमेकं लघु एकं गुरु चाधिकमपेक्षितम् ।
४. मातृकायां विभूषु इति ।

॥ कुरङ्गीपञ्चकम् ॥ *

अयि कुरङ्गि तुरङ्गमविक्रमे
त्यज वनं जवनं गमने(नं) कुरु ।
इह वसन्ति वनेचरनायकाः
सुरभिलोहितरूषितसायकाः ॥ १ ॥

जालैर्दिशः प्रविततास्सलिलं विषाक्तं
[1]घाता मही, हुतभुजा ज्वलिता वनान्ताः ।
व्याधाः पदान्यनुसरन्ति गृहीतचापाः
कं देशमाश्रयति डिम्भवती[2] कुरङ्गी ॥ २ ॥

'अग्रे व्याधः करधृतधनुः पार्श्वतो जालमाला
पृष्ठे वह्निर्दहति विपिनं सन्निधौ सारमेयः[3] ।'
एणी गर्भादलसगमना शावकैः पादलीढा(लीढपादा)
[4]इत्थं चिन्ताविशदहृदया 'किं करोमि क यामि' ॥ ३ ॥

---

* मद्रपुरी-शासकीयहस्तलिखितकोशागारस्थाद् D. १२००९ अङ्कसूतो मातृकाया उद्धृतम् । अत्रत्या द्वित्राः श्लोकाः मुक्तकतया सुभाषितकोशेषु दृश्यन्ते । तथा हि 'आदाय मांसम्' इति चतुर्थः सुभाषितावलौ (६६०), शा. पद्धतौ (४०१५), सु. र. भाण्डागारे च (३६२.२२) ; प्रथमतृतीयौ च सु. र. भा. २३३.१०४, ११२; तृतीयश्लोकश्च सु. र. भा. पाठभेदेन ।

१. घाता मही ; प्रकृत्या वा ग्रहणार्थं वा निखातैर्गर्तैर्युता ।

२. गर्भिणी ।

३. सारमेयः व्याधस्य ग्रहणसहायभूतः श्वा ।

४. 'अग्रे व्याधः' इत्याद्यया 'किं करोमि' इत्याद्यया च चिन्तया अविशदहृदया व्यामुह्यमानहृदया एणी भवति ।

आदाय मांसमखिलं स्तनवर्जमङ्गे
मां मुञ्च वागुरिक[1] यामि कुरु प्रसादम् ।
अद्यापि घासकवलग्रहणेऽनभिज्ञाः
मन्मार्गवीक्षणमुखाः शिशवो मदीयाः ॥ ४ ॥

मध्ये ज्या त्रुटिता शरासनमहो भग्नं दवाग्ने रयाद्
दग्धं जालमकालमेघसलिलैः शान्तश्च दावानलः ।
श्वाऽगच्छत् शशकाशयाऽऽशुगमना सूता मृगी गर्भिणी
तामापत्सरितं ततार कृपया देवस्य लक्ष्मीपतेः ॥ ५ ॥

---

१. अत्र 'क' इत्यधिकं मातृकायाम् ।

॥ नीतिशतकम्* ॥

॥ श्रीनिवासविरचितम्[†] ॥

लक्ष्मीचरणलाक्षैकलक्षणं शुभवीक्षणम् ।
शेषक्षितिधराध्यक्षमम्बुजाक्षमुपास्महे ॥ १ ॥

सदाक्षिण्यदृशा मित्रममित्रं वामया दृशा ।
वशं नयति यः श्रीमान् सत्यं स पुरुषोत्तमः ॥ २ ॥

राज्ञः कलङ्किनः प्रीतिमनपेक्ष्याऽनिशोज्ज्वलाः ।
प्रभावतः प्रियाः केचित् कवयः सन्ति सर्वतः ॥ ३ ॥

---

* D. 12053 - मद्रपुरी शा. हृ. लि. कोशागारस्थमातृकातः ।
श्लेषप्रायमिदं नीतिशतकं द्व्यर्थदर्शिभिः ।
वाक्यैर्लघुमितैरेव व्याकरोत्यत्र राघवः ॥

† श्रीशैल - शठमर्षण - बुक्कपट्टन-तातार्य - वंशीयोऽयं कविर्विशिष्टाद्वैतग्रन्थकर्ता च ; सुरपुराधीश्वराणां गुरुभूता एतद्वंशीयाः ; ग्रन्थकर्तुः समकालीनः सुरपुरेशः वेङ्कटः, कालश्च अष्टादशशताब्दी । एतेषां ग्रन्थकर्तॄणामस्य सुरपुरराजवंशस्य च चरित्रं विस्तरेण मया परिशील्य लिखितम् Andhra Historical Research Society पत्रिकायाम् (Vol. XIII. 1940).

२. दाक्षिण्ययुतया दृशा, दक्षिणभागस्थया दृशा ; वामया विपरीतया, वामभागस्थया च । मित्रं सुहृदं, सूर्यम् ; अमित्रं शत्रुं चन्द्रं च । पुरुषोत्तमः पुरुषश्रेष्ठः, नारायणश्च यस्य सूर्यचन्द्रौ नेत्रे इति प्रसिद्धिः ॥

३. राज्ञः नृपस्य, चन्द्रस्य च । कलङ्किनः अङ्कवतः दोषवतश्च । अनिशम् उज्ज्वलाः सततोज्ज्वलाः, अरात्रावुज्ज्वलाः । प्रभावतः प्रभायुक्तस्य सूर्यस्य, प्रभावाद् निजात् ; पञ्चम्यर्थे तसिल् ; कवयः काव्यकराः, क-वयः, कं जलं, तत्र चारिणो हंसादयः पक्षिणश्च ॥

भुजङ्गभोगाद्भ्रष्टस्य मन्दरागस्य मज्जनम् ।
कथं भूयान्न भोगानामप्रसादायामृतार्थिनाम् ॥ ४ ॥

तरङ्गितरसोल्लासैर्मित्रभेदं वितन्वताम् ।
सरसां संपदं हर्तुं शुचेरभ्युदयो भवेत् ॥ ५ ॥

पवित्रसन्मना(नः?)स्थेम्नः सदागतिकृतोद्गतेः ।
सारस्वतस्तलस्पर्शः किन्न भूयाद्गिरीशितुः ॥ ६ ॥

अनुरक्तमुखाः केचिदनुषज्यो(ज्या ?) जलाशयैः ।
शारदामोदमादा(धा ?)तुं चरन्ति जगतीतले ॥ ७ ॥

द्राङ्नि(नृ)शंसाश्च हंसाश्च जडजातानुषङ्गिणः ।
अपि क्षमाभृतां छिभिभ्र(छिद्र)मवेक्षन्ते घनोदये ॥ ८ ॥

---

४. अमृतमथनकथाविषये भुजङ्गभोगो वासुकि-शरीरम्; मन्दराख्यो अगः पर्वतः; नभोगानां देवानाम् इति। अर्थान्तरे भुजङ्गाः विटाः, तदुचिताद् भोगाद् सुखानुभवात्; मन्द-रागस्य मन्दीभूतकामस्य; भोगानां मज्जनं ह्रासः कथं न स्यात् ॥

५. शुचेर्ग्रीष्मस्य; सरसां सरसीनाम्; तरङ्गितानां वीचिमतां रसानां जलानाम् उल्लासैः मित्रभेदं प्रतिफलितसूर्यबिम्बस्य शकलीभावं वितन्वताम्। अर्थान्तरे शुचिः शुद्धः पुरुषः, तस्याभ्युदयो मित्राणां सुहृदां भेदं वितन्वताम्; तरङ्गितरसोल्लासैरापाततः स्नेहप्रकटनैरिति मित्रभेदने उपायकथनम्; तादृशानामसतां सरसां संपन्नां संपदं हर्तुमेव उदय इत्यन्वयः ॥

६. गिरीशितुः पर्वतश्रेष्ठस्य, वाक्पतेः कस्यचित्; सारस्वतः जलप्रवाहः, वाक्प्रसरः; तलस्पर्शः पूर्णः, पर्वतपक्षे समुद्रमज्जनेन तत्स्थलस्पर्शः; सदागतिर्वायुः, सती आगतिः आगमः संप्रदायः; तेन कृतोत्कर्षस्य। पवित्रसन्मनःस्थेम्न इत्यत्र कविपक्षे पवित्रस्य सन्मनसः स्थेमा यस्य तस्य; पर्वतपक्षे पविरिन्द्रवज्रं, तेन त्रसन् मनसः स्थेमा यस्य ॥

७. अनुरक्तमुखाः हंसाः, व्यक्तानुरागवदनाश्च; जलाशयैस्तडागादिभिरनुषज्याः सङ्गमयोग्याः; अन्यत्र अजडाशयैः बुद्धिमद्भिरनुषज्य सङ्गं प्राप्य। शारदामोदं शरत्सम्बन्धिनमानन्दं, शारदायाः सरस्वत्या मोदं च ॥

८. नृशंसपक्षे जडजातानि जडजनसमूहाः, हंसपक्षे जलजातानि पद्मानि;

ये मुक्ताश्चापलतया तेऽनुकूलफलोन्मुखाः ।
परेषां कुर्वते रागं शरा इव नरा हृदि ॥ ९ ॥

यः प्रभावान्मुदं याति सदा नक्षत्रमण्डले ।
अनीश्वराः परेऽमुष्य कलां नार्हन्ति षोडशीम् ॥ १० ॥

साधुरक्तोपकाराय चक्रं धत्ते भुजेन यः ।
सुमनःश्रेयसे भूष्णोस्तस्य श्रीरनपायिनी ॥ ११ ॥

यस्य बालेऽ(ल्ये)तिकौटिल्यं पूर्णतायां कलङ्किता ।
स राजा बहुले पक्षेऽप्यशुच्या परिभूयते ॥ १२ ॥

सुदृशां हृदयं रोद्धुं जनिताः कुचवत्खलाः ।
मध्यमां वृद्धिमासाद्य परिभ्रश्यन्त्यधोमुखाः ॥ १३ ॥

क्षमाभृतां क्षान्तिमताम्, अन्यत्र पर्वतानाम्; छिद्रं प्रहरणयोग्यं स्थानम्, अन्यत्र पर्वतमध्ये प्रवेशानुकूलो द्वारः, यथोक्तं मेघे 'हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम्'; घनोदये अत्यैश्वर्यसंपत्तौ, अन्यत्र मेघोदये वर्षासु ॥

९. चापलतया चापल्येन, चाप-लतया वङ्कितधनुषा च; फलं प्रयोजनरूपम्, शरमुखे वेधनार्थं न्यस्तमायसखण्डादि; रागमनुरागम्; वेधकृतरुधिरजं शोणिमानं च ॥

१०. प्रभा-वान् प्रभायुक्तः चन्द्रः, प्रभावात् शक्तितः; सदा नक्षत्रमण्डले नित्यं व्योम्नि, सदान-क्षत्रमण्डले दानशीलानां क्षत्रियाणां समूहे; अनीश्वराः अप्रभवः, चन्द्रपक्षे चन्द्रमौलिरूप-ईश्वरादन्ये; कलां चन्द्रकलां नार्हन्ति, अन्यत्र भागलेशेनापि न तुल्या इति च ॥

११. विष्णुराजयोः श्लेषः । साधु सम्यक् रक्तानामनुरक्तानां प्रजानामुपकाराय; साधूनां रक्तानां भक्तानामुपकाराय; चक्रं राज्याङ्कम्, सुदर्शनं च; सुमनसः सौम्याः देवाश्च; श्रीः राज्यश्रीः, देवी लक्ष्मीश्च ॥

१२. राजशब्दस्य चन्द्रभूपार्थद्वयमालम्ब्य श्लेषः । यो राजा कुमारभावे अनृजुमार्गचारी, तारुण्ये च दोषवन्मार्गचारी स सत्यपि महति मित्रसङ्ग्रहे अशुच्या अशुद्धया परिभूयते; एवमेव चन्द्रोऽपि स्वल्पकलो वक्रः, कलापूर्णो व्यक्तकलङ्कः, तमिस्रपक्षे चाऽशुद्धः ॥

१३, मध्यमां वृद्धिमिति कुचपक्षे मूले क्षामत्वम्; खलपक्षे वृद्धिह्रासम् ॥



ये लङ्कापुरुषास्तेषां श्रियो दशमुखोज्झिताः ।
प्रतिकूले विधौ नश्यन्त्यपि का....यवृत्तिभिः ॥ १४ ॥

खलानां कार्मुकाणां च सद्वंशजनुषामपि ।
गुणलाभो भवेदाशु परहृच्छेदकारणम् ॥ १५ ॥

महावनोदितामोदमूर्जितं सहकारकम् ।
लब्ध्वा शुकः फलैस्तृप्ते(लैस्तुष्टो) न्नाव(नाल)पेन्मधुरां गिक(र)म् ॥१६॥

गुणकोटिपरिष्वङ्गेऽप्यनुत्कर्षसहः स्वतः ।
काश्चि(कश्चि ?)दाजी(जि)भुवं प्राप्य शीर्यते शिवधन्ववत् ॥ १७ ॥

खलान्वि(नां) शृङ्खलानां च समयस्फुरितात्मनाम् ।
सदाचरणनिर्बन्धान्नान्यदस्ति प्रयोजनम् ॥ १८ ॥

बहुसत्त्वाश्रयाः केचिदग्रह(ग ?)म्या अपि स्वतः ।
भवन्ति जगतां प्रीत्यै घनेभ्यो जीवनप्रदाः ॥ १९ ॥

---

१४. ये लङ्कापुरुषाः लङ्कावासिनो राक्षसाः, ये अलं कापुरुषाः; दशमुखोज्झिता रावणहीनाः, अर्थान्तरमस्पष्टम् ॥

१५. वंशः वेणुः, कुलं च, गुणः कार्मुकपक्षे ज्या ॥

१६. महा-वन-उदित-आमोदं सहकारकं चूतम्; सहकारकं साह्यकारकमुपकारिणम्; तत्पक्षे महद् अवनं रक्षणं तदुदितः आ समन्तान्मोद आनन्दः, तम्; लब्ध्वा शुकः पक्षी; अन्यत्र लब्ध्वा आशु कः इति पदच्छेदः; उभयत्रापि मधुरा गीरुग्रपन्ना; उपकृतपक्षे सा कृतज्ञतारूपा भवति ॥

१७. गुणकोटिः ज्याकोटिः, सद्गुणसमूहः; अनुत्कर्षसहः गौरवाद् ज्याकर्षासहः, परोत्कर्षासहः; कश्चिद् असूयाग्रस्तः पुरुषः, आजिभुवं समरभूमिं; सीतां च; आजिः समभूमिः; सीतास्वयंवरे रामेण कृष्टः शिवधन्वेव शीर्यते ॥

१८ समये अपेक्षितवेलायां स्फुरितात्मनाम्; शृङ्खलापक्षे सम्-अयः-स्फुरितात्मनामिति छेदः, तासामायसनिर्मितत्वात्; सतां साधूनामाचार-रोधकत्वं खलपक्षे; शृङ्खलापक्षे सदा चरणयोः प्रतिबन्धकत्वम् ॥

१९. महतां समुद्रस्य च श्लेषः, सत्त्वाश्रयाः दुष्टजन्त्वाश्रयाः, गाम्भीर्यगुणाश्रयाश्च;

विदुषां धनुषां चापि गुणसंघटितात्मनाम् ।
बलादवनतिर्मा(र्ह ?)न्यादरीणां सम्पदं पराम् ॥ २० ॥

सदोषधीभिराकाङ्क्षयस्तेजसे तामसोदयः ।
तत्प्रकाशः कथं भूयाज्जातो(ते) सत्कर्मसाक्षिणी(णि) ॥ २१ ॥

यत्करा पुष्कराद्या:(ढ्याः ?) स्युः साधुचक्रोपकारिणः ।
तस्योदयात्प्रसीदेयुः सदाशान्ता(:) प्रभावतः ॥ २२ ॥

साधुपक्षप्रतिक्षेपात् पततां गतिमीयुषाम् ।
कश्चिद्धर्मगुणोत्कर्षाद्ध्रुवं कुर्यात्पलायनम् ॥ २३ ॥

शङ्खचक्रधरं(रः) कश्चिद्दानवद्वेषवैभवात् ।
अहीनभोगमासाद्य मोदते क्षमया श्रिया ॥ २४ ॥

अप्रगम्या उभावपि अगाधत्वाद्भयङ्करत्वाच्च अनुपसर्प्यौ; यथोक्तम् 'अधृष्यश्चाभिगम्यश्च 'यादोरत्नैरिवार्णवः' इति; घनेभ्यो मेघेभ्यः, जनसमूहेभ्यः; जीवनं जलं, जीवयात्रा च ॥

२०. उभयपक्षेऽपि स्पष्टोऽर्थः ॥

२१. स-दोष-धीभिः दुष्टबुद्धिभिः; अन्यत्र सतीभिरोषधीभिः; तेजसे स्वज्वलनार्थमाकाङ्क्षयः, चन्द्रः । तामसोदयः तामसजनमध्ये लब्धाभ्युदयः, तमोमय्यां रात्र्यामुदितश्च । सत्कर्मणां साक्षिणि साधौ जाते सति, कर्मसाक्षिणि सूर्ये अभ्युदिते सति ॥

२२. कराः अंशवः, हस्ताश्च; पुष्कराढ्याः विकासितपद्माढ्याः, सामुद्रिकलक्षणभूतपद्मरेखाढ्या हस्तपक्षे; साधु सम्यक् चक्राणां तदाह्वानां पक्षिणामुपकारिणः, साधुमण्डलोपकारिणश्च। सद्-आशा-अन्ता इति च्छेदः शोभना दिगन्ता इत्यर्थः, अन्यत्र सदा शान्ताः शान्तान्तरङ्गाः । एवं साधुसूर्ययोः श्लेषः ॥

२३. साधुपक्षस्य साधूनां प्रतिक्षेपात् धिक्करणात् पततां पातित्यदोषजुषां गतिमीयुषां पापिनां मध्ये कश्चित् धर्मगुणोत्कर्षात् कस्यापि स्वस्मिन् धर्मलेशस्य गुणोत्कर्षात् ध्रुवं पलायनं, रलयोरभेदात् परायणं श्रेष्ठां गतिं कुर्यात्, यायात् । बाणपक्षे साधु सम्यक् पक्षाणां स्वस्यूतानां पत्राणां प्रतिक्षेपात् पततां पक्षिणां गतिमीयुषां बाणानां मध्ये कश्चिद् बाणः धर्मस्य धनुषः गुणोत्कर्षाज् ज्याकर्षवेगात्पलायनं वेगेन गमनं कुर्यात् ॥

२४. कश्चिद् विष्णुः शङ्खचक्रधरः अहि-पति-भोगे शयानः, दानवहन्ता, क्षमया

गुणानुषङ्गान्मुक्तानां पुरुषाभ्युदयस्पृशाम् ।
सन्मणिर्मध्यमभ्यस्यन् भविता तरलो न किम् ॥ २५ ॥

यस्यानन्तपदस्फूर्ति(:) घिषणाधिक्यदायिनी ।
स दानवरसामोदि(दी) भविता कवितावशात् ॥ २६ ॥

नाभिभूतः कुतोऽप्येकः काञ्चनश्रियमाश्रयन् ।
सानुगानां सुमनसामाशु स्वास्थ्यं विधास्यति ॥ २७ ॥

जगत्प्राणप्रदाः केचित् सुजना न्य(व्य)जनायिताः ।
रसानुषङ्गमासाद्य सद्यस्तापं हरन्ति ये ॥ २८ ॥

भूम्या श्रिया लक्ष्म्या च सहितः मोदते । अन्यत्र शङ्खं चक्रं च सामुद्रिकलक्षणभूतं दधत्, क्षमया क्षान्त्या श्रिया संपदा अहीनमनल्पं भोगम्; दानवद् दानसहितम्; वेषवैभवाद् उज्ज्वलवस्त्राभरणादिवैभवात् ॥

२५. तरलो हारमध्यस्थो मणिः; तत्पक्षे पुरुषाणां तद्धारिणां, श्रेयःप्रदानां मुक्ताफलानां गुणानुषङ्गाद् एकसूत्रस्यूततया सम्बन्धात् । अन्यत्र सन्मणिः साधुश्रेष्ठः; पुरुषस्य आत्मभूतस्य साक्षात्कारशालिनां मुक्तानां मुक्तिभाजां महात्मनां मध्यं गोष्ठीमभ्यस्यन् तद्गुणानुषङ्गात्तरलान्तरङ्गो न भवेत् किम् ? अवश्यं भवत्येव ॥

२६. अनन्ता पदानां काव्योपयोगिनां स्फूर्तिः; धिषणा बुद्धिः, धिषणो बृहस्पतिः; बुद्धिप्रकर्षदायिनी, देवगुरोरुपरि उत्कर्षदायिनी च । कविता काव्यक्रिया, कवेः भार्गवस्य भावः; सदा नव-रस-आमोदी काव्यपक्षे; शुक्रपक्षे स दानवरसामोदी असुरानन्दनो भवति॥

२७. नाभिभूतः, परेण न अभिभूतः, नाभि-भूतः केन्द्रभूतश्च; नाभिभूतो हि मेरुपर्वतः । काञ्चनश्रियम् कामपि श्रियं सुवर्णश्रियं च; स-अनुगानां, सानु-गानामिति च च्छेदः; सुमनसः पुष्पाणि, साधवः, देवाश्च; स्वास्थ्यं शोभनां स्थितिं, स्वर्गे वर्तमानत्वं च; कुतोऽपि इत्यत्रापि यतः कुतश्चित्, कु-तो भूमित इति श्लेषः संभाव्यते ।

२८. जगत्प्राणो वायुः; रसानुषङ्गं रासिक्यं, जलार्द्रतां च । अनेनाशयेन प्राचीनं सुभाषितं वरीवर्तीदम्-'सुजनं व्यजनं मन्ये चारुवंशसमुद्भवम् । आत्मानं च परिभ्राम्य परतापनिवारणम् ॥'

अपारिजातं स्वस्थानमवस्थाप्य धृतव्रता:(त:) ।
सर्वानुकूल्यमासाद्य साधयेत्स दृढोदयम् ॥ २९ ॥

अप्यु(उर्व्यु)त्पन्न:(न्ना) प्रिय: कश्चिदपि पुण्यजनान् द्विषन् ।
श्रियापि युक्त: क्लिश्येत यद्यपि स्याज्जगत्प्रभु: ॥ ३० ॥

अपि वृद्धश्रवा: कश्चिदवाप्य स्वर्णदीनताम् ।
अपूर्वसौमनस्येन भवेदाश्रितनन्दन: ॥ ३१ ॥

सुवर्णवृत्तिमासाद्य कश्चिदालोकवैभवात् ।
सुदृशां हृदयारूढश्शोभते यदि सन्मणि: ॥ ३२ ॥

प्रत्यर्थिदानपारीणा: प्राप्तधाराश्च सङ्गरे ।
मुक्तकोशतया कुर्युरनुरक्तानपि द्विष: ॥ ३३ ॥

---

२९. महापुरुषस्य भगवत: कृष्णस्य च श्लेष: । स्वस्थानं स्वर्गं, निजं स्थानं च; अ - पारिजातं पारिजातापहरणेन तद्वृक्षशून्यम्, अप-अरि-जातं शत्रुहीनं च ॥

३०. क्लेशभाजो रामस्य कस्यापि प्रभोश्च श्लेष: । उर्व्यां भूम्यामुत्पन्ना प्रिया सीता यस्य स:, जगति जाता जना अप्रिया यस्य च ; पुण्यजना यातुधाना:, पुण्यकृतो जनाश्च; श्रिया लक्ष्म्या सीतारूपया, संपदा च ; जगत्प्रभु: लोकनाथो भगवान् , राजादिकश्च ॥

३१. इन्द्रस्य पुरुषविशेषस्य च श्लेष: । वृद्धश्रवा इन्द्र:, प्रख्यातश्च ; स्वर्णदी-इनतां देवगङ्गाधिपत्यं, स्वर्ण-दीनतां धनक्षयं च; पूर्वसुमनस: पूर्वदेवा दैत्या:, ते न भवन्ति इति अपूर्वसुमनस:, तद्भावेन, अन्यत्र असाधारणसौम्यस्वभावेन ; आश्रितं नन्दनाख्यं देवोद्यानं येन, आश्रितानां नन्दनश्च ॥

३२. रत्नसाध्वो: श्लेष: । मणिपक्षे सुवर्णवृत्ति: हेम्नि घटितत्वम् ; आलोक: प्रकाश: ; सुदृश: स्त्रिय: ; सन्मणि: साधुश्रेष्ठ:, तत्पक्षे सु - वर्ण - वृत्ति: शोभनाक्षरभाषणस्वभाव:, अथवा स्ववर्णोचिताचारवर्तनम् ; आलोको ज्ञानम् ; सुदृश: सुधिय: ॥

३३. खड्गस्य दानशीलस्य च श्लेष: । प्रत्यर्थिन: शत्रव:, प्रत्येकमर्थिनो याचका: ; दानम् अवखण्डनं, द्रव्यवितरणं च ; धारा खड्गस्य शितो भाग:, दाने वारिधारा

कठिनाः कञ्जनाः केचित् कूल(कुच ?)वन्मलिनैर्मुखैः ।
सुदृशामान्तरं सत्त्वं सत्यं व्यक्तं वितन्वते ॥ ३४ ॥

जडाशयास्तत:(?) केचित्प्रसन्नाश्च घनात्यये ।
कीर्तिनाशाद् भविष्यन्ति शुचिना के न भङ्गुराः ॥ ३५ ॥

श्लक्ष्णं(ण) - तीक्ष्णमुखः कश्चिद्द्रुमा(च्छिद्रा)(ना)च्छादयन् शनैः ।
गुणिनामुपकाराय जाय[न्]ते गुणवत्तया ॥ ३६ ॥

गुणिनः पार्थिवाः केचित्पात्रीभूता अपि स्वतः ।
गुणनाशात्पतिष्यन्ति मध्ये लब्ध्वापि जीवनम् ॥ ३७ ॥

यस्सतां मार्गमाक्रम्य गर्जति द्राग्जडोदयः ।
अप्रदानेन मालिन्यमसौ हि महदश्नुते ॥ ३८ ॥

च ; सङ्गरः रणः, वाक्प्रतिज्ञा च ; मुक्तः कोशः खड्गाधारः, धनसञ्चयश्च, येन सः ; अनु-रक्तान् खड्गपातेन अनुषक्तरुधिरान्, अनुरागिणश्च ॥

३४. कठिना दृढाः ; कञ्जनाः कामजनकाः ; मलिनैर्मुखैः, कुचपक्षे चूचुकरूपैः ; सुदृशां स्त्रीणाम् ; आन्तरमन्तःस्थं सत्त्वं गर्भं व्यञ्जयन्ति ; गर्भिण्याः कुचः कठिनो भवति, चूचुके च नैल्याधिक्यं भवति । अर्थान्तरे कञ्जनाः पक्षिविशेषाः, अन्यच्च स्पष्टम् ॥

३५. जडाशया मूर्खाः, तडाकाश्च ; घनात्यये शरदि, महति कष्टे च ; कीर्तिः यशः कर्दमश्च ; शुचिनाकेन शुद्धेन आकाशेन, प्रवर्धमानेन सूर्यातपेनेत्यर्थः ; अन्यत्र शुचिना के न इति च्छेदः ; शुचिना शुद्धेन पुरुषेण हेतुना भङ्गुराः भङ्गं प्रापिताः । तत इति अजागलायितः शब्दः, तत्र अशुद्धिः स्यात् ॥

३६. गुणिनः सूच्याश्च श्लेषः । श्लक्ष्ण-तीक्ष्णमुखाः शोभनपटुवदनाः; सूची-पक्षेऽर्थः स्पष्टः; गुणः सौशील्यादिः, तन्तुश्च ॥

३७. घट - राजयोः श्लेषः । गुणिनः आकर्षरज्जुसहिताः ; पार्थिवाः मृन्मयाः, राजानश्च; पात्रीभूताः सत्पात्रभूताः, घटादिपात्रभूताश्च ; गुणनाशात् रज्जुच्छेदात् ; जीवनं जलं, जीवयात्रा च ॥

३८. सन्मार्गमाकाशं साधुसेवितं मार्गं च ; जडोदयः मेघः, जडो अदयः अकरुणो नरः ; अप्रदानेन अप्-प्रदानेन वर्षेण, अ-प्रदानेन अदानेन ; मालिन्यं कालिमानं अयशश्च ॥

भोगिनस्त्यागिनश्चापि जगत्प्राणैकजीवनाः ।
घनात्(घन)त्रासमुपेत्यापि न त्यजन्ति कुलीनताम् ॥ ३९ ॥

दृढबन्धगुणोऽप्येकः प्रजल्पन्मुक्तमार्गणः ।
परेषामसुहृद्भावं प्राप्य कौटिल्यमश्नुते ॥ ४० ॥

मित्रविद्वेषदोषेण कश्चित्प्राप्य कलङ्किताम् ।
कलासु क्षीयमाणासु रौरवीं गतिमश्नुते ॥ ४१ ॥

पात्रनिष्पादितस्नेहः प्राप्य तेजस्विनीं दशाम् ।
तामसत्रासदः कश्चिदेधते कुलदीपकः ॥ ४२ ॥

अप्रगल्भगतिः कश्चिदार्तिभारं भुवो वहन् ।
अन्तर्लीनमुखो नित्यमधोमुख(धोक्षज ?)मुपाश्नुते ॥ ४३ ॥

---

३९. भोगिनः सर्पाः, त्यागिनो वदान्याः, पूर्वे जगत्प्राणस्य वायोर्भक्षणेणैव जीवन्तः, परे लोकोज्जीवनार्थमेव जीवन्तः ; घनात् मेघात् त्रासः, घनो निबिडः त्रासश्च ; कु-लीनतां भू-विवरान्तर्लीनतां, कुलीन-ताम् आभिजात्यं च ॥

४०. धनुषः असाधोश्च श्लेषः । दृढं बद्धो गुणो ज्या, दृढबन्धः अनौदार्याद् दृढमुष्टिबन्धः यस्य सः कदर्यः ; मुक्तः त्यक्तः, द्रावितश्च ; मार्गणो बाणः, अर्थिजनश्च ; असु-हृद्-भावं जीवितहरणम्, अ-सुहृद्-भावं अमित्रत्वं च ; कौटिल्यं कुटिलतां, वक्रिमाणं च ; प्रजल्पन् ज्याकर्षेण नदन्, अन्यत्र बहुनिन्दादि कुर्वन् याचकद्रावणर्थम् ।

४१. मित्रः सूर्यः, मित्रं सुहृच्च ; कलङ्किता चिह्नाङ्कितत्वं, दोषवत्त्वं च ; रौरवीं गतिं नरकगतिम् ; चन्द्रपक्षे रुरुर्मृगः अङ्कभूतः तन्मात्रशेषा गतिः रौरवी गतिः ॥

४२. पात्रं सत्पात्रं, तैलाधारभूतं पात्रं च ; स्नेहः मैत्री, तैलं च ; दशां वर्त्तिम्, अवस्थां च ; तामसाः तमोगुणवन्तः, तमस्समूहश्च ; कुलदीपकः कुलोद्द्योतकः पुत्रः, गृहगतो दीपश्च ॥

४३. आदिशेषस्य अप्रगल्भस्य नृपस्य च श्लेषः । उरगत्वात् पूर्वोऽप्रगल्भगतिः ; भुव आर्तिभार उभयत्रापि समः । अन्तर्लीनमुखत्वं पूर्वस्य भारहेतोः अपरस्य तत्तत्करणाशक्त्या चिन्तया च ; अधोक्षजं शेषपक्षे विष्णुम् ; पक्षान्तरे अधो नीचमक्षजमिन्द्रियसुखम् ॥

मलिनाः कतिचिल्लोकलोचनालोकभू(दू?)षकाः ।
अन्तश्चपलतां प्राप्य भीषयन्ति शुचा(ची)न् द्विजान् ॥ ४४ ॥

अपि रक्तकराः केचित् कुतोव्या(ऽप्या)हृत्य जीवनम् ।
निर्धूतरजसः कुर्युरलीनादानतोषितान् ॥ ४५ ॥

सुमनोधर्मविद्वेषमुद्वहन् कोऽपि कोपनः ।
राजमूर्धन्यतां प्राप्याप्यहो भिक्षामपेक्षते ॥ ४६ ॥

सन्ति धाराश्च शूराश्च परस्यारब्धविभ्रमाः ।
सुहृत्त्वमसुहृत्त्वं च किन्तु वैधर्म्यमेतयोः ॥ ४७ ॥

पृष्ठतः कुर्वती स्नेहमुष्णतां पुष्यती मुखे ।
दुर्दशापि शुचेरेषा तामसत्वं समावहेत् ॥ ४८ ॥

किंशुकोऽयमिति ख्यातः कश्चिदुन्निद्रशाखिषु ।
सुमनस्स्वात्मनिष्ठेषु विनयादनुरज्यते ॥ ४९ ॥

---

४४. लालायाः तद्विशिष्टजिह्वाया वा खलजनेन श्लेषः । द्विजान् दन्तान् ब्राह्मणांश्च ॥

४५. गजानां नृपाणामथवा महापुरुषाणां च श्लेषः । रक्तकराः; गजानां शुण्डादण्डान्तः शोणिमा दृश्यते ; पक्षान्तरे रक्तः युद्धे रुधिरेण रक्तः करो येषाम् ; अथवा अनुरक्तैरन्यैः प्रजाभिर्वा दत्तः करो येषाम् ; जीवनं जलं जीवितोपायभूतं द्रव्यम् ; रजः पांसुः, रजोगुणश्च ; अलीन् भृङ्गान्, अरींश्च ; आ समन्ताद् दानं मदजलं द्रव्योत्सर्गश्च ; आदानं स्वपक्षसङ्ग्रहश्च ॥

४६. रुद्रस्य कस्यापि गुणहीनस्य राज्ञश्च श्लेषः । सुमना धर्मवित्; तयोर्द्वेषमुद्वहन्, अथवा सुमनसां धर्मस्य च विद्वेषी ; रुद्रपक्षे अलौकिकं वेषं बिभ्रत् ; कोपनः रुद्रः; राजमूर्धन्यश्चन्द्रमौलिः, राजश्रेष्ठश्च ; भिक्षामपेक्षते कपालिलीलां करोति, अन्यत्र दारिद्र्यमनुभवति ॥

४७. धारा वर्षाधाराः ; परस्य सुहृत्त्वं धाराणाम् ; परस्य असु-हृत्त्वं प्राणहारित्वं शूराणाम् ॥

४८. शुचेः ग्रीष्मस्य, कस्यापि शुद्धस्य पुरुषस्य दुर्दशामापन्नस्य च श्लेषः ; स्पष्टोऽर्थः ॥

४९. शुक-किंशुकयोः श्लेषः । शुकश्च न केवलं पक्षिविशेषः, किन्तु व्यासपुत्रः

दुष्प्रधानाव(श्च) धानाश्च(श्च) धृ(दृ)ढदण्डहता अपि ।
अन्तःप्रविश्य बाधन्ते परिपाकदशावशात् ॥ ५० ॥

अन्तर्हितजडाः केचिज्जायस्थाः(?) कर्दमा इव ।
मान(नून ?)मेकपदे हिंस्युरपि सन्मार्गमाश्रितान् ॥ ५१ ॥

धनलुब्धाश्च वृद्धाश्च पतितद्विजतां गताः ।
भ्रष्टवर्णमुखाः केचित् परिहासपदं नृणाम् ॥ ५२ ॥

निष्कनिष्ठतया केचिदनुयुज्य(ञ्जद)नामिकाः ।
अरत्निवत्कचिन्न्यस्ताः गणनायैव केवलम् ॥ ५३ ॥

सन्त्युलूकाश्च लोकाश्च सूर्यालोकासहिष्णवः ।
परभृत्पादघातेन भग्नदर्पाः पतन्ति ते ॥ ५४ ॥

ऋषिश्च । किंशुको नाम वृक्षः ; उन्निद्रेषु फुल्लेषु द्रुमेषु मध्ये स्वात्मनिष्ठेषु सुमनस्सु विनयात् स्वस्मिन् पुष्पितानां कुसुमानां संघातेन नतः अनुरज्यते रक्तवर्णो भासते । शुकः पक्षी तस्मिन् वृक्षे, वि-नयात् पक्षिस्वभावादनुरज्यते अनुरक्तो भवति । शुको नाम ऋषिः उन्निद्रशाखिषु अधीत - वेदेषु आत्मनिष्ठेषु अन्तर्मुखेषु सुमनस्सु सूरिषु विनयात् नम्रतया अनुरज्यते ॥

५०. दुष्प्रधानाः तादृशा नराः ; धाना भृष्टाः पृथुकतण्डुलाः ; भुक्तास्ते न शीघ्रं जीर्णतां यान्ति ; दृढं दण्डेन हताः तण्डुलाः धाना भवन्ति ; अन्यत्र दण्डोऽपराधार्थे प्रयुक्तः ॥

५१. जडं जलं, जडो मूर्खः, एकपदे सद्यः, एकस्मिन् पदविन्यासे ; सन्मार्गः शोभनः पन्थाः, न्याय्यमाचरणं च । जायस्था इति पदस्यार्थ उभयपक्षेऽप्यस्पष्टः ; दुष्टः पाठः स्यात् ॥

५२. द्विजो ब्राह्मणः, दन्तश्च । भ्रष्टवर्णमुखाः मुखभूत-ब्राह्मणवर्णतो भ्रष्टाः ; अन्यत्र नष्टमुखरागाः ॥

५३. निष्क-निष्ठाः धनमात्रप्रधानाः, निष्कनिष्ठा निर्गतकनिष्ठिकाङ्गुलयश्च ; अनु-युञ्जन्तः अनामिकाः अप्रख्याताः पुरुषाः येषां ते ; अनुषक्त-अनामिकाख्याङ्गुलयश्च । अरत्निः मानार्थं प्रसृताङ्गुष्ठकनिष्ठिको हस्तः ; रत्निः पूर्णं हस्तमानं, तन्न भवतीति अरत्निः ; रत्नयो राजसंमानग्रहणार्हाः केचित्प्रधानपुरुषाः, ते न भवन्तीति अरत्नयः ; गणनायैव, परिगणनार्थमेव ; एतेऽपि केवलं नरा इति पुरुषकोटिप्रवेशमात्रयोग्यतायै च ॥

५४. सूर्यालोकः आदित्यस्य प्रकाशः ; सूरीणां बुधानामालोको दर्शनम् ; परभृतः

नीचानुसारिणः केचित् निःस्निग्धनिमिषान् व(ब)हून् ।
भूरि जालं वितत्याशु भुवनं दूषयन्ति ते ॥ ५५ ॥

उन्मिषद्दानवलयः श्रीमानप्युज्झितक्षमः ।
विभीषणप्रियो भूयादलंकापुरुषाश्रयः ॥ ५६ ॥

सहस्रकरजातोऽपि दक्षिणाशावशंप(व)दः ।
पापिनां स्थानमासाद्य भविता धर्मरूपधृत् ॥ ५७ ॥

रसोल्लासमुपेत्यापि राजविद्वेषदूषिताः ।
भग्नकोशा भवन्त्याशु भास्वदभ्युदयोन्मुखाः ॥ ५८ ॥

कोकिलपोषकाः काकाः, भृत्याश्च; काकानामुलूकानां च वैरं प्रसिद्धम् ; लोका गुणहीना मूढप्रभवाः; भृत्यैरपि अवमतास्ते पतन्ति स्थानाच्च्यवन्ते ॥

५५. कैवर्तकानामसाधूनां च श्लेषः। नीचानुसारिणः अधमपुरुषानुगामिनः, निम्नगामिनश्च, निःस्निग्धनिमिषान् निर्निमेषान् मत्स्यान्, स्नेहरहितं कालम् ; जालं वितत्य मत्स्यग्राहकं जालं प्रसार्य ; अन्यत्र जालं वाग्विस्तारं कृत्वा ; भुवनं जलं, लोकं च ॥

५६. श्रीमानपि ; उन्मिषन् दानस्य वलयः चक्रं यस्य सः, अनुस्यूतं दानमित्यर्थः, वितरणशीलोऽपीति यावत् ; उज्झिता क्षमा क्षान्तिर्येन सः, कापुरुषाणामलमाश्रयः, तादृशः पुरुषः केवलं विशेषेण भीषणानां भयदानां क्रूराणां जनानां प्रियो भवति । अन्यत्र श्रीरामविषये कृतो दानवानां लयो येन, श्रीमान् लक्ष्मीरूपसीतायुक्तः, उज्झितक्षमः त्यक्तराज्यः, विभीषणस्य रावणभ्रातुः प्रियः, अ-लङ्का-पुरुषाश्रयः लङ्कावासिनां राक्षसानामनाश्रयः तन्नाशकः ॥

५७. सहस्रकरजातः सूर्यपुत्रो यमः ; दक्षिणदिक्पालकः ; पापिनां स्थानं नरकलोकः, धर्मरूपधृद् धर्मराजः। अन्यत्र कार्तवीर्यार्जुनपरतया नेयः श्लोकः ; सहस्रबाहुसमूहसंपन्नो गवादिद्रव्यप्रतिग्रहेच्छावशंवदस्सन् महर्षिरूपसाधुहिंसात्मकं पापं कृत्वा भविता अधर्मरूपधृद् अधर्मिष्ठो भविष्यति ॥

५८. पद्मविषयकोऽर्थ एकः - तत्र रसः जलम् ; राजा चन्द्रः; भग्नकोशा उत्फुल्लाः त्यक्तकुड्मलभावाः भास्वदुदयोन्मुखाश्च । अन्यत्र रसः, तत्तदनुभवः, राजा नृपतिः, तद्विरोधदूषिताः भग्नकोशाः नष्टधनास्सन्तः, यद्यपि ते भास्वर-अभ्युदयशालिनः, अथवा पुनश्च तादृशमभ्युदयं प्रतिपालयन्तस्तिष्ठन्ति ॥

अपापाः कतिचिद्भूपाः कूपा इव घनोदये: ।
भूरि जीवनसम्पूर्णाः तृष्णां पुष्णन्त्युपेयुषाम् ॥ ५९ ॥

ग्रामि(म)णीभिर्मणीभिश्च कूलाणोल्कास(कुलीनोल्लास ?)शालिभिः ।
त्रासदोषानुषङ्गेण प्राप्यतेऽन्यैः पराभवम्(वः) ॥ ६० ॥

युञ्छि(उञ्छ ?)दानां सदा मूर्ध्नि धृतानामपि शालिभिः ।
हरितत्वगुणत्यागादाविरासीदधोगतिः ॥ ६१ ॥

कवीनां कीर्तिमाश्रित्य कोशमाशु वितन्वताम् ।
नालि(ली)कानां क्षणाल्लक्ष्मीः निशान्तेऽपि महीयते ॥ ६२ ॥

परेषां कलहेनैव पूरयन्त्यु(त्य)युदकं(रं)हि ये(यः) ।
महतीं भूतिमासाद्याप्यसौ न स्थास्यति क्वचित् ॥ ६३ ॥

---

५९. घनो मेघः सान्द्रश्च, जीवनं जलं, जीवनोपायाः ; तृष्णां जलपानेच्छां धनाभिलाषं च, अपापा इत्यस्य कूपपक्षे मेघवृष्टेः पूर्वम् अपगताः आपः येभ्यस्ते अपापाः जलहीनाः, भूपपक्षे अपापाः पुण्यशीलाः ॥

६०. ग्रामणीर्नेता, मणिः रत्नमेतयोः श्लेषः । श्लोकस्य द्वितीयपादस्य अशुद्धः पाठः ; त्रासः भयं, मणेर्दोषश्च ॥

६१. उञ्छदानामिति प्रथमं पदं स्यात् ; उञ्छयोग्यपक्वधान्यप्रदानाम् ; अन्यत्र उञ्छवृत्तिप्रदानां दानशीलानामित्यर्थः स्यात् । शालिभिः धान्यप्ररोहैः, सुशीलैश्च ; हरितत्वं हरितवर्णः, तद्गुणत्यागिनां फलत्वपरिणामेन पिशङ्गतां गतानाम् ; हरितत्त्वगुणः भगवन्माहात्म्यगुणः, तत्त्यागिनां भक्तिहीनानाम् ; अधोगतिः भूमौ पतनम् , अश्रेयश्च ॥

६२. कवीनां जलचारिणां पक्षिणाम्, कीर्त्तिं गानं कण्ठनादमित्यर्थः, कोशं मुकुलभावमाशु वितन्वतां विस्तारयतां, त्यजतामित्यर्थः ; नालीकानां पद्मानां लक्ष्मीः, निशान्ते उषसि । अन्यत्र कवीनां काव्यैः गीतां कीर्त्तिं स्वयशः आश्रित्य हेतुं कृत्वा कोशं धनं तेभ्यो वितन्वतां वितरतां न अलीकानां सत्यवतां सत्पुरुषाणां लक्ष्मीः निशान्ते तद्गृहेऽपि महीयते ॥

६३ कलहेन जीवतः पुरुषस्य 'कलहप्रियः' इति प्रसिद्धिं गतस्य नारदस्य च श्लेषः ; महतीं भूतिं परां समृद्धिम् । नारदपक्षे महतीं तन्नाम्नीं वीणाम् , ऐश्वर्यमनुपहतगतिरूपम् ; न क्वचित् स्थास्यति सततसञ्चरणशीलत्वात् ॥

उर्वीं सर्वामुपेत्यापि यद्युपैति द्विजिह(जिह्व)ताम् ।
भना(भग्न, भुग्न ?) भोगस्य तस्याशु भूयान्मूर्ध(र्धा)सहस्रधा ॥ ६४ ॥

मुद्गराणां खराणां च प्रतिदूषितवर्मणाम् ।
छायानुषङ्गमात्रेण जायते श्रेयसां क्षयः ॥ ६५ ॥

अपि कश्चित्तमोमूर्तिरधिरुह्य सतां पदम् ।
द्विजेन्द्रमण्डलग्रासाज्जगतांध्याय(गदान्ध्याय) कल्पते ॥ ६६ ॥

विप्रयोगिद्विषः केचित् सर्वदारुणदृष्टयः ।
जातिहीनेन केनापि जायते(न्ते) जाति(त)विभ्रमाः ॥ ६७ ॥

शुचेर्दोषानुषङ्गेऽपि सूर्य(र्या)लोकोज्ज्वलात्मनः ।
परं तेजस्थि(स्वि)ता भूयात् पात्रस्नेहदशावशात् ॥ ६८ ॥

---

६४. आदिशेषपक्षे उर्वीं सर्वामुपेत्यापि सर्वभूभारमूढ्वापि, द्विजिह्वतां सर्पताम्, भग्नः अथवा भुग्नः भोगः शरीरं यस्य, मूर्धा सहस्रधा भूयात् सहस्रफणत्वादेवमुक्तिः। अन्यत्र सर्वामुर्वीं वशीकृत्यापि यदि द्विजिह्वतां पिशुनतामुपैति तदा तस्य भग्नः अथवा भुग्नः खण्डितो भोगः सुखादिभोगो यस्य ; मूर्धा सहस्रधा छिन्नो भूयात्; अतीव व्यथाकुलो भवेदित्यर्थः ॥

६५. मुद्गरपक्षे वर्म कवचं, यस्योपरि युद्धे मुद्गरपातो भवति ; छाया मुद्गरपक्षे कान्तिः, खरः रासभः, तत्पक्षे अमङ्गलभूता तच्छरीरच्छाया ॥

६६. राहोः दुष्टस्य च श्लेषः। तमोमूर्तिः राहुः, अन्यत्र तमोगुणस्वरूपः; सतां पदमाकाशं, साधूनां स्थानं च ; द्विजेन्द्रमण्डलं चन्द्रबिम्बम्, ब्राह्मणसमूहश्च ; जगदान्ध्याय आलोकह्रासाय, तमोऽभिभवाय च ॥

६७. विप्राणां योगिनां च द्विषः ; सर्व - दारुण - दृष्टयः, केनापि जातिहीनेन अधमेन राजादिना जातविभ्रमाः त्यक्तस्वगेहाः जीविकार्थं तत्र तत्र भ्रमणशीला भवन्ति। अन्यत्र कोकिलविषयतया व्याख्येयः श्लोकः। विप्रयोगिनां विरहिणां यूनां द्विषः, सर्वदा अरुणदृष्टयः, जातिहीनेन केनापि पक्षिषु अधमेन काकेन जातविभ्रमाः वर्णसाम्यात्काकत्वेन सन्दिह्यमानाः ; बाल्ये काकपोषितत्वेन काका इमे इति सन्देहास्पदभूता हि कोकिला भवन्ति ॥

६८. शुचेर्दीपगतस्याग्नेः, दोषानुषङ्गे रात्रिसमागमे ; दिनान्ते सविता हुताशने स्वतेजो निदधाति इति प्रसिद्धिः ; पात्रं, स्नेहः, दशा वर्तिः, एतानि दीपाङ्गानि। अन्यत्र शुचिः शुद्धः

आत्मचक्रमपि क्षीणः निर्मलोल्लसितैः करैः ।
यो बिभर्त्युदयं प्राप्य स सत्यं लोकबान्धवः ॥ ६९ ॥
करसंग्रहणव्यग्राः ब(ख?)लाश्च मुसला अपि ।
दारुणा निर्मिताः केन सर्वधान्योपघातिनः ॥ ७० ॥
जडध्युपचयं कुर्वन् जायते यः कळङ्कवत्(वान्) ।
सर्वक्रमाद्विमुच्येत सोऽयं सकलया श्रिया ॥ ७१ ॥
महीपालाश्च सालाश्च बहुपत्ररता अपि ।
जडानुषङ्गाद् भ्रंश(भ्रश्य)न्ति भग्नमूलह(ब)लाश्शनैः ॥ ७२ ॥
अनुरक्तमुखोऽप्येकः प्राप्य राजकुलं शनैः ।
पक्षपातानुषङ्गेण फलभङ्गाय जायते ॥ ७३ ॥

पुरुषः; दोषः यः कोऽपि दोषः; सूरीणामालोकः ज्ञानवतां दर्शनं तत्संपर्कः; पात्रं सत्पात्रं; स्नेहः मैत्री, एतयोर्दशा अवस्थाविशेषः ॥

६९. सूर्यस्य महापुरुषस्य च श्लेषः। सूर्यश्चक्रभ्रममारोप्य त्वष्ट्रा उल्लिखितमूर्तित्वेन क्षीणतां प्रापित इति प्रसिद्धिः; लोकबान्धव इति सूर्यस्य नाम; अन्यत्र आत्मचक्रं स्वबन्ध्वादि क्षीणस्सन् पुनरुदयं प्राप्तो यो बिभर्ति, करैर्दानैः, लोकबान्धवः लोकस्य बन्धुभूतः ॥

७०. मुसलाः करैर्गृहीताः दारुणा काष्ठेन निर्मिताः सर्वेषां धान्यानामुपघातायोपयुज्यन्ते; खलाः जनेभ्यो हठाद् द्रव्यादिकं गृह्णीयुः; परपीडार्थं च तान् करे गृह्णीयुः; दारुणा घोराः, सर्वधा सर्वथा अन्योपघातिनः परपीडाकराः। कविरेष आन्ध्रदेशीयः, आन्ध्राः 'थ'-कारं 'ध'-कारमुच्चारयन्तीति प्रसिद्धमेव ॥

७१. जडधिः जलधिः, तदुपचयं चन्द्रः करोति, स कलङ्की च भवति; अन्यत्र जडधीनां जडबुद्धीनां वृद्धिकरः पोषकः, कलङ्कवान् दोषवान् कश्चित्, सकलया श्रिया सर्वकलायोगे प्राप्तया कान्त्या, सर्वक्रमाद् रलयोरभेदात् सर्वक्लमात् सर्वश्रमात् विमुच्येत, स्वस्थो राजेत; अन्यत्र संपूर्णविभवप्राप्त्या सर्वक्रमात् तत्तत्कर्तव्यक्रमाद् विमुच्येत, यथेच्छचारी भवेत् ॥

७२. सालाः तदाख्या वृक्षाः, पत्राणि दलानि, नृपपक्षे पत्राणि राजशासनलेखाः, जडं जलं, जडा मूर्खाः, मूलबलं सैन्ये मुख्यो भागः; वृक्षपक्षे मूलानां बलम् ॥

७३. अनुरक्तमुखः राजनि व्यक्तानुरागः, राजकुलं प्रासादम्, पक्षपातः राज्ञस्तस्मिन् प्रकटपक्षपातप्रदर्शनेन तत्रत्येषु वैरबुद्धिं जनयन् स्वोन्नतिरूपात् फलात् च्यवते। अन्यत्र बाणः

राजदोषाभिभूतानां सत्यं सुमनसां गणः ।
उन्निद्रां श्रियमाप्नोति भास्वतः कस्यचिद् बलात् ॥ ७४ ॥

अहीनजननो यस्य भोगो मद(न्द)रसानुगः ।
सत्यमासेव्यते सोऽयं विबुधैरमृतार्थिभिः ॥ ७५ ॥

उत्तमस्थितिविध्वंसात् उग्रमुष्म(मूर्ध)न्यतां गतः ।
चक्रधिक्करणाद्राजा जायते विकलोदयः ॥ ७६ ॥

सर्वदानाय सन्नद्धाः सदा तीर्थानुसारिणः ।
जडाशयोपमर्दाय जायन्ते केऽपि धीवराः ॥ ७७ ॥

शत्रुभूतं राजकुलं प्रति प्रयुक्तः, रक्तेन रुधिरेण दिग्धाग्रः, पक्षाणां तत्स्यूतानां पातेन भ्रंशेन फलभङ्गाय अग्रभागभङ्गाय कल्पन्ते। शस्त्राग्रभागः फलमुच्यते ॥

७४. राजदोषः चन्द्ररूपदोषः, तेन मुकुलितानां सुमनसां पद्मरूपकुसुमानां गणः; भास्वतः सूर्यस्य बलाद् उन्निद्रां त्यक्तमुकुलभावां श्रियं शोभाम् । अन्यत्र सुमनसो विद्वांसः, यद्यपि राजा अननुकूलः तथापि आस्थाने वर्तमानस्य कस्यापि भास्वतः तेजस्विनो मन्त्र्यादेः पुरुषकारेण महतीं श्रियं प्राप्नुवन्ति ॥

७५. यस्य दामभूतो भोगः शरीरम् अहीनजननो वासुकिरूपसर्पराजीयो भवति, मन्दर - सानुगः मन्थभूत - मन्दरपर्वतप्रस्थगतः, विबुधैर्देवैः अमृतार्थिभिः सुधाभिलाषेण समुद्रमथने प्रवृत्तैः । अन्यत्र राजपक्षे यस्य भोगः साम्राज्यभोगः अहीन-जननः श्रेष्ठोदयः अमन्द - रस - अनुगश्च , तादृशः विबुधैर्बुधैरमृतस्य यज्ञशेषस्यार्थिभिरासेव्यते ॥

७६. उद्गतं तमो यस्मात् , तस्य स्थितिः, तस्या विध्वंसात् रात्रिप्रादुर्भावनादित्यर्थः । उग्रस्य शिवस्य मूर्धन्यतां गतः शिरसि स्थानं प्राप्तः, चक्रधिक्करणात् चक्रवाकपक्षिणो विरहोत्पादनात्, विगतः कलानामुदयो यस्य स राजा चन्द्रः । नृपपक्षे उत्तमा प्रकृष्टा स्थितिः, तद्विध्वंसात् , उग्रेषु तीक्ष्णेषु मध्ये मूर्धन्यतां प्रमुखतां प्राप्तः, चक्रं राज्यमण्डलम् , विकलः न्यून उदयो यस्य ; निरभ्युदय इति यावत् ॥

७७. धीवरा मत्स्यग्राहिणः, सर्वदा आनायेन मत्स्यग्रहणार्थकजालेन सन्नद्धाः सज्जाः; 'आनायः पुंसि जालं स्यात्' इत्यमरः ; तीर्थं जलाशयः, तदुपमर्दाय तत्र जलमालिन्य-कूलध्वंसादिकरणाय । अन्यत्र धीवरा मनीषिणः; सर्वस्य दानाय सन्नद्धाः ; तीर्थाः अर्हाः साधवः, तदनुसारिणः; जडाशया मूर्खाः ।

शुद्धद्विजान् विमानस्थान् कुर्वन्नित्यमत(द)क्षिणः ।
अर्थनिक्षेपलुब्धात्मा भिन्दिता(?) किन्नरेम्ब(श्व)रः ॥ ७८ ॥
प्रत्यगेकरसः कश्चित् प्राप्य सारस्वतीं दशाम् ।
सर्वधामकरोल्लासैः क्रीडते भुवनेश्वरः ॥ ७९ ॥
पुरस्कृत्य रजोजालं भुवनं क्षोभयन्ति ते ।
अहीनकवलोल्लासैराशुना(गा)शा भवन्ति ये ॥ ८० ॥
स्वरूपघातमालोच्य गोत्रभिन्मित्रतां त्यजन् ।
रत्नाकराश्रयात्कश्चित् स्वपक्षबलमश्नुते ॥ ८१ ॥

---

७८. कुबेर - कुराजयोः श्लेषः । शुद्धद्विजान् हंसान् विमानस्थान् कुर्वन् स्वविमाने योजयन्; यद्यपि कुबेरस्य नरवाहनत्वं प्रसिद्धं, तथापि देवयोनित्वसामान्याद्देवमुक्तम् । अदक्षिणः उत्तरदिक्पतिः अर्थनिक्षेपलुब्धात्मा निधिपतिः, किन्नरेश्वरः तदाख्याना देवयोनीनां राजा । अन्यत्र शुद्धान् द्विजान् ब्राह्मणान् विमानस्थान् कुर्वन् अवमानं प्रापयन्; अदक्षिणः दाक्षिण्यहीनः, अर्थसञ्चयगृध्नुः ; कुत्सितो नरेश्वरो राजा किन्नरेश्वरः । 'अदक्षिणः' इत्येतत् मातृकायाम् 'अतीक्षण' इति लिखितम् । 'भिन्दिता' इति मातृकायामबद्धम् ; 'निन्दितः' अथवा 'अवन्दितः' इति स्यात् ॥

७९. प्रत्यग् एकरसः अन्तर्वाहिप्रवाहः ; सारस्वतीं दशां सरस्वत्याख्यनदीभावम् ; सर्वधा मकराणामुल्लासैः, भुवनेश्वरः तीर्थराजः । अन्यत्र अन्तरास्वाद्यमानशृङ्गारादिरसः, सारस्वतीं दशां कविताम्, सर्वधामसु सर्वेषु प्रभुवेश्मसु करोल्लासैः प्रासदानैः भुवनेश्वरः 'विद्वान् सर्वत्र पूज्यते' इति न्यायेन भुवनविजयी क्रीडते ॥

८०. ये राजानः अहीनकानां महतां बलानामुल्लासैस्सह आशुग-आशाः सदा बाण-प्रयोगकुतुकिनो भवन्ति, ते रजोजालं सेनोत्थापितरजोविस्तारं कृत्वा भुवनं युद्धैः क्षोभयन्ति । अन्यत्र आशुगः पवनः; तदश्नन्तीति पवनाशाः सर्पाः, अहीनाः बृहन्तः कवलाः, तथा महता प्रमाणेन पवनाशिन इति योजनीयम् ; रजो भूमिगता धूलिः, स्थलसञ्चारिण इत्यर्थः ; तथा भुवनं जलं च स्वसञ्चरणेन विषोद्गारादिना च क्षोभयन्ति ॥

८१. स्वरूपघातं पक्षच्छेदेन स्वरूपभङ्गं, गोत्रभिद् इन्द्रः, तन्मित्रतां त्यजन् ; रत्नाकरः समुद्रः तदाश्रयात् स्वपक्षबलं पक्षवत्त्वबलमश्नुते इति मैनाकपर्वतपक्षेऽर्थः । कश्चिन्नृपः स्वरूपस्य वराजत्वस्य घातम् ; गोत्रभिदां ज्ञातीनां शत्रुभूतानां मित्रतां त्यजन् ; रत्नानामाकरः स्वकोशः, तदाश्रयेन स्वपक्षस्य बलमश्नुते ॥

परपक्षात्क्षयं प्रेक्ष्य मित्रमाशु विशन्ति ये ।
वर्धते मण्डलं तेषां सत्यं सकलया श्रिया ॥ ८२ ॥

आर्तिसंवेष्टितज्यानामानतिः कुटिलात्मनाम् ।
भवितारोपसंपत्त्या परं(र)भङ्गाय केवलम् ॥ ८३ ॥

अनङ्कुशगतिः कश्चिद्दानातिशयतः कु(कृ)शः ।
अळि(ली)नैः श्रुतिपार्श्वस्थैः अलं गीतो महीयते ॥ ८४ ॥

सुदृशः कतिचिद्रागात् सत्रपालोकसम्मताः ।
सद्यस्तनोदयादेव भजन्ति सुरतार्थिताम् ॥ ८५ ॥

पावनाहारपूर्णानां भोगो बहुमुखोज्झि(र्जि)तः ।
परस्य(स्वा)पक्रमात् श्लाघ्यः पारावारीणतामियात् ॥ ८६ ॥

---

८२. परपक्षात् कृष्णपक्षे क्षयं प्रेक्ष्य; मित्रं सूर्यमिति चन्द्रपक्षे; नृपपक्षे मित्रं सुहृद्भूतं राजान्तरम्, मण्डलं राज्यम् ॥

८३. चाप-पापिनोः श्लेषः। एकः स्वरूपतः कुटिलः, अपरः स्वभावेन; आर्त्या आकर्षणपीडनेन संवेष्टिता ज्या गुणः येषां ते; अन्यत्र ज्या भूमिः, हठाल्लोकाक्रमणं कुर्वतामित्यर्थः; आनतिः आनमनं, प्रह्वभावश्च; आरोपसंपत्त्या बाणारोपणेन स्थानारोपणेन च भङ्गः त्रुटितत्वमवपातश्च ॥

८४. कश्चिद् गजः अनङ्कुशगतिः निरङ्कुशं मदाद् गच्छन्, दानातिशयतः मदजलातिरेकात्, कृशः तत एव, श्रुतिपार्श्वस्थैः मदजलाकृष्टैः कर्णान्तिकस्थैः अलीनैः भ्रमरराजैर्गीतः। अन्यत्र कृशो जनः, अलीनैः प्रकटैः संमुखस्थैः स्तुति पाठकैः ॥

८५. कतिचित् सुदृशः स्त्रियः इति षष्ठ्येकवचनम्, अन्यत्र सूरयः; सत्रपाः सलज्जाः, आलोका दृष्टयः; अन्यत्र सत्र-पा यज्ञरक्षकाः तत्कर्तार इत्यर्थः; सद्यः स्तनोदयात्, स्तनयोरुदयात्; अन्यत्र सद्यस्तनः सद्योभव उदयोऽभ्युदयः, तस्मात्, सुरताय रतेरर्थिताम्, सुर-ताया देवत्वस्य अर्थितां च ॥

८६. पावनः पवनमय आहारः. अन्यत्र पावनः शुद्ध आहारः; बहूनि मुखानि इति आदिशेषपक्षे; अन्यत्र बहुमुखं बहुधा, पर-स्वापक्रमात् परस्य महाविष्णोः स्वापात् श्लाघ्यः; अन्यत्र परस्वात् परधनादपक्रमो निवृत्तिः, ततः श्लाघ्यः; पारावारीणता समुद्रयोग्यता; अन्यत्र परावरज्ञत्वम् ॥

मुक्तात्र(श्र)योऽपि गाम्भीर्या(र्याद्) नदीनः कश्चिदाश्रितान् ।
स्व(स)पक्षभूभृतः पुष्णन् अलङ्घ्यस्सकलैर्भवेत् ॥ ८७ ॥

अदाक्षिण्यकराकृष्टो धर्म(र्म)क्षोभं वितन्वतः ।
नरस्य कस्यचित्कोपः कर्णच्छेदेन सिद्ध्यति ॥ ८८ ॥

वर्धिताः पावनोद्रेकैः वासवाशानुसारिभिः ।
घनाः पृथ्वी(वीं) रसोल्लासैरपरा(रां) तां वितन्वते ॥ ८९ ॥

सदाचरणशून्यानामनिलोल्लासमीयुषाम् ।
विनतामोदविद्ध्वंसाद्विषादानुगतिर्ध्रुवा ॥ ९० ॥

---

८७. मुक्तानां मौक्तिकानामाश्रयः, नदीनः समुद्रः, सपक्षा भूभृतः गोत्रभिदः इन्द्राद्भीतान् पक्षवतः पर्वतान् । अन्यत्र गाम्भीर्यान्मुक्ताश्रयः अन्याश्रयपरित्यागी, न दीनः दैन्यरहितः, सपक्षान्, सुहृदो भूभृतो राज्ञः ॥

८८. नारायणसखिभूतस्य नरस्य अर्जुनस्य कस्यापि नरस्य च श्लेषः। तस्य कोपः कर्णविषयकः, अदाक्षिण्यकरेण वामकरेण आकृष्टः चापद्वारा आविर्भावितः तस्य सव्यसाचित्वात्; अन्यत्र दाक्षिण्याभावेन प्रकटितः, धर्मक्षोभं तथाचरणेन धर्मयुद्धक्रमोल्लङ्घनम्, सामान्यतो धर्मविप्लवं च कुर्वतः, कर्णच्छेदेन अङ्गराजवधेन; अन्यत्र कोपः परस्य कर्णस्य श्रवणस्य छेदे पर्यवस्यति ॥

८९. मेघानां प्रभूणां च श्लेषः। पावनैः पवनसंबन्धिभिः उद्रेकैः उच्छ्रायैः पवनवेगेनेत्यर्थः, अन्यत्र पावनैः पवित्रैरुद्रेकैरभ्युदयैः । वासव इन्द्रः, तस्य आशा इच्छा, तदनुसारिभिः, तस्य मेघवाहनत्वात्; अन्यत्र वसूनां धनानामियं वासवी तादृशी आशा इच्छा। घना मेघाः, अन्यत्र प्रभवः; आन्ध्रव्यवहारे घनशब्दः तादृशेऽर्थे प्रचरति; रसाः जलानि तदुत्पन्नानि नानारसवन्ति सस्यादीनि च; राजपक्षे रसाः प्रजाभिरनुभाव्या नानाभोगाः ; पृथ्वीम् अपरामन्यामिव, अथवा तत उत्कृष्टरहितां श्रेष्ठामित्यर्थः; वासवस्य आशा दिक् पूर्वा तदनुसारिभिः पृथ्वी अपरा पश्चिमा क्रियत इति विरोधाभासोऽपि ॥

९०. सदाचारशून्यानामनिलोल्लासो वातदोषोद्रेकः, तम ; विनतानां नम्राणामामोदविध्वंसात्; विषादस्य दुःखस्यानुगतिः । अन्यत्र सदा चरणशून्यानां पादरहितानामुरगाणामनिलेन पीयमानेन उल्लासमीयुषाम् ; विनता गरुडमाता ; तदामोदध्वंसात्; सर्पगरुडविरोधः प्रसिद्धः ; विषमत्तीति विषादः शिवः, तदनुगतिः आभरणत्वेन तदनुरोधः ॥

सर्वदोषानुषङ्गेण जाता(त)मोहोऽप्यतन्द्रितः ।
घलवत्याश्रये सुख्यात् बहुदोषमपि क्षिपन् ॥ ९१ ॥
बहुलालापवृत्तानां पदन्यासमपश्यताम् ।
बालभावः(वा)कुली दुष्टा जननीरसकारणम् ॥ ९२ ॥
सदा स्तबर(सुस्थिर)वृत्तानां साधुचक्रोज्ज्वलात्मनाम् ।
स्तनानां सुजनानां च सङ्गतिस्सौख्यदा नृणाम् ॥ ९३ ॥
मुक्ताहारान् गुणासक्तानुपकण्ठाश्रितानपि ।
पीडयन्तोऽतिकाठिन्यात् क्षतो(तिं) यान्ति पुनर्भवैः ॥ ९४ ॥
विकस्वरविहीनोऽपि बहुच्छिद्राद्य(न्वि?)तो यतः ।
प्राणिभिः दूरतस्त्याज्यः प्रारब्धपरमार्थि(र्तिं?)कः ॥ ९५ ॥

---

९१. दोषवानपि जागरूकः बलवदाश्रयादस्तदोषः सुखमास्ते इत्यर्थः स्पष्टः । अर्थान्तरं तु सूर्यविषयकमिव भाति, किन्तु न स्पष्टम् ॥

९२. बह्वी लाला जिह्वाद्रवः, तां पिबतीति बहुलालापः, तथाशीलानां बालानाम् ; पदन्यासं पादविक्षेपमजानताम् ; बालभावाकुली, आकुलस्य भाव. आकुली, बालभावेन आकुलता जननी-रसकारणं स्वमातृप्रमोदावहा कुले गृहे दृष्टा । अन्यत्र दुष्कविपक्षे बहुला आलापा बहुव्यर्थपदप्रयोगा यस्य तानि वृत्तानि पद्यानि येषां ते ; पदन्यासं सुष्ठु सरस-पदप्रयोगमजानताम् ; बाला अप्रौढाः भावाः, परिपोषमप्राप्ताः. तैराकुलितता ; जनानां नीरसस्य रसहीनतायाः कारणम् ; कुले गुरुकुले दृष्टाः । 'अप्रगल्भाः पदन्यासे जननीरागहेतवः । सन्त्येके बहुलालापाः कवयो बालका इव ॥' इति त्रिविक्रमभट्टस्य नलचम्प्वारम्भस्थं ६-पद्यमुपजीवितमत्र ॥

९३. सदा सुस्थिरा दृढा वृत्ताः तादृशाकाराः; साधु सम्यक् चक्रवदुज्ज्वला मण्डलाकारेण शोभमाना इति स्तनपक्षे । अन्यत्र सदा अचलितचारित्राणां साधूनां सत्पुरुषाणां चक्रेण समूहेन शोभमानाः ; सङ्गतिः संपर्कः ॥

९४. मुक्त आहारः यैस्तान् ; गुणेष्वासक्तान् ; उपकण्ठं समीपम् ; तादृशान् साधून् अतिकाठिन्यात् तादृशस्वभावात् पीडयन्तः ; पुनर्भवैः पुनरपि जननैः क्षतिं यान्ति । स्तनपक्षे मौक्तिकहारान् गुणस्यूतान् कण्ठगतान् पीडयन्तः काठिन्यान्निकटयाच्च ; पुनर्भवैर्नखैः रतिलीलायां क्षतिं व्रणं यान्ति । 'पुनर्भवः कररुहो नखः' इत्यमरः ॥

यस्सदा म(ग)तिमान्द्येन सर्वदा मलयोत्थितः ।
अदृश्यत्वमवाप्नोति दाक्षिण्यं तस्य दुर्वचः(म्) ॥ ९६ ॥

अत्रिनेत्रजुषः केचिद् अमृतैककलार्थिनः ।
समुद्रोल्लासदा लोकास्सन्ति जैवात्र(तृ)का जनाः ॥ ९७ ॥

अनष्टश्रुतयः केचिदपि सत्यानुसारिणः ।
शुद्धद्विजानुगास्सन्ति सर्वतश्चतुराननाः ॥ ९८ ॥

सदध्वरहितः कश्चिद् बलविद्वेषमावहन् ।
सदारम्भोपरतिभिः मुहूर्ते कामविक्रियाम् ॥ ९९ ॥

---

९५. कवेः श्रीवैष्णवत्वेन अत्र तत्प्रपत्तिशास्त्रसंप्रदायोचितैः शब्दैरर्थैश्च किमप्युपन्यस्यते । विकस्वरः आचारादिगुणविकलः, अत एव विहीनः; 'सा हानिस्तन्महच्छिद्रं' इति भगवदनुभवशून्यं मुहूर्तं छिद्रमित्युच्यते; प्रणिभिर्दूरतस्त्याज्यः' इत्यनेन भागवतस्य अलौकिकस्वभावता उक्ता; परमार्तिकः, 'आर्तो वा यदि वा दृप्त' इत्युक्तप्रकारेण प्राज्ञविशेषः । अर्थान्तरं त्वस्पष्टमेव ॥

९६. सदा गतिमान्द्येन मन्दस्पन्देन; मन्दानिल इति हि तस्य प्रसिद्धिः; सदागति-शब्दसंघटनया च अनिलार्थो द्योत्यते; सर्वदा मलयात् मलयपर्वतादुत्थितः; अदृश्यत्वं वायोस्तादृशो गुणः प्रसिद्ध एव; दाक्षिण्यं दक्षिणस्य तद्दिग्भवस्य भावः; दुर्वचं वक्तुमशक्यम्; तत एव दिश एष आगच्छतीति चक्षुरिन्द्रियागोचरस्य वक्तुमशक्यम् । अर्थान्तरं त्वस्पष्टम् ॥

९७. चन्द्र-श्रीवैष्णवयोः श्लेषः । अत्रिनेत्रजुषः, अत्रिमहर्षिनेत्रोद्भवत्वं चन्द्रस्य प्रसिद्धम्; तस्य अमृता एका कला शिवशिरोगतत्वात्; समुद्रस्य उल्लासदः वृद्धिप्रदः आलोकः प्रकाशो यस्य सः; जैवातृकः चन्द्रः । अन्यत्र अ-त्रिनेत्रजुषः शिवमनाश्रिताः; मुद्राभिः शङ्खचक्रमुद्राभिः सहिताः समुद्राः, अत एव नेत्रोल्लासप्रदाः; जैवातृका जीवनप्रदाः; आचार्यत्वेन भक्तजनप्रसादकारिणो जनाः श्रीवैष्णवाः ॥

९८. श्रुतिः कर्णो वेदश्च; सत्यममिथ्यात्वं, सत्यलोकश्च; शुद्धा द्विजा ब्राह्मणाः, शुद्धद्विजा हंसाः; चतुराननाः चातुर्ययुक्तमुखाः, ब्रह्मा च; ब्रह्मा चतुर्वदनत्वादष्टकर्णः, चतुरवदनस्तु अनष्टकर्णः कर्णद्वयवानित्यप्यर्थः ॥

९९. सदध्वा समीचीनो मार्गः, तद्रहितः; अन्यत्र सदध्वरः श्रेयस्करो यज्ञः, तस्मै

अन्तःशून्यकरः कश्चिद् दर्शयन् दत्तवैभवम् ।
प्रायस्तोत्रानुषङ्गेऽपि कुतश्चिद्दानमर्हति ॥ १०० ॥

सवनप्रियतां प्राप्य शाखिनः केचिदुज्जिताः (दूर्जिताः) ।
सुरभीषणसम्पत्त्या शोभन्ते सुमनःश्रिया ॥ १०१ ॥

यि(इ)त्थं स्फुरदलङ्कारां सदाश्लेषरसोज्झि(र्जि)ताम् ।
अङ्गीकरोतु शृङ्गारी कश्चिने(न्मे) कवितां हिताम् ॥ १०२ ॥

हितोऽनुकूलः इन्द्रः, बलस्य स्वसैन्यस्य विद्वेषं प्रकोपम् ; अन्यत्र बलनाम्नि असुरे विद्वेषम् ; सदा रम्भाया तदाख्याया अप्सरस उपरतिभिर्भोगैः, अन्यत्र सद्-आरम्भ-उपरतिभिः समीचीनकार्येभ्य उपरतिभिः सत्कार्येभ्यो विरतिभिः । मुहूर्ते अकाण्डे ; अन्यत्र ब्राह्मे मुहूर्ते च, अथवा ऋषेरसन्निधानविशिष्टे काले, कामविक्रियां यथेच्छकारिताम् ; अन्यत्र मन्मथविकारम् ; भजते इति क्रियापदमध्याहार्यम् ।

१००. अन्तः शून्यकरः रिक्तः, दत्तस्य अन्येभ्यो दत्तस्य दानस्य वैभवं दर्शयन् तत् प्रस्तुत्य स्तोत्रानुषङ्गेण तं प्रभुं स्तुवन् कुतश्चिद् यतः कुतोऽपि किमपि दानमर्हति । अन्यत्र दानशूर-कर्णपक्षे कदाचित् स्वस्मिन् रिक्तहस्तेऽपि स्वदानप्रभावं स्मरन् यथाकथंचित् किमपि याचकाय दातुमर्हति ; प्रायस्तोत्रेत्यत्र प्रायः तोत्रानुषङ्गे इति पदच्छेद ; तोत्रं सारथेरुपलक्षणम् ततश्च रथकारपुत्रत्वसम्बन्धो द्योत्यते ॥

१०१. वृक्षाणां वैदिकानां च श्लेषः । वनप्रियाः कोकिलाः तैस्सह वर्तन्ते तेषां भावः, तां स-वनप्रिय ताम् ; शाखिनो वृक्षाः ; सुरभयो गावः तदीषणसंपत्त्या ताभिर्मृश-मिष्यमाणाः ; अथवा सुरभिणो गन्धवन्तः अत एव सर्वैः इष्यमाणाः ; सुमनसां पुष्पाणां श्रिया ; अन्यत्र सवनं यज्ञः, तत्प्रियताम् ; शाखिनः विविधवेदशाखानुसारिणः ; सुराणां भीषणं भयोत्पादः ; अथवा सुरभिः द्युलोकस्था कामधेनुः, तस्या ईषणमभिलाषः स्वर्गप्राप्त्यां; सुमनसो देवाः ॥

१०२. कवेः कवितायां स्वकन्यासमाधिः । अलङ्कारा उपमादयः, आभरणानि च ; सदा प्रतिश्लोकम् ; श्लेषः अर्थद्वयवानलङ्कारविशेषः; सद्-आश्लेषः सम्यगालिङ्गनम् ; तद्रसेन ऊर्जिताम् , कवितापक्षे रसाः शृङ्गारादयः ; शृङ्गारी रसिकः, शृङ्गारवांश्च ॥

कलुषाशयमप्याशु प्रसन्नं कुरुते यतः ।
सन्तः पश्यन्तु शतकं शान्तया कलया गिरा ॥ १०३ ॥

वराहवपुषः श्रिया वसुधया लसद्रोचिषो
वृषाचलशिखाजुषः करगतारिभूरित्विषः ।
घनाघनरुचिद्विषः प्रचुरदानवारिश्लिषः
प्रभोश्शुभदमीक्षणं प्रियमनुक्षणं प्रापये(त्) ॥ १०४ ॥

इत्यण्णयार्यसहजः कमलानिवास-
तातार्यसूनुरयमग्रजलब्धशास्त्रः ।
आचार्यदीक्षितकटाक्षधनी सुनीति-
पद्यानि हृद्यवचनानि(न्य)चिनोन्मधूनि ॥ १०५ ॥

---

१०३. कलुषाशयं कलुषोदकं तडाकमपि कतकवत्, अथवा शरद्वत् यतः प्रसन्नं कुरुते शतकं तद्रूपं काव्यमिदं कलुषाशयं दुष्टभावं प्रसन्नं कुरुते ; ततो हंसवद् इदं शान्तया अनुत्कट्या कलया मधुरया गिरा पश्यन्तु अनुभावयन्तु ; अथवा कला स्वरूपस्फूर्तिः, शान्तया तया, तादृश्या गिरा च ॥

१०४. वृषाचलो वेङ्कटाद्रिरिति प्रसिद्धः ; तत्र स्वामिपुष्करिण्या ईशानकोणे पुरातनी वराहमूर्तिर्वर्तते, करगतः अरिः चक्रं तस्य भूरित्विड्यस्य ; अथ अरीणां शत्रूणां त्विट् तेजः, तेषां पराजयेन हस्तगता यस्य ; प्रचुरं भक्तेभ्यो दीयमानदानानुगतं वारि, तच्छ्लिषः ; अथवा प्रचुरा दानव-अरयो देवाः, तच्छ्लिषः ॥

१०५. अन्ते कवेर्वंशागमाद्यनुकीर्तनम् । कमलानिवासतातार्यः श्रीनिवासतातार्यः । कवेर्वृत्तान्तः आरम्भ एव संग्रहेणोद्दिष्टः । मधूनि यथा भ्रमरश्चिनोति तथा ॥

॥ मृगाङ्कशतकम् ॥*

॥ कविकङ्कणभणितम् ॥

जेतुं त्रिभुवनमतनुः[1]
स्फटिकगणेशं तुषारकरबिम्बे[2] ।
बिल्वदलैरर्चितवां-
स्तदिह कलङ्कं विशङ्कते लोकः ॥ १ ॥

शशिनि सुधामयसिन्धौ
स्वपिति हरिः किल कलङ्ककपटेन ।
अविरतमेव यदेत-
त्तनयो[3] मदनः पुरः स्फुरति ॥ २ ॥

रजनीश-रजतभाजन[4]-
मरकतमृत्युञ्जयः कलङ्कमिषात् ।
[5]भसितभवाम्भसि निहितः
किमु जीवयितुं पतिं रत्याः[6] ॥ ३ ॥

हरदग्ध एव मदनः
सपदि निमग्नः सुधाकरे सरसि ।

---

* म. शा. ह.लि. कोशागारस्थां D. ११९८१-मातृकां (M), तञ्जावूर्-सरस्वतीमहल्-कोशागारस्थां D. ३९६२ मातृकां (T) च संवाद्य सम्पादितमिदम् । कविकङ्कणं तत्कृतीश्चाधिकृत्य New Catalogus Catalogorum ३ भाग, २६५ पृष्ठे दृश्यताम् ; १७-शतकात् प्राचीनोऽयं कविः ॥

1. M. °मखिलं 2. M. विम्बम् 3. M. °स्वनयः
4. M. भाजने ; एका मात्राधिका 5. M. नभसि नत्रा° 6. M. रक्तमिव

१, २, ३ आदौ आर्यात्रयेण गणेश-हरि-मृत्युञ्जयस्मरणद्वारा कविर्मङ्गलं रचयति ।

[1]मलिना तदङ्गदीधिति[2]-
रुदयति कपटात्कलङ्कस्य ॥ ४ ॥

[3]अङ्के कलङ्कदम्भाद्-
[4]गरुडमणिं वहति चन्द्रमाः कमपि ।
हरदृष्टिविषविदग्धं[5]
जीवयितुं कुसुमधन्वानम् ॥ ५ ॥

कोपादिव[6] नवशशिना
कवलितमखिलं तमःपटलम्[7] ।
स्फुरितं तदेव हृदये[8]
कलयति शङ्कां कलङ्कस्य ॥ ६ ॥

विश्वं विजेतुमचिरा-
[9]दङ्कमिषान्निजपुरःसरे शशिनि ।
कुसुमशरेण करेण
स्वयमिह[10] मुद्रामषी निहिता ॥ ७ ॥

[11]उद्वर्त्य वदनमिन्दुं
कुङ्कुमपङ्केन यामिनी रुचिरम् ।
कलये कलङ्कदम्भा-
न्मृगमदतिलकं निवेशयति ॥ ८ ॥

आकृष्य तिमिरचिकुरं
रजनीनयनं[12] कलाधिनाथोऽयम् ।

---

1. T. अधुना 2. M. अत्र त्रुटिः 3. T. अङ्ककलङ्क
4. M. अत्र त्रुटिः 5. M. विष९१ 6. M. °कोपोदिवाव
7. M. परस्य 8. M. हृदयम्
9. M. एक° 10. M. इव 11. M. उद्धृत्य 12. M. यैर्नवं

यदचुम्बदम्बरान्ते
कज्जलकलनां तदङ्कतां वहति[1] ॥ ९ ॥

शशिसम्पुटे कलङ्कं
सिद्धं शृङ्गार[2]कज्जलं रजनी ।
दृशि विनिवेश्य जनानां
मदनाद्वैतं प्रसाधयति ॥ १० ॥

ओषधिपतिरङ्कमिषात्
कलयति शृङ्गारमञ्जरीबीजम् ।
दृशि विशदेव यदेत-
न्मनसि क्षेत्रेऽङ्कुरं वहति ॥ ११ ॥

शशिमण्डलालवालं
काचन शबरी(?)[3] कलङ्ककपटेन ।
अविरतमेव[4] कलाभिः
कर्पूरैः पूरयन्तीयम् ॥ १२ ॥

ननु शर्वरीति शबरी
शशिकरिदशनैककर्णपूरेऽस्याः ।
मलिना कपोलकान्तिः
विलसति कपटात्कलङ्कस्य ॥ १३ ॥

---

1. M. ददन्ति 2. M. मृङ्गार°
3. M. काञ्चनकदली T. कावनकवली 4. M. एक°
९. नयने कज्जलस्य सम्भवात् तच्चुम्बनेन तत्सक्तमित्यर्थः ।
१०. सिद्धाञ्जनं जगन्मोहनसाधनमत्राभिप्रेतम् ।
१३. शबर्याः कृष्णवर्णत्वादेवमुत्प्रेक्षा ।

तिमिरनिकरकरिकवलन-
कुमुदविकाशाहृहा[1]समादधतीम् ।
हिमकरहरिमधिरूढां[2]
कलये कालीं कलङ्कममुम्[3] ॥ १४ ॥

काचमयं किल चषकं
सकलसुरैरमृतपानाय ।
निहितममृतभरकुण्डे[4]
कलये कपटात्कलङ्कस्य ॥ १५ ॥

अमृतमये सरसीन्दा-
वेकं नीलोत्पलं कलङ्क[5]मिषात् ।
अहमहमिकया यस्मिन्
लोचनमधुपाः प्रधावन्ति ॥ १६ ॥

मदनस्य भुवनजयिनः
शशधरकलशेऽभिषेचनायेदम् ।
निहितं हरिताम्रदलं
कलयति शङ्कां कलङ्कस्य[6] ॥ १७ ॥

प्रणयादुरसि विनिहितः
शशिना जलदः कलङ्ककपटेन ।

---

1. M. दृशा
2. M. सृष्टां 3. M. कालां कलम्बक...।
4. M. अमृतकलङ्के 5. M. नीले स लोक 6. M. कजंकस्य

१७. हरित-आम्र-दलमिति च्छेदः ; कुम्भे चूतपत्राणि मङ्गलकार्येषु निधीयन्ते।

१८. शशिनो जलदस्य उभयोरपि पितृत्वमुदधेः; तां चाविदितचरां वार्तामिव एकोऽन्यस्मै कथयति ।

पितुरुदधेः स्वम् (?) उदन्तं[1]
कथयिष्यति चिरमविदितमिति ॥ १८ ॥

न किल कलङ्कं कलये
नभसि भ्रमतः कलाधिनाथस्य ।
ताराविरहहुताशन-
हेतुर्धूमाङ्कुरः स्फुरति ॥ १९ ॥

हिमकरबिम्बे[2] हिमवति
कुञ्जरकलभं कलङ्कमाकलये ।
उन्मूलयन्तम[3]बला-
हङ्कृतिकदलीकुलं कुतुकात् ॥ २० ॥

सपरिकरं कुसुमशर-
स्त्रिभुवनविजयाय निर्गतः सहसा ।
[4]दधती कलङ्ककोकिल-
शशिपञ्जरमनुसरति रजनी तम् ॥ २१ ॥

उडुमण्डलनिभ[5]मण्डं
रजनिभुजङ्गीयमालिङ्ग्य[6] ।
जनयति शशिनि कलङ्कं[7]
कालव्यालं[8] समुल्लसति[9] ॥ २२ ॥

---

1. M. समुदन्तं T. उदन्तं. 'पितुरुदधेरुदयं स्वम्' इति स्यात्.
2. M. बिम्बैः T. बिष 3. M. °लन्त्य° 4. M. वधती
5. M. °मिभ° T. °मिद° 6. M. °यमाण...त्रुटिः 7. M. °ङ्कः
T. °ङ्क 8. M. °लः 9. M. °त्रसति

२२. रजनिभुजङ्गी कलङ्कं नाम कालव्यालमालिङ्ग्य शशिनि उडुमण्डलरूपं अण्डं जनयति इत्यन्वयः ।

कर्णानिलचल[1]गलितो
गजपतिमदबिन्दुरिन्दु[2]बिम्बेऽस्मिन् ।
मदयन् मनांसि पुंसां
कलयति शङ्कां कलङ्कस्य ॥ २३ ॥

दिनकरकरपरितापा-
द्रक्षसि निहितं तुषार[3]किरणेन ।
[4]नलिनीदलमतिललितं
कलयति शङ्कां कलङ्कस्य ॥ २४ ॥

पीयूषपूरितममुं
हिमकरकलशं निशा नयन्तीयम्[5] ।
[6]उच्छलनशङ्कयाङ्कं
[7]नवकुशनिवहं निवेशयति[8] ॥ २५ ॥

रोषेण राहुणासौ
हृदये[9] दशनेन दष्टबिम्बेन्दुः[10] ।
तद्व्रणकिणं कलङ्कं
शङ्कन्ते साम्प्रतं[11] लोकाः ॥ २६ ॥

[12]स्मरविरहादिह रत्याः
[13]मज्जन्त्यास्तुहिनदीधितौ सरसि ।

---

1. T. बल
2. M. °रिन्दु नास्ति
3. M. 'कर' इत्यधिकम्
4. M. वलिनी
5. M. तपन्तीयम्
6. M. उल्ल°
7. M. लव
8. M. °शयन्ति
9. M. दग्रे T. हृदय
10. T. दष्टवानिन्दुः
11. T. 'साम्प्रतं' नास्ति
12. M. रत्या इत्यधिकम्
13. T. पतन्त्याः

विलुलितचिकुरप्रकरः
कलयति शङ्कां कलङ्कस्य ॥ २७ ॥
नभसि सरसि सञ्चरतः
शशधरबिम्बैकहंसस्य ।
चुञ्चुपुटीसम्पुटिता
शैवलवल्ली कलङ्ककपटेन ॥ २८ ॥
प्राचीनिहितमलोकय-
दभिनवरजनी सुधाकरं मुकुटम् ।
स्फुरितमिहाननमस्या
[1]लक्ष्मतया लक्ष्यते लोकैः ॥ २९ ॥
द्विजपतिरुदयन् विमले
मन्दाकिन्या महाम्भसि स्नातः ।
तुलसीदलमाकलयति
विष्णुपदादङ्कदम्भेन ॥ ३० ॥
शालग्रामशिलामिह
कलयत्यङ्के कलङ्ककपटेन ।
विधुरनुनेतुं शपथैः
मुकुलितनलिनेक्षणां नलिनीम् ॥ ३१ ॥
श्लथयति कलाधिनाथे
तिमिरनिचोलं करेण रजनीयम् ।
सपदि ह्रिया हृदि लीना
लाञ्छनलक्ष्मीसुरीकुरुते ॥ ३२ ॥

---

1. T. लक्ष्य°

२९. स्फुरितं प्रतिफलितम् ।

३०. द्विजपतिरिन्दुः ; ब्राह्मणश्रेष्ठश्च ; विष्णुपदाद् आकाशाद्, विष्णोः पादाच्च ।

स्फुरति कलङ्कः श्येनः
कोऽपि निशानाथमण्डले नीडे ।
तिमिरनिकरकरटा[1] इह
यस्यालोकात्पलायन्ते[2] ॥ ३३ ॥

सन्ध्यानलचलदम्बर-
काचघटीतस्तमोऽगरुणः[3] ।
गलितं तदेकसारं
[4]हिमकरपुटके कलङ्कमाकलये ॥ ३४ ॥

विधिना विधुं विदधता
लवणिमवित्तं[5] व्ययीकृतं सकलम् ।
असकलमिदमिति परिहृत-
मन्तःकुहरं कलङ्कमिषात् ॥ ३५ ॥

मनसोऽधिकतररंहसि
हिममहसि रथे स्मरस्य वीरस्य ।
उल्लसति नीलकेतन-
मिदमाकलये कलङ्कममुम् ॥ ३६ ॥

नभसः सरसः सरतः[6]
तिमिरवराहस्य कान्दिशीकस्य ।
वदनादिन्दौ[7] गलितं
कमपि कसेरुं[8] कलङ्कमाकलये ॥ ३७ ॥

---

1. M. करण्टाः 2. M. लोकसिलायन्ते 3. T गुरुणः
4. M. किम 5. M. धिक्तं T. चित्त 6. M. सरितः T. स्मरतः
7. M. °दुं 8. T. °सेरुं छुसम्

३५. ल्वणिमा लावण्यम् । सर्वां लावण्यसम्पदं व्ययीकृत्यापि तदपर्याप्ततया मध्ये कुहररूपमपूरितं, यस्मिन् कलङ्कशङ्का जाता ।

दिवसपति[1]मनुसरन्त्या
सहसा[2] रागेण सन्ध्यायाः ।
हृत[3] इव करेण शशिना
नीलनिचोलः[4] कलङ्कोऽयम् ॥ ३८ ॥

पितुरङ्के वि[5]लुठन्तीं
रेवामेवाङ्क[6]दम्भतः शशिनः ।
कलये दर्शनमात्रा-
[7]दुपरति(?) दुरितानि या हरति ॥ ३९ ॥

कलयामि वदनमण्डल-
मतरुणहरिणस्य लाञ्छनं शशिनः ।
कवलिततिमिरतृणस्य
श्रमभररोमन्थमन्थरितम् ॥ ४० ॥

कर्पूरवेदिरिन्दु-
स्त्वत्र कलङ्कस्तमालतरुरेकः[8] ॥
[9]अभ्यसनं विशिखानां
कलयति मदनस्तले यस्य ॥ ४१ ॥

हिमकरकोमल[10]तल्पे[11]
शयितायाः[12] कामदयितायाः[13] ।

1. M. यति 2. M. महसा 3. M. हृदय
4. M. °लश्चोलः ; इतः परं समुल्लसतीत्यधिकम् 5. M. पि°
6. T. °काङ्क° 7. M. दुरितास्त्वया T. °दुपदुरितानि
8. T. तमां लतकैः 9. M....मनं 10. M. पदं लुप्तम्
11. M. तल्प 12. M. कल्पवनोपेतायाः 13. M. 'या' नास्ति

३९. रेवा नर्मदा, सा सोमोद्भवेति पुराणम् ; तस्या दर्शनादेव पातकानि नश्यन्ति ।

श्रवणदलादिव गलिता
कुवलयकलिका कलङ्कोऽयम् ॥ ४२ ॥

स्मरधीवरेण विततं
जगति मनोमीनमाहर्तुम् ।
शशधरसरसि गभीरे
जालं कलये कलङ्कममुम् ॥ ४३ ॥

स्यन्दनमिन्दुं कुवलय[1]-
[2]कोदण्डं किल कलङ्कमाकलयन्[3] ।
स्मर इति दिवस[4]तपस्वी
वियति तरस्वी[5] तिरोभवति ॥ ४४ ॥

हिमकरमण्डलममलं
[6]छत्रमिदं कुसुमधन्वनः [7]स्फुरति ।
बलभिदुपलमयदण्ड[8]-
च्छाया लक्ष्मच्छलात्[9] तत्र ॥ ४५ ॥

शशभृति रतिपतिसौघे
[10]चलति मयूरः[11] कलङ्ककपटेन ।
अचिरादेव कबलयन्
अबलाकुलदर्पसर्पमसौ ॥ ४६ ॥

आशाभित्तिषु परितो
लिखितुं प्रियमेव कन्दर्पम् ।

---

1. M. कवलयति 2. M. ग्रन्थपातः 3. M. °त् 4. M. विदितसत°
5. M. °तिरश्चाति° 6. M. अक्षरभ्रंशः 7. T. पुर इति अधिकम्
8. M. यद्ध 9. M. कुलात् 10. T. बलति स
11. M. मयूखैः
४४. स्मर इति मत्वा तस्माद् भीतः दिवसाख्यः तपस्वी जवेन पलायित इत्यर्थः ।

शशिसम्पुटे कलङ्कं
कज्जलसलिलं रतिर्विहति ॥ ४७ ॥

गगने यामुनसलिले
खेलति बल[1] इन्दुमण्डलच्छलतः ।
मध्ये कलङ्कदम्भात्
परिकरनीलांशुकं कलयन् ॥ ४८ ॥

अन्धकमिवान्धकारं
धवलगवा[2] धवलकरमहेशोऽयम्[3] ।
[4]दलयन्नुदयति कलयन्
करिवरकृत्तिं[5] कलङ्कमिषात् ॥ ४९ ॥

शशधरमौक्तिकसौधे
त्रिभुवनजयिनो मनोजराजस्य ।
विलसति कलङ्कदम्भात्
मरकतमयमेव सोपानम् ॥ ५० ॥

मारस्त्रिभुवनवीरः
तदमलफलकं नु मण्डलं शशिनः ।
मध्ये विलसति नीलो
हस्तावापः कलङ्ककपटेन ॥ ५१ ॥

---

1. T. नलः 2. T. धवलगतानन्द्रिना 3. T. महेशस्सोऽयम्
4. T. °लयन् उदयं 5. M. करिकरकृद्दिं° T. करिवरवृत्तिं

४८. बलः बलरामः ; स नीलाम्बर इति प्रसिद्धः ।
४९. धवलगवा तादृशकिरणेन धवलकरश्चन्द्रः, स एव महेशः ।
५१. फलकं खेटः । हस्तावापः ज्याघातत्राणार्थः चर्मकृतोऽङ्गुलिबन्धः ।

अभिनवरमणी[1] रजनी
नीवीगुच्छोऽम्बरे चन्द्रः ।
उदरे तस्य कलङ्को
नीलं कौशेयमेतदुल्लसितम्[2] ॥ ५२ ॥

ताराहारालिङ्गुषः
तारापतिविमलमेखला[3]रत्ने ।
[4]नाभीकुहरच्छाया
वलति रजन्याः कलङ्कमिषात् ॥ ५३ ॥

[5]मण्डलमखण्डमिन्दो-
रचलं कैलासमेव कलयेऽहम् ।
तत्र कलङ्कव्याजाद[6]-
विरलशृङ्गार[7]निर्झरः स्फुरति ॥ ५४ ॥

वियति सरिति विधुबिम्बे
[8]नावि कलङ्को नु कर्णधारोऽयम् ।
उदयास्ताचलतीरे
[9]पारावारे समानेतुम्[10] ॥ ५५ ॥

दूरादागतवत्या[11]
सपदि[12] रजन्याः कलङ्ककपटेन ।
प्राची हिमकरभाजन-
निहितलवङ्गान्यु[13]पायनीकुरुते ॥ ५६ ॥

---

1. T. °मदरमणीयैः 2. T. °दुल्लसति 3. M. °ले 4. M. नीवी 5. M. अक्षरत्रयं लुप्तम् 6. M. त्. 7. M. °लादागार° 8. M. भारतकालकोन T. नापि कलङ्को न 9. T. पदमिदं भ्रष्टम् 10. T. नेत्रम् 11. M. °गवत्यां वा 12. T. °ति 13. M. वेगानु°

५४. शृङ्गाररसस्य 'श्यामो भवति शृङ्गारः' इति भरतोक्त्यनुसारेण श्यामत्वादेवमुत्प्रेक्षा ।

उदयाचलनिज[1]भवना-
द्गगने[2] विपणौ पुरस्कृतं निशया[3] ।
इन्दुसितोपलपिण्डं[4]
वलति[5] कलङ्कः पिपीलिका तत्र ॥ ५७ ॥

विजिगीषोः कुसुमेषो-
र्विधुमयदधिभाजनं रजनी ।
सहसा नयति पुरस्ता-
दुपचितमन्तः कलङ्कदूर्वाभिः ॥ ५८ ॥

तर्पयितुं पति[6]ममृतैः
पुलिनतटे गगनगङ्गायाः ।
हिमकरराजतशुक्तौ
वहति रतिः किल कलङ्कतिलपटलम् ॥ ५९ ॥

गगने नलिनीपत्रे
[7]सद्यः प्रेताय कुसुमचापाय ।
रतिरोदनमयपिण्डं[8]
वितरति चन्द्रं कलङ्कमाषान्नम् ॥ ६० ॥

भर्तरि सवितरि गतवति[9]
पायसपिण्डं सुधा[10]करं प्राची ।
व्यरचयदम्बरकुश[11]भुवि
वलति[12] कलङ्कस्तदन्तरे काकः ॥ ६१ ॥

---

1. M. °लानत 2. M. गौणे 3. M. सिशया
4. M. °मिन्दुं 5. T. चलति 6. M. °यति हित्त°
7. M. सद्यः 8. M. °मिन्दुं 9. M. ᵕतवति
10. M. शुभ 11. M. कूर्मे. T. कुश° 12. M. चलति

६०. रतिः ओदनेति पदच्छेदः ।

शशिनि[1] सुधामयभूमौ
चलति कलङ्कैकनाग[2]वल्लीयम् ।
रजनीवदनमविरतं
[3]रञ्जितमातन्वती[4] रुचिरम्[5] ॥ ६२ ॥

ग्रुतलजलाशयनिहिता[6]
जिगमिषुमदनस्य रजतघटिकेयम् ।
विधुमण्डली तदन्तः
स्फुटति कलङ्कच्छलात्सुषिरम् ॥ ६३ ॥

कर्पूरमुपहरन्ती
तुहिनकरं मकरकेतवे रजनी ।
कलयति कलङ्कदम्भा-
त्तदुपरि मरिचानि रक्षायै ॥ ६४ ॥

रुचिरात्कलयति चिकुराद्
रजनी दधती मृगाङ्ककङ्कतिकाम् ।
तल्लेश[7] एव लक्ष्यः
कलयति शङ्कां कलङ्कस्य ॥ ६५ ॥

महिषः कलङ्कमिषतो
हिमकरसरसः समुन्मिषति ।
अपसारयति[8] तुरङ्गा-

---

1. T. °नः
2. M, भाज
3. T. अक्षरलोपः
4. M. °न्वते
5. T. सुचिरम्
6. M. विहिता
7. M. ह्लेशः
8. T. सारयितुं

६२. नागवल्ली ताम्बूलपत्रम्; सुधया ताम्बूलचर्वणाद्रजनीयुवत्या वदन रञ्जितं भवति ।

६४. कर्पूरं स्वभावतो विवृतं चेत् विलयमाप्नोति; प्रायस्तद्रक्षायै विलयवारणार्थं तदुपरि मरिचानि निधीयन्ते ।

६५. कङ्कतिका केशमार्जनी

निति मिहिरः चरमभूभृतः कुहरे ॥ ६६ ॥
प्रतिपादयतः शून्ये
पथि पृथु पीयूषमिन्दुकासारम् ।
अङ्कमिषात्कुसुमेषोः
श्यामलिता यूपयष्टिमिह ॥ ६७ ॥
लवणिमनिधेः स्मरस्य
स्मृत्वैवाङ्गानि धन्यानि ।
इन्दुः कलङ्कदम्भा-
न्मलिनं [1]निःश्वासमावहति ॥ ६८ ॥
अम्बरपारावारे
वणिजो मदनस्य शीतरुचि[2]पोते ।
गुणवृक्ष एव[3] साक्षात्
कलयति शङ्कां कलङ्कस्य ॥ ६९ ॥
कलयति कुटिलभ्रुकुटी-
मोषधिनाथः कलङ्ककपटेन ।
मयि जीवति कथमतनु-
र्मम मित्रं कुसुमधन्वेति ॥ ७० ॥
शिशिरकिरणनवतल्पं
परिशीलयतः स्मरस्य कुतुकेन ।
कलयति कलङ्कशङ्कां
नीलक्षौमोपधानमिदम् ॥ ७१ ॥
स्फुरदम्बरैक[4]देशे
दन्तपुटे शीतकरबिम्बे ।

---

1. M. विश्वास° 2. M. सुधि 3. T. इव 4. M. °वेशे
७२. दन्तनिर्मिते पुटे

लोचनमुल्लासयितुं
वहति कलङ्कं नु कज्जलं रजनी ॥ ७२ ॥

गगनगृहेन्दुगवाक्षे
लाञ्छनलूतापतिः कोऽपि ।
बध्नाति सपदि सकलं
प्रेममयेनैव तन्तुना भुवनम् ॥ ७३ ॥

मदनमहीपतिपुरतो
वहति मुखेनैव वादयितुम् ।
रजनी हिमकरशङ्खं[1]
मूले कुहरं[2] कलङ्क एवास्य ॥ ७४ ॥

कलयति कलङ्ककपटात्
कमपि किशोरं शशी निशीथिन्याः ।
इयमपि तमनुसरन्ती
गणयति न तमोऽशुकस्खलनम्[3] ॥ ७५ ॥

रजनी काचन रमणी
शशधरमुखमण्डले तस्याः ।
रसलम्पटमलिकलभं[4]
कमपि कलङ्कं समाकलये ॥ ७६ ॥

रजनिरमण्या हिमरुचि-
ताराहारावलीतरले ।
नीलगुणस्फुरणेयं
कलयति शङ्कां कलङ्कस्य ॥ ७७ ॥

अधुना पदमनुधाता (?)
स्मर इह विजयी महाराजः ।

---

1. M. शीवष 2. M. कुठारं 3. T. °शुकः खलना 4. T. कलभं

७६. अलिकलभः स्थूलो दुर्ललितो भृङ्गः ।

उडुकुसुमे पथि रजनी
शशिनि शरावेऽङ्कधूपमावहति ॥ ७८ ॥
वेदयितुं विरहदशां
गतमिव चेतश्चिराच्चकोरीणाम् ।
शशिनि शुचा मलिनीकृत-
मभिनीलं किमपि लक्ष्मैतत् ॥ ७९ ॥
अनुरागादभिसरतो
[1]लङ्घितजलधेः कलाधिनाथस्य ।
रजनीमुखचुम्बनतः
शिथिलितमलकं कलङ्कमाकलये[2] ॥ ८० ॥
सितमकरमेव कलये
शशिनं मदनस्य केतनीभूतम्[3] ।
[4]दण्डीकृतनववंश[5]-
च्छायालक्ष्मच्छलात्तत्र ॥ ८१ ॥
कुसुमशरस्य जिगीषोः
[6]शशिनं धवलं वितानमाकलये ।
मध्ये स्यूतो विलसति
[7]नीलश्चोलः कलङ्कमिषात् ॥ ८२ ॥
कुसुमशरस्य शराणां
रश्मिभ्रमिते[8] तुषारकरजाले[9] ।
लोहमयीं भ्रमि[10]यष्टिं
मध्ये कलये कलङ्कमसुम् ॥ ८३ ॥

---

1. M. लेपित° 2. M. °मूलकङ्कले समाकलये 3. M. °ते
4. M. द्रुही° 5. M. ... नंश° 6. M. शशिमण्डलं 7. M. लीनं°
8. M. भ्रमणे 9. M. °सरशाले T. °किरणे 10. M. भ्रमं

[1]रजनीमीमा(नासा ?)निहितं
मुक्ताफलमिन्दुमण्डलं कलये ।
चिकवु(?)तिल (तिलक ?)प्रतिकृति-
फलनं चलन(?)कलङ्कच्छलात्तत ॥ ८४ ॥

सुन्दरकन्दुक[2]मिन्दुं
रजनिरमण्याः करे कलये ।
मध्ये तदङ्गुलीयक-
मरकतरुचिमञ्जरीकलङ्कोऽयम् ॥ ८५ ॥

स्मरशबरनीयमानं
जलधेः कमपीन्दुमण्डलं मीनम् ।
कलये कलङ्कमन्त-
र्निगडितबडिशं वहन्तममुम् ॥ ८६ ॥

दमनकतरुरङ्कुरितः
शशधरसिकतातले कलङ्कमिषात् ।
हरकोपतापमतुलं
गमयति मदनस्तले यस्य ॥ ८७ ॥

अम्बरवराहदंष्ट्रा-
कोटरकोटीनिविष्टमुस्तायाः[3] ।
रुचिमनुहरति सुधांशो-
रुदरे नीलः कलङ्कोऽयम् ॥ ८८ ॥

[4]अनुमिहिरं गच्छन्त्याः
सन्ध्यायाश्चरणभूषणं गलितम्[5] ।

---

1. T. इयमार्या नास्ति   2. T. कन्दु°   3. M. मुस्तायाः
4. M. ऋतु°   5. M. भूषलितम्   ८४, पाठोऽशुद्धः, अर्थस्तु स्पष्टः ।

शशिमण्डलमिद[1]मध्वनि
मध्ये पङ्कं कलङ्क[2]माकलये ॥ ८९ ॥

सारङ्गे हरिणाङ्के
रजनीहरिणीदृशः कलये ।
नयनाञ्चलरुचिवीची-
वलनं मध्ये कलङ्कममुम् ॥ ९० ॥

रजनीकरेणुपरिगत-
मतनोस्तूणीरमिन्दु[3]माकलये ।
शरभरपक्षच्छाया-
लाञ्छनदम्भेन लक्ष्यते तत्र ॥ ९१ ॥

द्विजपतिरिह[4] विष्णुपदे
कलयन्नङ्के कलङ्करुद्राक्षम् ।
तिमिरतिलाशनशाली
चरति तपः स्मरसमुदयाय ॥ ९२ ॥

स्मरसुरकरिणः[5] सरसो
गगनादुन्मज्जतः सहसा ।
शशिमण्डलैककुम्भे[6]
श्यामलचमरं कलङ्कमाकलये ॥ ९३ ॥

सीव्यन्त्या युवमनसी
यामिन्याः किल कलङ्कमयसूचीम् ।
प्रेमैकतन्तुपिण्डे
शशिनि विनिहितामिमां[7] कलये ॥ ९४ ॥

---

1. T. 'दं' लुप्तम् 2. T. पदं लुप्तम् 3. M. °मिषु
4. M. °व 5. M. °णे 6. M. अक्षरं लुप्तम् 7. °मितां

नभसि सरसि नवतारा-
कुमुदिन्याः कन्दमिन्दुमाकलये ।
दिवसद्विपपरिमर्दन-
पदमिदमङ्के कलङ्कमिषात् ॥ ९५ ॥

[1]रमयितुमविरतमेक-
स्तारादारान्[2] कुमुद्वतीं रजनीम् ।
[3]कलयति कलङ्ककपटात्
कामपि गुटिकां कलानाथः ॥ ९६ ॥[4]

स्मरविशिखानिह सविषान्
कर्तुं रजनीशसम्पुटे रजनी ।
कलयति कलङ्कगरलं
तदिमे[5] सम्मूर्च्छयन्ति जनान् ॥ ९७ ॥

उदयगिरिपुराणकोशा[6]-
न्निरकाशयदिन्दुमण्डलं मुकुरम् ।
रजनी चिरेण निबिडित-
तन्मालिन्यं कलङ्कमाकलये[7] ॥ ९८ ॥

तुहिनकरस्य[8] कलङ्कं
केशवचक्षुःकनीनिकां कलये ।

---

1. M. भर°
2. M. दारात्
3. M. कलया
4. M.-कोश इतः परं अधिकैका आर्या दृश्यते ; सा च प्रकृतविषयबाह्या नूनं प्रक्षिप्ता-
स्मरवि(?) तावदेत्र रतिस नय(ये) महिला नीर(?) विभ्रमा विराजति(न्ति) ।
यावन्न कुवलयदलयं(नं) (दरुच?)छायानि मुकुलन्ति-नयनानि ॥
5. M. °दं मे
6. M. °शा
7. T. कलङ्कमिषात्
8. T. 'करस्य' नास्ति

यत्पुरतः[1] प्रतिकमलं[2]
सपदि नवोढेव[3] लीयते लक्ष्मीः ॥ ९९ ॥

विधुदधि[4] तण्डुलपिण्डं
लाञ्छनबदरीफलैः (?)[5] विधिर्वहति ।
अहह चिरादिह सूते[6]
कमपि कुमारं स्मरं रजनी ॥ १०० ॥

इति कविकङ्कणभणितं
शतकं तनुतां मृगाङ्कस्य ।
विदुषो रुचिमचिरादिव[7]
ककुभामु[8]दयो मृगाङ्कस्य ॥ १०१ ॥

॥ इति श्रीकविकङ्कणभणितं मृगाङ्कशतकं समाप्तम् ॥

---

1. M. ष्पुरतः 2. M. °ले 3. M. नवो मे व° 4. T. दधिषं
5. M. वदनं T. दले 6. T. बिरादिहृत्पूते 7. T° चिरा···बिम्ब°
१००. भावोऽस्फुटः

॥ उपदेशप्रकरणम् ॥ *

(धर्माज्)जन्मकुले कलङ्कविकले जातिः सुधर्मात्परा
धर्मादायुरखण्डितं गुरुबलं धर्माच्च नीरोगता ।
धर्माद्वित्तमनं(निन्)दितं निरुपमा भोगाः सुकीर्तिः सुधीः
धर्मादेव च देहिनां प्रभवति स्वर्गापवर्गः सुखम् ॥ १ ॥

लक्ष्मीर्वेश्मनि भारती च वदने सूर्यश्च(वीर्यं च) दो(ष्णो)र्युगे
स्त्या(त्या)गः पाणितले सुधा च हृदये सौभाग्यशोभा तनौ ।
कीर्त्तिर्दिक्षु सुपक्षता गुणिजि(ज)ने यस्या(स्यो)द्भवेदङ्गिनां
सोऽयं वाञ्छितमङ्गलावलिकृते धर्मः समासेव्यताम् ॥ २ ॥

निर्दन्तः करटी हयो गतरुवत्(रयः) चन्द्रं विना स(श)र्वरी
निर्गन्धं कुश(सु)मं सरो गतजलं छायाविहीनस्तरुः ।
सूपं निर्लवणं स्त्रियो गतगुणाश्चारित्रहीनो यतिः
निर्देवं भवनं न राजति तथा धर्मं विना पौरुषम् ॥ ३ ॥

राज्यं सुसम्पदो भोगाः कुले जन्म सुरूपता ।
पाण्डित्यमायुरारोग्यं धर्मस्यैतत्फलं विदुः ॥ ४ ॥

सम्पदो जलतरङ्गविलोला यौवनं त्रिचतुराणि दिनानि ।
शारदाभ्रमिव चञ्चलमायुः किं धनैः, कुरुत धर्ममनिन्द्यम् ॥ ५ ॥

---

*B.O.R.I. कोशागारस्थायाः 1173 of 1884-87 इति संख्याङ्किताया मातृकाया उद्धृतमिदम् । अत्रत्याः श्लोकाः केचन परत्रेदृशेषु सङ्ग्रहेष्वपि दृश्यन्ते ; तथा भर्तृहरेः सुभाषितत्रिशत्यां च ; महाभारतमाकरमुक्त्वा बहवः श्लोका दत्ताः । 'थ-ध-योः''श-ष-सानां-' च मिथः लेखकविभ्रमस्सर्वत्र दृश्यते । अशुद्धिस्थलेषु प्रामादिकानपहाय अन्ये शोधिताः पाठा अर्धचन्द्रान्तर्दत्ताः । सङ्ग्रहीता जैन इति भाति ॥

धर्मे मतिर्भवतु किं बहुना श्रुतेन
जीवे दया भवतु किं बहुभिः प्रदानैः ।
शान्तं मनो भवतु किं बहुभिस्तपोभि-
रारोग्यमस्तु विभवेन चलेन किं वा ॥ ६ ॥

यो धर्मशीलो जितमानरोषो
विद्याविनीतो न परोपतापी ।
स्वदारतुष्टः परदारवर्जी
न तस्य लोके भयमस्ति किंचित् ॥ ७ ॥

लक्ष्मीर्विवेकेन मतिः श्रुतेन
शक्तिः शमेन प्रभुता नयेन ।
श्रद्धा च धर्मेण समं समेत्य
धन(न्य)स्य पुंसः सफलीभवन्ति ॥ ८ ॥

पुनः प्रभातं पुनरेव शर्वरी
पुनः शशाङ्कः पुनरुद्यतो रविः ।
कालस्य किं ? गच्छति, याति जीवितं
तथापि जन्तुः स्वहितं न बुध्यति ॥ ९ ॥

यत्ते(त्ने)न पापानि समाचरन्ती(न्ति)
धर्म(र्मं) प्रसङ्गादपि नाचरन्ती(न्ति) ।
आश्चर्यमेतद्भवतापि दृष्टं
क्षीरं परित्यज्य विषं पिबन्ति ॥ १० ॥

जानामि धर्मं न समाचरंति(रामि)
जानामि पापं न परित्यजामि ।
केनापि भूतेन हृदि स्थितेन
व्यादिश्यते यत्तदहं करोमि ॥ ११ ॥

अधमजातिरनिष्टसमागमः
प्रियवियोगभयानि दरिद्रता ।
अपयशः खलु लोकपराभवो
भवति पापतरोः फलमीदृशम् ॥ १२ ॥

नाट्यता(नयज्ञता ?) राजकुले च मानं
प्रियाऽनुकूला तनया विनीता(ः) ।
धर्मे मतिः सङ्गति सज्जनस्य (सज्जनसङ्गतिश्च)
स्वर्गा(र्गः) षडेते जगतीतलेऽस्मिन् ॥ १३ ॥

सुकुलजन्म विभूतिरनेकधा
प्रियसमागमसौख्यपरम्परा ।
नृपकुले गुरुता विमलं यशो
भवति पुण्यतरोः फलमीदृशम् ॥ १४ ॥

कुग्रामवासः कुनरेन्द्रसेवा
कुभोजनं क्रोधमुखी च भार्या ।
कन्याबहुत्वं च दरिद्रता च
षड् जीवलोके नरका भवन्ति ॥ १५ ॥

यावज्जरा विषधरी न च मां दुनोति
व्याघ्रो न यावदुपसर्पति मृत्युनामा ।
संसारगह्वरगुहागिरिवर्त्मनो तु(ऽत्र ?)
तावद्विवेक ! मम दर्शय मुक्तिमार्गम् ॥ १६ ॥

धर्मो मङ्गलमुत्तमः सुरनरश्रीभुक्तिमुक्तिप्रदो
धर्मः स्नेहति(स्निह्यति) बन्धुवद्, दिशति च(नः?) कल्पद्रुम(द्रुवद्)
वाञ्छितम् ।

धर्मः सद्गुणसङ्गमे गुरुरिव स्वामीव राज्यप्रदो
धर्मः पाति पितेव वत्सलतया मातेव पुष्णाति च ॥ १७ ॥

गोत्रं पवित्रं जननी कृतार्था
वसुन्धरा भाग्यवती च तेन ।
अपारसंवित्सुखसागरेऽस्मिन्
लीनं परब्रह्मणि यस्य चेतः[1] ॥ १८ ॥

अर्था पादरजस्समा गिरिनदीवेगोपमं यौवनं
मानुष्यं जलबिन्दुलोलतरलं फेनोपमं जीवितम् ।
धर्मं यो न करोति निश्चलमतिः स्वर्गार्गलोद्घाटनं
पश्चात्तापहतो जरापरिणतिं(तः/तौ) शोकाग्निना दह्यते ॥१९॥

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्द्धं गतं
तस्यार्द्धस्य च मर्द्ध (परस्य) चार्द्धमपरं बालत्ववृद्धत्वयोः ।
शेषं व्याधिवियोगशोकसहितं सेवादिभिर्नीयते
जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम्[2] ॥ २० ॥

धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते ।
अजागलस्तनस्येव तस्य जन्म निरर्थकम् ॥ २१ ॥

केऽपि सहस्रम्भरयः लक्षम्भरयश्च केऽपि नराः ।
नात्मम्भरयस्तदपि (च) फलमखिलं सुकृतदुःखयोः(दुष्कृतयोः) ॥२२॥

धर्मः पिता क्षमा माता दया भार्या गुणाः सुताः ।
कुटुम्बं सुधिया (यः) तस्य मे(ह्ये)तदन्ये च (तु ?) विभ्रमाः ॥ २३ ॥

अभ्यर्चनैर्जिनानां धर्मश्रवणेन तत्त्वचिन्तनया ।
साधुजनवन्दनेन च दिनानि यान्तीह पुण्यवताम् ॥ २४ ॥

---

1. लघुयोगवासिष्ठान्ते दृश्यते । २. वैराग्यशतके ४९

धर्मे रागः श्रुते चिन्ता दाने व्यसनमुत्तमम् ।
इन्द्रियार्थेषु वैराग्यं सम्प्राप्तं जन्मनः फलम् ॥ २५ ॥

चला लक्ष्मीः चलाः प्राणाः चलं जीवनयौवनम् ।
चलाचलस्य(लेऽस्मिन्) संसारे धर्म एको हि निश्चलः ॥ २६ ॥

अस्थिरं गृहमारम्भम्(?) अस्थिरं धनयौवनम् ।
अस्थिरं जीवितं लोके धर्मकीर्तियशः स्थिरम् ॥ २७ ॥

दानं वित्ताद् ऋतं वाचः कीर्तिपुण्ये तथायुषः ।
परोपकरणं कायाद् असारात्सारमुद्धरेत् ॥ २८ ॥

धनदो धनार्घि(र्थि)नां प्रोक्तः[1] कामदः सर्वकामिनाम् ।
धर्म एवापवर्गस्य पारम्पर्येण साधकः ॥ २९ ॥

धर्माद्धनं धनत एव समस्तकामाः
कामस्य(कामेभ्य) एव सुखमिन्द्रियजं समग्रम् ।
कार्यार्घि(र्थि)ना हि खलु कारणमेषणीयं
धर्मो विधेय इति तत्त्वविदो वदन्ति ॥ ३० ॥

॥ इति धर्माधिकारः ॥

न वीतरागादपरोऽस्ति देवो
न ब्रह्मचर्यादपरं तपोऽस्ति ।
न चापि दानादपरो गुणोऽस्ति
परोपकारादपरो न धर्मः ॥ ३१ ॥*

* * *

---

1. अक्षरमेकमधिकम् ।

* इतः परं जिनपूजाया विशेषो बहुभिः श्लोकैरुक्तः ; तत्र सुभाषितभूताः केचन श्लोका एवात्र दीयन्ते ।

देवपूजा दया दानं दाक्षिण्यं दमदक्षि(क्ष)ता(ते) ।
यस्यैते षट् दकाराः स्युः देवांसी(शी) नर उच्यते ॥ ३७ ॥

देवपूजा गुरूपास्ति(:) स्वाध्यायः संयमस्तपः ।
दानं चेति गृहस्थानां षट् कर्माणि दिने दिने ॥ ३८ ॥

पूजाकोटिसमं स्तोत्रं स्तोत्रकोटिसमो जपः ।
जपकोटिसमं ध्यानं ध्यानकोटिसमो लयः ॥ ३९ ॥

* * *

देव त्वत्करनीरदे दिसि(शि) दिसि(शि) प्रारब्धपुण्योन्नतौ
चञ्चत्काञ्चनरत्नराजितडिति स्वर्णामृतं वर्षति ।
स्फीता कीर्तितरङ्गिणी समभवत् तृप्ता गुणग्रामभूः
पूर्णं चार्थि(र्थि)सरः शशाम विदुषां दारिद्र्यदावानलः ॥ ४५ ॥

दानं ख्यातिकरं सदा हितकरं संसारसौख्याकरं
नृणां प्रीतिकरं गुणाश्रयकरं लक्ष्मीकरं किङ्करम् ।
स्वर्गावासकरं गतिक्षयकरं (नि)र्वाणसम्पत्करं
वर्णायुर्बलबुद्धिवर्धनकरं दानं प्रदेयं बुधैः ॥ ४६ ॥

दानं सुपात्रे वसिदं(?) च शीलं
तपो विशुद्धं शुभभावना च ।
भवार्णवोत्तारणयानपात्रं
धर्मं चतुर्धा मुनयो वदन्ति ॥ ४७ ॥

उत्पादिता स्वयमियं यदि तत्तनूजा
तातेन वा यदि तदा भगिनी खलु श्रीः ।
यद्यन्यसङ्गमवती च तदा परस्त्रीः
तत्यागंच(?) मनसः सुधियस्ततोऽमी ॥ ४८ ॥

सञ्चितं वपुषि नोपयुज्यते
याचितं गुणवते न दीयते ।
तत्कदर्यपरिरक्षितं धनं
चोरपार्थि(र्थि)वगृहेषु भुज्यते ॥ ४९ ॥

दानं दरिद्रस्य विभो(:) प्रशान्ति-
र्यूनां तपो ज्ञानवतां च मौनम् ।
इच्छानिरोधस्य(श्च) सुखोचितानां
दया च भूतेषु दिवं नयन्ति ॥ ५० ॥

दानं महिमनिदानं कुशलनिदानं कलङ्ककरिसिंहः ।
श्रीकलकण्ठीभू(चू)तः सिद्धवधूसङ्गमे दूतः ॥ ५१ ॥

बुद्धैः(द्धेः) फलं सत्त्वविचारणां(णा) च
देहस्य सारं व्रतधारणं च ।
अर्घ(र्थ)स्य सारं किल पात्रदानं
वाचः फलं प्रीतिकरं नराणाम् ॥ ५२ ॥*

अर्थेन किं कृपणहस्तमुपागतेन
ज्ञानेन किं बहु शठाकुलमक्षरेण(मत्सरेण !) ।
रूपेण किं गुणपराक्रमवर्जितेन
मित्रेण किं व्यसनकालपराङ्मुखेन ॥ ५४ ॥

दानेन पाणिर्न तु कङ्कणेन
मानेन वृत्तिर्न च भोजनेन ।
धनेन कान्तिर्न च चन्दनेन
ध्यानेन मुक्तिर्न च दर्शनेन ॥ ५५ ॥

* श्लो. ५३ पत्रभङ्गान्नष्टः

अधः क्षिपन्ति कृपणा वित्तं तत्र यियासवः ।
सन्तस्तु गुरुतीर्थादौ तदुच्चैःपदकाङ्क्षिणः ॥ ५६ ॥

मृत्युः शरीरगोप्तारं रक्षितारं धनं धरा ।
दुश्चारिणीव (च) हसति पितरं पुत्रवत्सलम् ॥ ५७ ॥

आपदर्थे धनं रक्षेत् भाग्यभाजः क्व आपदः ।
दैवं हि कुप्यति क्वापि सञ्चितोऽपि विनश्यति ॥ ५८ ॥

भोगो ना(शः) तिस्रः[1] * * ॥ ५९ ॥

वपुः पवित्रीकुरु तीर्थयात्रया
चित्तं पवित्रीकुरु धर्मवाञ्छया ।
वित्तं पवित्रीकुरु पात्रदानतः
कुलं पवित्रीकुरु सच्चरित्रैः ॥ ६० ॥ *

त्यागेन हीनस्य कुतोऽस्ति कीर्तिः
सत्येन हीनस्य कुतोऽस्ति पूजा ।
न्यायेन हीनस्य कुतोऽस्ति लक्ष्मीः
ध्यानेन हीनस्य कुतोऽस्ति सिद्धिः ॥ ६१ ॥

फलमुत्तमं सुपात्रे
दानं विभवस्य मध्यमं भोगः ।
अधमं व्यसने व्ययगति-
रधमाधममवनिविन्यासः ॥ ६२ ॥

कोपं चम्पक मुञ्च याचकजनैरायासितो वर्तसे[2] ।
* * * ॥ ६३ ॥

1. भ. ह. नीतिशतके ३४
* अत्र पत्रे उपरि प्राकृतसुभाषितगाथैका लिखिता ।
2. दृश्यतां सुभाषितरत्नभाण्डागारः; ५ वृक्षान्योक्तयः ७०

किं जातोऽसि चतुष्पथे[1] * * ॥ ६४ ॥

जले तैलं खले गुह्यं पात्रे दानं मनागपि ।
प्राज्ञे शास्त्रं स्वयं याति विस्तारं वस्तुशक्तितः ॥ ६५ ॥

याचके कीर्तिघोषाय स्नेहपोषाय बन्धुषु ।
तच्च सर्वोत्तमं पात्रे दानं न क्वापि निष्फलम् ॥ ६६ ॥

वितर वारिद वारि त्रि(तृ)षातुरे[2]
* * * ॥ ६७ ॥

विरम चातक दैन्यमपास्यतां
बत चटूनि कथं नि(नु) करिष्यसे(सि) ।
विधिविनिर्मितमम्बु कणद्वयं
किमधिकं कलयापि भविष्यसि(ति) ॥ ६८ ॥

अन्ये ते जलदायिनो जलधराः[3] * * ॥ ६९ ॥

कोशं विकासय कुशेशय संश्रितालीप्रीतिं कुरुष्व यदयं दिवसस्तवास्ते ।
धा(रा)त्र्यागमे निव(वि)डराजकरप्रतापे
दौस्थे(स्थ्ये) पुनस्तव समेष्यति कः समीपे ॥ ७० ॥

निजकरनिकसन(निकर)समृद्ध्या[4] * * ॥ ७१ ॥

दाने तपसि सूर्ये(शौर्ये ?) वा विज्ञाने विनये नये ।
विस्मयो न हि कर्तव्यो बहुरत्ना वसुन्धरा ॥ ७२ ॥

॥ इति दानाधिकारः ॥

---

1. अयं प्रसिद्धः श्लोकः ।
2. सुभा. र. भा. ५. मेघ. ३३ 3. शा. पद्धतौ ८६२. 4. तत्रैव ७५२.

॥ अथ सज्जनोपरि ॥

जात्यन्धः परदोषवीक्षणविधौ षण्डः परस्त्रीरतौ
निस्त्रिंशान्तरवैरिवर्गहनने पङ्गुः कुमार्गायते(ने) ।
मूको मर्मणि वित्त्वदैवतगुरुः* प्राघूर्णके चाग्रही
जीयादात्मगुणस्तुतौ च बधिरो लोकोत्तमोऽसौ नरः ॥ ७३ ॥

येषां मनांसि करुणारसरञ्जितानि
येषां व(चां)सि परदोषविवर्जितानि ।
येषां धनानि सकलार्थिजनाश्रितानि
तेषां कृते च(व)हति कूर्मपते(ति)र्द्धरित्रीम् ॥ ७४ ॥

विदूयमानोऽपि खलेन साधुः
सदोपकारं क्रियते(कुरुते) गुणै(:) स्वैः ।
निपीड्यमानोऽपि तुषाररश्मी
राहुः(हुं) न किं प्रीण(य)ते सुधाभिः ॥ ७५ ॥

आदिमध्यनिधनेषु सौहृदं[1] * * ॥ ५६ ॥

चेतः सार्द्ध(स्वार्द्र?)तरं वचः समधुरं दृष्टिः प्रसन्नोज्ज्वला
शक्तिः क्षान्तियुता श्रुतं हतदमं(मदं) श्रीर्दैन्यदैत्यापहा ।
रूपं शीलयुतं मतिः श्रितनया स्वामित्वमुच्छेकता-
निर्मुक्तं प्रकटान्यहो नवसुधाकुण्डान्यमूनि प्रभो ॥ ७७ ॥

विपयि(दि) धैर्यम्[2] * * ॥ ७८ ॥

गर्वं नोद्वहते न निन्दति परं नो भाषते निष्ठुरम्
उक्तः केनचिदप्रियाणि सहते क्रोधं च नालम्बते ।

---

*वित्त्वे ज्ञाने दैवतगुरुः बृहस्पतिः ।

1. सुभाषितावलौ २५७ 2. भ. ह. नी. श. ५२

श्रुत्वा काव्यमलक्षणं परकृतं सन्तिष्ठते मूकवत्
दोषा:(न्) छादयते स्व(स्म)यं न कुरुते ए(ह्ये)तत्सतां लक्षणम् ॥७९॥

ऊ(औ)चित्येन (च?)वातता(वक्तृता) शु(सु)भगा(गता) शीलेन सत्येन गीः
श(स)त्येन स्थिरता शमेन विभुता बुद्धिर्गुणैरष्टभिः ।
आचारेण कुलीनता जिनगुरुप्रीत्या च धर्माधिं(र्थि)ता
यस्येत्थं गुणसन्ततिर्निजगुणैरेवोन्नतिं लम्भिता ॥ ८० ॥

प्रदानं प्रच्छन्नं गृहमुपगते सम्भ्रमविधिः[1] * * ॥ ८१ ॥

दानोन्नता श्रीः शु तमं प्रसाद (श्रुतमप्रमादं)
शक्तिर्दयार्द्रा विनयी प्रभावः ।
निर्व्याजवैदग्ध्यभि(नि)धिः सतां धीः
परोपकाराभरणः स्वभावः ॥ ८२ ॥

केचित्प्रवालमिव रागभृतः स्वयं स्युः
केचिच्च चूर्णकणवत् पररङ्गयोग्याः ।
काक्ष्मी(श्मी)रजात इव सौरभपूरगौराः
धन्याः पुनः स्वपु(प)ररञ्जन(क)तां भजन्ति ॥ ८३ ॥

नमन्ति फलिता वृक्षाः नमन्ति विबुधा जनाः ।
शुष्ककाष्ठं च मू(र्खा)श्च भज(ञ्ज)न्ति च(न) नमन्ति च ॥ ८४ ॥

न[च]हसति नान्यं निन्दति
न परं परिभवति नाप्रियं वदति ।
नाप्रियकथां च कथयति
लक्षणमेतत्कुलीनस्य ॥ ८५ ॥

1, भ. ह. नी. श. ५७

असतां सङ्गदोषेण यदङ्गं मलिनीकृतम् ।
त(द)हं धौतुमिच्छामि साधुसङ्गतिवारिणा ॥ ८६ ॥

एकस्य तस्य मन्ये धन्यामभ्युन्नतिं जलधरस्य[1]
* * * ॥ ८७ ॥

आपदः सन्ति महसां(तां) महतामपि सम्पदः ।
इतरेषां मनुष्याणां नापदो न च सम्पदः ॥ ८८ ॥

लज्जति दीर्घं पश्यति पीडां सहते परं न पीडयति ।
अवमन्यन्ते(ते) न किं(कं)चित् लक्षणमेतत्कुलीनस्य ॥ ८९ ॥

सम्पदि यस्य न हर्षो(र्षः)[2] * * * ॥ ९० ॥

दातरि दमिनि दयालुः(लौ) दाक्षिण्यनिधौ च देवगुरुः(रौ) ।
भक्तिः, अपु(प)रुषि(ष)भाषिण(णि) पुर(रु)षे दृष्टे, दृष्टे! कृतार्थासि
॥ ९१ ॥

वदनं प्रसादसदनं[3] * * * ॥ ९२ ॥

स्पृहणीया कस्य न ते सततं श(स)रलास(श)या महात्म(मा)नः ।
त्वयमपि सदृशं येषां वचनं हृदयं समाचारः ॥ ९३ ॥

चन्दनं शीतलं लोके चन्दनादपि चन्द्रमाः ।
चन्द्रचन्दनयोर्मध्ये शीतलं(ला) साधुसङ्गतिः ॥ ९४ ॥

न तथा शशी न सलिलं न चन्दनरसो न शीतलच्छाया ।
प्रह्लादयन्ति पुर(रु)षं यथा हि मधु(रा)क्षरा वाणी ॥ ९५ ॥

स्वस्त्यस्तु सज्जनेभ्यो येषां हृदयानि दर्पणनिभानि ।
दुर्वचनभश्म(स्म)शं(सङ्)गादधिकतरं निर्मलानि स्युः ॥ ९६ ॥

---

1. शा. प. ७६५
2. प्रसिद्धोऽयं श्लोकः
3. सु. र. भा. २. सज्जन. १०३

अहो सुमनसां प्रीतिः वामदक्षिणयोः समा ।
अञ्जल(लि)स्थानि पुष्पाणि वासयन्ति करद्वयम् ॥ ९६ ॥

यद्यपि रटति सरोषं[1] ॥ ९७ ॥

विपदि परेषां सन्तः समधिकतरमेव भजति(दधति) सौजन्यम् ।
ग्रीष्मे भवति(न्ति) तरवो घनकोमलपल्लवच्छायाम् (याः) ॥ ९८ ॥

प्रच्छादयति दुरात्मा सुजन(नः) प्रघ(क)टयति परा(र)गुणानेव ।
तिरयति भुवनानि तमस्तान्येव रविः प्रकाशयति ॥ ९९ ॥

यथा चित्तं तथा वाचः[2] ॥ १०० ॥

शर्करान्त(राघ)स्तृणीभूता क्षीर(रं) नीरवहं(निभं ?) सदा ।
द्राक्षा संकुचिता भीता सज्जनानां गिरः पुरः ॥ १०१ ॥

शूरास्सन्ति सहस्रशः[3] ॥ १०२ ॥

निन्दन्तु नीतिनिपुणाः[4] ॥ १०३ ॥

प्रारभ्यते न खलु[5] ॥ १०४ ॥

परोपकारैकपरां(रा) परेषां
दोषान् गुणत्वेन स(वि)वर्तयन्ते ।
सुस्वादुतां भस्यम(स्वस्य) गुणा(णैः) नयन्ति
क्षारं घना वारिधिवारि यद्वत् ॥ १०५ ॥

---

1. सु. र. भा. सिंह १७
2. सु. र. भा. २. सजन ३६
3. क्षेमेन्द्रस्य शशिवंशे; दृश्यतां तस्य औचित्यविचारचर्चा.
4. भ. ह. नी. श, ७४ 5. तत्रैव

एकोऽपि यः सकलकार्यविधौ सम(र्थः)
सत्त्वाधिको भवति किं बहुभिः प्रसूतैः ।
चन्द्रः प्रकाशयति दिङ्मुखमण्डलानि
तारागणः समुदितोऽप्यसमर्थ एव ॥ १०६ ॥

रत्नाकरः किं कुरुते पदा(रा)र्थैः[1] ॥ १०७ ॥

कनकभूषणसङ्ग्रहणोचिते(तो)
यदि मणिस्त्रि(स्त्र)पुणि प्रतिबध्यते ।
न स विरौति न चालि(पि) न शोभते
भवति योजय(यि)तुर्वचनीयता ॥ १०८ ॥

संतप्तायसि संस्थितस्य[2] ॥ १०९ ॥

परोपकारैकरतिर्निरा(री)हता
विनीतता म(नि)त्यमनुष्णचित्तता ।
विद्याविनोदोऽनुदिनं न दीनता
गुणा इमे सत्त्ववतां भवन्ति ॥ ११० ॥

हंसा गति(तिं) पिकयुवा कलकूजितानि
नृत्यं स(शि)खी परमसू(शौ)र्यगुणं मृगेन्द्राः ।
सौरभ्यशीतलगुणं मलयाद्रिवृक्षाः
कैः शिक्षिता विनयकर्म तथा कुलीनाः ॥ १११ ॥

॥ इति (सज्ज)नाधिकारः ॥

(अनुवर्त्ति)

---

1. सु. र. भा. २. सज्जन १७१
2. भ. ह. नी. श. ५८

॥ जगन्मोहनम् ॥*

शैवस्त्रीवर्णना—

विभूतिरेखाविलसन्निटाला
　　ताम्बूलरागारुणदन्तचेला ।
विराजते राजपथे सुशीला
　　शातोदरी काचन शैवबाला ॥ १ ॥

आबद्धरुद्राक्षमयोरुहारा
　　किरीटकाञ्चीकटकादिभूषा ।
कराक्षमालाकलनानुमेया
　　पञ्चाक्षरीमन्त्रजपास्ति शैवी ॥ २ ॥

कौशेयं परिधाय काशविशदं कौसुम्भकूर्पासकं
　　धृत्वा सत्वरमेति भूतितिलकोद्दीप्तालिका बालिका ।
कासौ कम्बुगला क्वणत्कटितला काश्मीरगौरी कला-
　　कान्तास्या कलभाषिणी करिगतिः कर्पूरगौरस्मिता ॥ ३ ॥

कर्णाटकस्त्री—

केशान्तरालगतकेतकिपत्रजालं
　　कस्तूरिकाकलुषकोमलकर्णमूलम् ।
विन्यस्तकुङ्कुमविशेषकमुत्पलाक्षं
　　कर्णाटयौवतमिदं कमनीयवेषम् ॥ ४ ॥

---

*इदं मद्रपुरी-हस्तलिखितग्रन्थालयस्थाया (D. 12049) मातृकाया उद्धृत्य डा. न. गङ्गाधरेण दत्तम् । काव्यमेतदधिकृत्य लघु किमपि विवरणं डा. C. कुन्हन् राजाभिनन्दनग्रन्थे (पृ. ४८३-६) प्रकाशितम् । नानास्त्रीवर्णनपरमिदं पूर्णं वा अपूर्णं वा, अस्य रचयिता क इत्यादि न ज्ञायते । कर्ता नूनं दाक्षिणात्यः । तत्र तत्र किंचित् परिशोध्य टिप्पण्यात्र मुद्रितम् ॥

करकलितचारुवीटी कठिनकुचन्यस्तकनकमयशाटी ।
कान्ति(न्त्या ?) कामवधूटी कल्याणी काचिदेति कर्णाटी ॥ ५ ॥

कल्पितमृगमदतिलकं कर्णपरिस्फुरितकनकताटङ्कम् ।
कवलयति मानसं मे कान्तं कर्णाटकामिनीवदनम् ॥ ६ ॥

घननिविडतनीयः कञ्चुलीप्रान्तकिञ्चि-
त्प्रकटितकुचलीला भान्ति कर्णाटबालाः ।
रुचिरतिलकफाला रुक्मताटङ्कखेलाः
परिभरितकपोलाः प्रौढनर्मोक्तिशीलाः ॥ ७ ॥

आन्ध्रस्त्री—

गण्डस्थलस्फुरितकाञ्चनकर्णपत्रं
नासाविलोलनवमौक्तिकलोभनीयम् ।
आबद्धकञ्चुकमलक्षितमध्यभागम्
आयाति बृन्दमिदमान्ध्रविलासिनीनाम् ॥ ८ ॥

धम्मिल्लमध्यविनिवेशितहल्लकानां
ताटङ्करुद्धतरलायतलोचनानाम् ।
आनाभिकञ्चुकजुषाममलाम्बराणाम्
आयाति बृन्दमिदमान्ध्रविलासिनीनाम् ॥ ९ ॥

अंसालम्बितगर्भपो(को)रुकबरीभारा ललाटस्फुर-
न्मुक्तास्यूतललाटिकाः सतिलका लोलाञ्जनाक्तेक्षणाः ।
चञ्चत्काञ्चनकर्णपत्रसुषमाः स्वल्पाभकूर्पासकाः
प्रायश्शीलितवीटिकारुणधरा[1] भान्ति त्रिलिङ्गाङ्गनाः ॥ १० ॥

---

1. अरुणवर्णधरा इत्यर्थः ।

(यवनी)—

[2]यवनी नववीतकोमलाङ्गी
शयनीये यदि नीयतां कदाचित्।
अवनीतलमेव साधु मन्ये
न वनी माधवनी विनोदहेतुः ॥ ११ ॥

हेमकारस्त्री—

ओष्ठकान्तिपरिभूतप्रवाला[3]
इन्द्रनीलमणिभासुरचोला।
भाति भूपतिपथे च सुशीला
स्वर्णकारकुलभूषणबाला ॥ १२ ॥

भस्मत्रिपुण्ड्राङ्कितफालभागा
तन्मध्यरक्ताङ्कितचित्रका च।
उरोजमध्याङ्कितलिङ्गपीठा
विराजते काचन हेमकारी[4] ॥ १३ ॥

सुप्ता—

एकं नितम्बफलके विनिवेश्य बाहु-
मन्यं च वेष्टितमधश्शिरसो निधाय।
श्वासानिलोच्चलितमौक्तिकशोभिनासा
शेतेऽधुना सुखमियं सरसीरुहाक्षी ॥ १४ ॥

---

2. प्रसिद्धोऽयं श्लोको जगन्नाथपण्डितस्येति प्रायोवादः।

3. वृत्तभङ्गः, विसन्धिश्च।

4. इयमपि प्रथमोक्तवीरशैवमतानुयायिनी स्वर्णकारवृत्तिस्त्रीति भाति।

शयनोत्थायिनी—

दोर्मूलद्वितयावरुद्धवसनोद्भिन्नस्तनोच्छेदया
विभ्रत्या करपल्लवेन शिथिलं क्षामं स्फुरन्मेखलम् ।
निद्रान्तान्तदृशा नताङ्गलतया विश्लिष्टधम्मिल्लया
पर्यङ्कान्मणिपादुकार्पितपदं तन्व्या समुत्थीयते ॥ १५ ॥

उत्थाय शय्यातलतः कुमारी
हस्तेन नेत्रे च विमर्दयन्ती ।
एकेन धृत्वा शिथिलां च नीवीं
शनैश्शनैर्द्वारसमीपमागता ॥ १६ ॥

एकेन शीर्णकबरीमितरेण नीवीम्
आबिभ्रती रतिकलाशिथिलां करेण ।
निद्राभरालसदरारुणनेत्रकोणा
ताम्बूलमुद्गिरति तालफलस्तनीयम् ॥ १७ ॥

प्रातः कुमारी कलशं गृहीत्वा
वामेन हस्तेन च वामनेत्री ।
एकेन हस्तेन कुचोत्तरीयं
सङ्क्रामते(?) गच्छति कामुकीयम् ॥ १८ ॥

दन्तधावनी—

बिभ्राणा करपल्लवेन मुकुरं वामेन वामेक्षणा
रम्या भोगनितम्बचुम्बितशिखा किञ्चिच्चलत्कर्णिका ।
गुञ्जन्मञ्जुलकङ्कणा विचलितग्रीवा सखीजल्पितां
वाचं कामपि शृण्वती मुहुरियं दन्तावलिं धावति ॥ १९ ॥

पश्यन्ती मुकुरेऽधरक्षततर्तिं किञ्चित्प्रकम्पस्तनी
पश्चादंसविलम्बमानकबरीभारा रणत्कङ्कणा ।
धावन्ती मृगनाभिसौरभमिलद्वीटीरसं चञ्चल-
त्ताटङ्का खदिरेण कुन्दरदना दन्तान्मुदा धावति ॥ २० ॥

आदर्शप्रतिबिम्बितं मुखं [5]मनागालोकयन्ती शनै-
रङ्गुल्या परिमार्जती रदपदम् [6]आर्द्रं प्रसार्याधरम् ।
कर्णान्तायतलोललोचनयुगा काचिज्जगन्मोहिनी
दन्तान् धावति चत्वरे सललितं बाला क्वणत्कङ्कणम् ॥ २१ ॥

[7]यावत्तावत् कुवलयदृशा मृज्यते दन्तपालि-
स्तावत्तावद्द्विगुणमधरच्छायया शोणरोचिः ।
काचित्तस्याः परिमलकलाहूतमुक्तालिकान्त्या
चक्रश्वासे प्रसरति मुहुश्श्यामिकाप्याविरासीत् ॥ २२ ॥

मुखक्षालिनी—

[8]मुग्धा मुखक्षालनमाचरन्ती
पानीयमानीय करद्वयेन ।

5, 6. वृत्तभङ्गः

7. अयं श्लोकः सर्वथा भिन्नेनोत्तरार्धेन सदुक्तिकर्णामृते उपलभ्यते (श्लो. 500); तत्र कविर्नाम देवबोध इति दृश्यते । अत्र दृष्टे उत्तरार्धपाठे आहूतमुक्ताः प्रसाधनसामग्री-हेतोराहूता मुक्ता विसर्जिताश्च; आलयः सख्यः, तासां कान्त्या पुरतः तिष्ठन्तीनां तासां छायया; चक्र-श्वासे अनुस्यूततया प्रवृत्ते श्वासे इति योजनीयम् ॥

8. श्लोकोऽयं अमुद्रिते साहित्यचिन्तामणिनामके अलङ्कारग्रन्थे दृश्यते (८. ४४); प्रसिद्धस्य प्राचीनस्य कलशकनाम्नः कवेः 'आत्तनात्तमधिकान्तमुक्षितुं कातरा शफर-शङ्किनी जहौ । अञ्जलौ जलमधीरलोचना लोचनप्रतिशरीरलाञ्छितम् ॥' इति श्लोकस्यानु-कृतिभूतश्च ।

जलाञ्जलौ नेत्रयुगं विलोक्य
मीनेक्षणा मीनभयान्मुमोच ॥ २३ ॥

तिलकधारिणी—

वामेन हस्तेन च वामनेत्रा
पीताभवक्ता मुकुरं वहन्ती ।
विलोलनेत्रा मृगनाभिचित्रं
ललाटभागे तिलकं ददाति ॥ २४ ॥

फालभागरचितं मनोहरं
बाह्लिकासु तिलकं विराजते ।
तारकासहितचन्द्रसुमुख्याः
चन्द्रबिम्बजनितारुणबिम्बम् ॥ २५ ॥[9]

कस्तूरिकाचित्रकशोभमानं
चन्द्रास्यवक्त्रं रुचिरं विभाति ।
सुधांशुबिम्बं परिपूर्णशोभं
पाकारिनीलोपलकान्तिचिह्नम् ॥ २६ ॥

हरिद्रापेषिणी—

पृथुलजघनभारं मन्दमान्दोलयन्ती
प्रचलितकुचकुम्भा सभ्रमत्कर्णपूरा ।
मृदुचलदलकान्ता मुग्धपुम्भावलीला-
मभिनयति हरिद्रापेषणच्छद्मनैषा ॥ २७ ॥

---

9. अर्धयोर्वृत्तद्वयं योजितम् ।

अभ्यञ्जयन्ती—

लाक्षारञ्जितपादकञ्जयुगले विन्यस्य पाणिद्वयं
शीर्षे चम्पकतैलमुज्ज्वलतरं तन्व्या दधत्या शनैः ।
उद्वेल्लत्करकङ्कणद्वयरवं शृण्वन्विलोलत्कुच-
प्रोद्यन्मौक्तिकमञ्जरीमनुकलं पश्यन् प्रियो मोदते ॥ २८ ॥

सक्तोरुद्वितयातिमात्रविचलच्छ्रोणी विवल्गत्कुचा
धर्माम्भोलुलितालका क्रमचलत्पाणिक्वणत्कङ्कणा ।
मुग्धाभ्यञ्जनकर्मणा श्रमनमन्मध्याङ्कमारोपिता
कान्तेनाभिमुखीयमार्द्रपुलका श्लिष्टामुना चुम्बिता ॥ २९ ॥

अभ्यक्ता—

बालां तमालनीलां योग्यां तैलानुलेपललिताङ्गीम् ।
तैजनतैलनिषिक्तां शङ्के शृङ्गारयोनिखङ्गलताम् ॥ ३० ॥

उत्सारितैकमणिकर्णिककर्णपूर-
मुन्नद्धकेशचयमुज्झितभूषणं ते ।
आधौतदन्तमुकुलं स्मितपुष्पितेष्ट(तोष्ठ)-
मभ्यक्तमङ्गमिदमातनुते मुदं न(नः) ॥ ३१ ॥

स्नाता—

सरसि सपदि कान्ता(तां) स्रस्तकाञ्चीकलापा(पां)
सरसमृदुपटान्तर्दृश्यमानोरुमूला(लाम्) ।
अनिभृतदृशमाराद्वीक्ष्य पर्यस्तनाभ्या-
मजनि मदनहस्ते वर्तमानं मनो मे ॥ ३२ ॥

स्नातोत्थिता—

स्वच्छाङ्गे नवमज्जनादरुणिमप्रोल्लासनेत्रोत्पला
ज्योत्स्नापूरविपाण्डुराम्बरधरा रात्रिर्यथा शारदी ।

बिभ्राणा करपल्लवेन कचरीमार्द्रामियं दृश्यते
श्रीः शृङ्गारसुधापयोधिसलिलादभ्युत्थितेवापरा ॥ ३३ ॥

चतुर्थस्नाता—

चतुर्थेऽह्नि स्नातां त्रिदिनविरहात् पाण्डुरमुखीं
रजोमुक्तां तन्वीं धवलदशनां शुभ्रवसनाम् ।
[1] हरिद्राह्वीबेरप्रचुरपटुगन्धां प्रणयिनीं
स धन्यो यो भुङ्क्ते च्युतकुसुमशेषामिव लताम् ॥ ३४ ॥

अच्छाच्छचेलदरदृष्टनिजोरुकान्ति-
निर्मुक्तसङ्गमतया जडतालसाङ्गी ।
आपाण्डुगण्डनिपतत्सरलालकाग्रा
स्नात्वा समेति सुतनुर्दिवसे तुरीये ॥ ३५ ॥

बालातपसेवित्री—

पश्चाद्वीर(?)निषण्णया नखमुखैः पर्यायतः कुञ्चितैः
विश्रंसां(विस्रस्तां) विनिकीर्य केशकबरीमाबद्धसीमन्तया ।
सख्या साकमुदीरितस्वरजनीसम्भोगवार्तामृता
बाला सौरभशेषचन्दनवती बालातपं सेवते ॥ ३६ ॥

अंसस्रस्तमनेकगन्धसुरभिं धम्मिल्लमुन्मुञ्चती
बाह्वोर्मूलमनङ्गमङ्गलगु(गृ)हं सन्दर्शयन्ती शनैः ।
शीतांशोः शिशिरावदातदशना शीतांशुबिम्बानना
बाला काचन लोललोचनयुगा बालातपं सेवते ॥ ३७ ॥

बालातप(पोप ?)सेवित्री बालकामविनोदिनी ।
निःश्वासेनोष्म (समुष्णं) मुञ्चती (न्ती) नीरजातनिभानना ॥ ३८ ॥

---

[1] 'ऋतुस्नानोन्मीलन्मदनसदनां चारुवदनाम्' इति पाठान्तरं वर्तते ।

केशसंयन्त्री—

क्रीडासम्भ्रमतः श्लथान् घनरुचः केशान्मिथः सङ्गता-
नुद्यत्कङ्कणनिःस्वनं नखमुखैरुन्मुच्य लीलाञ्चितैः ।
अन्तर्न्यस्तसुगन्धिहल्लकदलैः धम्मिल्लमाबध्नती
मूलेन क्षणदर्शितेन भुजयोर्मुष्णाति यूनां मनः ॥ ३९ ॥

अवकीर्य नखाङ्कुरैः सुगन्धे
नलिननीला(घननीलान)लकानरालकेशी ।
वितनोति विशेषरम्यमेषा
व(द)रसन्दर्शितचारुबाहुमूला ॥ ४० ॥

किमु फलमिता(तरा)ङ्गैः(?) केशपाशं किरन्त्याः
कुटिलतरनखाग्रैः कीरतुण्डाभिरामैः ।
कनकचषकतुल्यं मानिनीमानचाल्यं
मदनजननमूलं भाति चेत्(?) बाहुमूलम् ॥ ४१ ॥

अन्तर्निधाय हृदयान्यपि कामुकाना-
मापिञ्जरेण सह चम्पकगर्भकेण ।
विधे(द्धे ?)यमिन्दुमुखि कुन्तलसंहतिं(तिः) ते
पुष्णाति मन्मथमयूरकलापलक्ष्मीम् ॥ ४२ ॥

अङ्गभञ्जीनी—

आरक्तसङ्कुचदपाङ्गमुदस्तहस्त-
मुन्नम्र(म्रि)तस्तनमृजूकृतमध्यभागम् ।
नीवीसमुच्चल(न)दर्शितनाभिदेशं
निद्रावशेषकलुषं कुरुतेऽङ्गभङ्गम् ॥ ४३ ॥

वस्तिदेशगतविश्लथनीवी-
बन्धुमुन्नमितचारुकुचाग्रम् ।
अङ्गभङ्गसमये वपुरस्या
भात्यनङ्गनतचापसरूपम् ॥ ४४ ॥

उत्फुल्लस्तिमितांशुकं किल मनागुन्मुद्रदन्तच्छदं
प्रातस्तत्सहनाक्षमापरिणहत्वाविष्य(?) वक्त्राम्बुजम् ।
क्लान्तिं हन्त बिभर्त्यसौ सरलितग्रीवासमुल्लासित-
स्तोकान्नम्रपयोधरा प्रतिमुहुर्जृम्भासु बिम्बाधरा ॥ ४५ ॥

घटान् गृहीत्वा कुचकान्तिचोरान्
कासारतोयेषु च मज्जयित्वा ।
वद्ध्वा च बाहु(हा)लतया
.... ॥ ४६ ॥

उरसा कुचकुम्भयुगं क्षामोदरि निर्मितासि यदि वापीम्(वोढुम् ?) ।
कुसुमोचितेन शिरसा कुम्भयुगं कुटिलकेशि किं वहसि ॥ ४७ ॥

रज्ज्वाकर्षिणी—

तिर्यक्पादतले प्रसार्य तरसा रज्जुं विकृष्यानता
कूपान्तर्निहितेक्षणा कुटिलधृ(दृ)क् कुम्भं निपूर्याम्भसा ।
आलोलालकमस्तकङ्कणरवा(वं) पर्यायनृत्यत्कुचं
रज्ज्वाकर्षणतत्परा रमयते रामास्मदीयं मनः ॥ ४८ ॥

ऊर्ध्वान् दोर्वद्धदारुस्थितजघनपदाब्जाश्रुमुक्ताधुना (?)आ-
कर्षन्ती मन्दमन्दं घटगुणमभितो हक्कराभ्यां सलीलम् ।
चक्रौ वापीं विशन्ताविव कुचकलशौ सन्नताङ्गी दधाना
नृत्यन्तौ चाश्रमेयं मम हरति समं मानसं जीवनेन ॥ ९४ ॥

तन्वी चारुपयोधरा सुवदना मञ्जीरशिञ्जान्विता
कुम्भं पूर्य[1] जलेन अंसवसने निक्षिप्य मध्ये करम् ।
तत्रारोहणसन्निवेशितपदां(दा) दृष्टोरुमूलान्तिका
वाप्याः सत्वरमेव गच्छति सखीसम्भाषणे तत्परा ॥ ५० ॥

श्यामा चारुपयोधरा शशिमुखी कुम्भं वहन्ती करे
सोपानेषु निवेशिताङ्घ्रिनिबिडश्रोणीरणत्कङ्कणा ।
नम्रा तोयसमीपमेत्य तरसा कुम्भं निपूर्याम्भसा
धृत्वा चञ्चलचञ्चरीकनयना वाप्याः समागच्छति ॥ ५१ ॥

बाला मृगाक्षी कलशं गृहीत्वा
मञ्जीरशिञ्जान्वितपादपद्मा ।
स्नातुं समागच्छति मन्दयाना
गोदावरीतीरमियं मराली ॥ ५२ ॥

काचिन्मृगाक्षी कलशं गृहीत्वा
मञ्जीरकाञ्चीकटकादिभूषा ।
स्कन्धे तु सख्याः स्वकरं निधाय
स्नातुं समागच्छति मन्दहासा ॥ ५३ ॥

स्नात्वा क्षपायां(?) कलशं(शीं ?) विगृह्य
हैमीमिमाममृत[2]पूरितां च ।
नितम्बभागोपरिलम्बकेशां(शा)
लक्ष्मीः पयोधेरिव गच्छतीयम् ॥ ५४ ॥

---

१ अपशब्दो विसन्धिश्च
२ वृत्तभङ्गः

स्नात्वा तटिन्यां हरिताक्तगात्री
चलार्द्रचेला जलजेक्षणेयम् ।
कुम्भं पयो(यः)पूरितमुद्वहन्ती
कुम्भस्तनी गच्छति कुन्ददन्ती ॥ ५५ ॥

व्रीहिहन्त्री—

पादाभ्यां परितः प्रसारितकणान् पर्यायतश्चिन्वती
पर्यायोद्यतबाहुमूलयुगला पर्यायनृत्यत्कुचा ।
गायन्ती कलकण्ठनादमधुरं चेतोभुवो विक्रमं
यूनामेव मनो निहन्ति न पुनर्व्रीहीनियं कामिनी ॥ ५६ ॥

ईषद्दर्शितनिम्ननाभिरसकृन्निम्नोन्नमन्मध्यमा
पर्यायप्रकटीभवत्कुचतटी पर्यस्तमुक्तालका ।
फूत्कारानलप्रे(शो ?)षिताधरमणिः प्रच्छ(स्वि ?)न्नगण्डस्थली
यूनामेव मनो निहन्ति न पुनर्व्रीहीनियं कामिनी ॥ ५७ ॥

एकेनैव करेण दर्शितभुजामूलं क्षिपन्ती क्रमा-
दुत्क्षिप्तं मुसलं स्मितार्धमुदयद्गीतं मुखं बिभ्रती ।
पर्यायोन्नमितस्तना(तानत)स्तनभरा प्रभि(स्वि)न्नपाट(फाल)स्थली
बाला शाल्यवघातविभ्रममिषा(त्)[अति]क्षुण्णं विधत्ते मनः॥५८॥

पादौ पूर्वपरौ प्रसार्य शनकैः पर्यायतः कुञ्चितौ
बाहुं(हू) लल्लनवल्गितः(तौ ?) स्तनतटावत्यायतौ तन्वती ।
गायन्ती कल(कण्ठ ?)मुग्धमधुरं कामापदानोन्नतिं
श्यामाकौ(का)हतितत्परा वितनुते श्यामा दृशोः कौतुकम् ॥ ५९ ॥

दधिमन्थिनी-

आश्लिष्टालकमाननं श्रमजलैर्व्यावर्तयन्त्यंसयोः
नि:श्वासेन निवारयन्त्यलघुना नेत्रा[1]वकर्षश्रमम् ।
नीवीं सन्दधतीं नितम्बवदनै(चलनै)र्विस्रंसमाना(नां मुहु ?)-
र्बाला तुङ्गपयोधरं(रा) दधि शनैर्मथ्नाति शातोदरी ॥ ६० ॥

अनुक्षणमुपर्यध:स्थिति[:]विपर्ययावर्तन-
क्रमोद्यदधरोत्तराञ्चितरतिद्वयव्यत्ययम् ।
परस्परविघट्टनस्तनभुजान्तरालस्फुरद्-
घनाकृति समुल्लसत्पुलकमेतयोः खेलनम् ॥ ६१ ॥

* * * ॥ ६२ ॥[2]

कज्जलधारिणी-

रतौ च दन्तक्षतचिह्निकाधरा
वधूरियं लोहितलोललोचना ।
आदर्शबिम्बप्रतिबिम्बितानना
दधाति नेत्रे घनसारकज्जलम् ॥ ६३ ॥

वधू स्फुरन्नीलशिलाञ्चितोर्मिका
करेण नेत्रे विनिवेश्य कज्जलम् ।
आस्ये तदङ्गुष्ठमणिप्रभाञ्जिते
न्यस्तं पुरो नेति दधाति शङ्कया ॥ ६४ ॥

---

१ नेत्रं दधिमन्थनरज्जुः

२ ६२-श्लोकोऽश्लीलत्वात् त्यक्तः ।

॥ कुहनाभैक्षव नाम प्रहसनम् ॥*

अय्यलुनाथापराख्य - तिरुमलनाथेन कृतम् ॥

देवानाममृतप्रदानसमये सम्प्राप्तकान्ताकृति-

लीलाचङ्क्रमवल्गितस्तनभरो भास्वद्विभूषावलिः ।

सान्तर्हासवचःप्रपञ्चचतुरस्निग्धालसालोकनैः

पश्यन्नासव[1]वञ्चितासुरगणो नारायणः पातु नः ॥ १ ॥

(नान्द्यन्ते)

सूत्रधारः — (समन्तादालोक्य सानन्दम्[2])

अहो निरङ्कुशा हि[3] वसन्तलक्ष्मीः । तथा हि[4]-

---

* प्रहसनमिदमधिकृत्य मया संस्कृतरङ्गवार्षिकपत्रिकायाः पञ्चमसञ्चिकायामाङ्गल-भाषया विस्तरेण वर्णनं विमर्शनं च कृतम् (१९६७, पृ. ५५-६२)। अस्य पञ्च मातृकाः सन्ति-मद्रपुरीशासकीयहस्तलिखितकोशागारे द्वे (R. २३६१, R. ५२२४), अड्यार्को-शागारे एका (V. १३५४); मैसूर्-कोशागारे च द्वे । तत्र प्रथमनिर्दिष्टाः तिस्रो मातृका आधारीकृत्य अत्र सम्पादितेयं कृतिः । प्रथमनिर्दिष्टा (R. २३६१) मातृका शुद्धतरा, किंतु अपूर्णा ; किंच तस्यां प्राकृतस्थलेष्वपि संस्कृतमेव दृश्यते । तदनुसारिण्येव प्रायः अड्यार्-मातृका ।

प्राकृतस्य प्रायः अशुद्धत्वादत्र संस्कृतच्छायैव दत्ता ।

बोम्मगण्टिगङ्गाधरतनयो ग्रन्थकर्ता आन्ध्रप्रदेशे रेचर्लवंशसर्वज्ञसिङ्गभूपालस्य रसार्णव-सुधाकरकर्तुः (क्रिस्तु १३८१-१४२१) समये तदास्थानान्वितो बभूव । प्रस्तावनायां निर्दिष्टं राजशेखरनगरं राजाचलराचकोण्ड-आख्या रेचर्लराजधानी भवितुमर्हति ॥

पाठनिर्देशे दत्ताः सङ्केताः—A=R. २३६१ ; B=५२२४ ; C-अड्यार्कोशः

1 B. अक्षरभ्रंशः 2. B. पदं नास्ति 3. A. खलु 4. नास्ति

मधुकरमधुरारावै-
मंदकलकलकण्ठमञ्जुलालापैः[1] ।
प्रविकचरसालपाली-
परिमल[2]सुभगैश्च पूरितं भुवनम् ॥ २ ॥

अपि च-

प्रविकासिपङ्कजानां[3]
प्रतिनवपरिफुल्लपुष्पपालीनाम् ।
बहुविधपरिमलभारा-
न्मन्दमिहायाति मलयपवमानः ॥ ३ ॥

(परिक्रम्य नेपथ्याभिमुखमवलोक्य) आर्ये ! इतस्तावत् ।

नटी—(प्रविश्य) आर्य ! इयमस्मि[4] ।

सू०—आर्ये ! राजशेखरनगर[5]लक्ष्मभूतस्य भगवतो गोपिकारमणस्य[6] वसन्तोत्सवदर्शनागतया विदुष्या परिषदा **बोम्मगण्टिगङ्गाधरसुतस्य तिरुमलनाथस्य** कृतिं **कुहनाभैक्षवं प्रहसन**मभिनेतु[7]मादिष्टोऽस्मि ।

न०—युज्यत एव । साम्प्रतं पुनः सन्धि(शान्ति ?)कर्मणि भेतालोदय इव !

सू०—कथमिव ?

---

1. A. °रावैः 2. A. °मलैश्च पूरितं 3. A. C. °कासे पद्मानां
4. C. इयं हि 5. B. C. °नगर° नास्ति 6. B. गोपीनाथस्य
C. °नादस्य 7. B. C. °नेतव्यमिति

न०—आर्य, शृणु[1]। जानासि खलु त्वमपि तव जामातुः[2] स्वभावम् !

सू०—जानाम्येव मूर्खोऽयमिति । ततः किम् ?

न०—स इदानीम् 'अरे ! तव गृहिणी ईदृशी तादृशी' इति प्रातिवेशिकानां प्रलापैः उद्विग्नः (?)[3], तस्याः कर्णयुगलं खण्डयित्वा कालयोगी भविष्यामीति बद्धव्रतः[4] तिष्ठति ।

[5]सू—सा पुनः किमवस्था ?

[6]न—सापि पिशुनालापमूढहृदयस्य गृहिण्येव न भविष्यामीति प्रातिवेशिकानां गृह एव तिष्ठति ।

सू०—अरे ! कथं भवत्या दूरदेशस्थयापि तस्या वृत्तान्तोऽवगतः ?

न०—स्वप्नात्[7] ।

सू०—तर्हि न भेतव्यम्[8] ।

स्वप्नग्रहनिमित्तानि कारणानि न हि स्वतः ।
[9]फलन्ति काकतालीयं प्रजादृष्टानुसारतः ॥ ४ ॥

न०—आर्य ! स्वप्नमात्रेण न भाययामि, विप्रश्निकयापि कथितम् ।

---

1. A. साम्प्रतमित्यारभ्य (पृ. ११३) शृणु इत्यन्तं नास्ति 2. C. °तृ°
3. A. विमुह्य ; B. C. उज्झझन्तो ; 'उज्झित्वा ताम्' इति स्यात् 4. B. त्रुटिः
5. 6. A. सूत्रधारनटीवाक्ये न स्तः 7. C. °प्ने 8. C. द्विर्लिखितम्
9. A. भवन्ति

सू०—आर्ये ! तासामपि वचनं न प्रमाणी[1]क्रियते । छायामात्रग्रहण-प्रतारिण्यः खलु विप्रश्निकाः । प्रतीमस्तावत् ।[2] किमुक्तं तया ?

न०—(संस्कृतमाश्रित्य) आदौ तावन्मयोपनीतं व्रीहिप्रस्थं गृहीत्वा करेण मुखरितकिङ्किणीका[3] शूर्पिकां लोलयन्ती गद्यपद्य[4]रूपेण देवानां तीर्था-नामपि कीर्तनं कृत्वा सजृम्भितोद्गानं[5] घूर्णिताङ्गीदमब्रवीद्, यथा[6]—'अयि भरतपुत्रिके ! कामवल्लीदेवता त्वत्पुत्रीं तत्पतिं चान्योन्यं विघट-यति । तदत्र[7]—

सपुष्पफलताम्बूलं तयोः सङ्गमहेतवे ।
शालिपिष्टं गुडाश्लिष्टं देहि मह्यं क्षणादिति ॥ ५ ॥

सू०—(विहस्य) अहो पश्यतोहरत्वं विप्रश्निकानाम् ! आर्ये[8] ! इयमेव खलु पूर्वमप्यस्मद्गृहे

तण्डुलाढकपिष्टेन कृत्वा कामपि पुत्रिकाम् ।
नीराजयित्वा तां पुत्रीं नेतः पीडेति चाभ्यधात्[9] ॥ ६ ॥

न०—अलं परिहासेन । कथ्यतां तावत् [10]तस्याः तपस्विन्याः [11]तस्य च व्रतिनः कथमिव सङ्घटनं भविष्यति ।[12]

---

1. B. C. प्रामाणिकं 2. B. C. तथा हि (पि?) शृणु (मः?) तावत् 3. A. °क्वो
4. B. C. 'पद्य' नास्ति 5. B. C. °द्गारं 6. B. C. 'यथा' नास्ति
7. A. नास्ति 8. A. नास्ति 9. B. C. °यात् 10. B. एतस्याः
11. B. एतस्य 12. B. 'भविष्यति' नास्ति ; किंतु तत्स्थाने 'कहं विअ संधित्ति' (कथमिव सन्धिरिति) इति दृश्यते

सू०—आर्ये ! किमेतत्[1] ? अचिरप्रवृत्तो मधुमास[2] एव तौ सङ्घटयिष्यति । पश्य-

मधुरोऽयं मधुमासः
पाटलसहकारपरिमलोल्लासैः ।
व्रतिनामपि वा यति(मि)नां
कामपि कुरुते कठोरमुत्कण्ठाम् ॥ ७ ॥

(नेपथ्ये)

साधु, साधु ।

सू०—(आकर्ण्यावलोक्य) आर्ये ! प्रवर्तत एव नाट्यम्[3], यदात्मयोनितीर्थ[4]-शिष्यो दामोदर इत एवाभिवर्तते । आवामप्यनन्तरकरणीयाय सज्जीभवामः ।

(इति निष्क्रान्तौ ।)

॥ इति प्रस्तावना ॥

(ततः प्रविशति दामोदरः ।)

दामोदरः—साधु, साधु । ('मधुरोऽयं मधुमासः' इति श्लोकं पठित्वा) सत्यमेतत् । यतः पूर्वेद्युरस्मद्गुरोर्गोपिकारमणस्य नमस्कारार्थं गतः । तत्र ललितकुसुमसुकुमारां लास्यचतुरां चन्द्रलेखामिव चन्द्ररेखां विलोकयन् रन्ध्रान्वेषिणो मन्मथस्य शरनिकरजर्जरीकृतहृदयः तदारभ्य सात्त्विकोदयपारम्पर्यवशादुज्झितलज्जः उन्मत्तो वर्तते । य एषः-

---

1. A. अन्यत् 2. A. वसन्तकालः 3. A. नादः 4. A °तीर्थ° नास्ति.

तस्याः स्मरन् जपमिषेण निमील्य नेत्रे
न्यासच्छलेन करयुगममितस्ततोऽपि ।
प्रस्तार्य तद्घनपयोधरहेमकुम्भ-
संस्पर्शनाभिनयमातनुतेऽन्तरिक्षे ॥ ८ ॥

किं चायं पञ्चबाणज्वरार्तः ?

आर्द्रं कषायमाधत्ते मस्तकन्यस्तचन्दनः ।
वापीं त्रिषवणस्नानव्याजेन प्रतिगाहते ॥ ९ ॥

अपि च—अहमप्यनेन गुरुणा समादिष्टोऽस्मि—"भद्र ! भवता खल्वखिलभिक्षूणां मध्ये विश्वसनीयशिष्योऽस्मि । तेन तुभ्यमनिवेदनीया[1]भावाद् ब्रवीमि यद्यहं त्वया चातुर्मास्यशतं जीवनीयो, मठो[2]ऽपि वर्धनीयश्चेद् अद्यैव चन्द्ररेखायास्समागमनं सम्पादय" इति । मया च सङ्गमनाय महाराजच्छत्रधारिणः अहम्मदखानतुरुष्कस्य वशे वर्तमानायास्तस्याः सङ्घटनं कर्तुमशक्यमिति निवारितेन तेन मठगतसर्वस्वव्ययेनापि ममाभिलषितं सम्पादयेति सनिर्बन्धं सप्रं (?)[3] प्रार्थितोऽस्मि । अहो, अहो[4] लोकस्य नूतनवस्तुन्यभि[5]-निवेशः ! यतो निरुपमलावण्याया[6] नवनवानुरागायाः[7] शङ्करकौशिक्या निरासेन मधुमासेन च तप्यमानस्य[8] गुरोः कस्यांचिदसत्यानुरागायामपात्रजन्मभूम्यां वारा[9]ङ्गनायामनुरक्तं चेतः !

(वैलक्ष्यं निरूपयति । [10]ततः प्रविशति शङ्करकौशिकी ।)

---

1. B. C. अक्षरभ्रंशः 2. A. °योऽपरोऽपि 3. A. B. एवमेव C. सप्रहा°
4. C. एक एव अहोशब्दः 5. B. अभिमान° 6. °ण्यया, 7. °रागया 8. A निरासेत्थं सेव्यमानस्यापि 9. A. C. वरा° B. परा° 10. B. C. प्रविश्य

शङ्करकौशिकी—अहो गुरोरुन्मादः सर्वङ्कषो वर्तते ! तावद् दामोदरमन्विष्य कारणं पृच्छामि। (इति परिक्रामति।)

दा०—(विलोक्य) सेयं मम प्रियसखी शङ्करकौशिकी। यैषा-

[1]मृद्विन्दुसुन्दरललाटतटाच्छवासाः
प्रस्निग्धमुण्डितशिराः परिपुष्टगात्री।
आभाति पुष्पधनुषोऽपरकर्म[2]काले
रत्या विमुक्त इव नीलवृषो[3] वितन्तुः ॥ १० ॥

(उपसृत्य) भगवत्यभिवादये।

शं०—चिरं जीव।[4]

दा०—कुतस्तावत् प्राभातिकमनुष्ठानं परित्यज्य भगवत्याऽऽगम्यते ?[5]

शं०—भद्र ! गुरोरुन्मत्तचेष्टितमवलोक्य[6] भवन्तं द्रष्टु[7]मागताऽस्मि। कथय, किमेतत् ?

दा०—त्वं तावत् कथय, किं[8] चेष्टितं गुरोः।

---

1. A. मृद्° भ्रष्टम् 2. A. कार्मु° 3. A. निर्वृषणः 4. A. स्वस्ति भवते
5. A. °भिगम्यते B. C. भवत्या° 6. A विलोक्य 7. B. C. प्रष्टुं
8. . C. किं किं

शं॰—

चन्द्ररेखाह्वयेनास्मानाह्वयत्यखिलानपि ।
किमेतदिति पृष्टस्सन् हुङ्कारैस्तर्जयत्यसौ ॥ ११ ॥

अपि च—

न कर्म कुरुते नित्यं प्रेरितोऽपि मुहुर्मुहुः ।
प्रणम्य गोपिकानाथं सुखी स्यामिति भाषते ॥ १२ ॥

दा॰—यत्सत्यं कृष्णप्रतिमाराधनपरायणः खलु गुरुः । ततस्ततः ?

शं॰—ततश्चायं कृष्णप्रतिमासालग्रामादिकं देवताजातमधः पातयित्वा[1] देवपूजापीठमेव[2] चित्रफलकं विधाय गोपीचन्दनमेलनेन दन्तकाष्ठतूलिकया नृत्यन्तीमिव कामपि स्त्रियं लिखित्वा—

दृष्ट्वा स्निह्यति रज्यति प्रणमति प्रोल्लङ्घते गायति[3]
स्वाश्रून्मार्जन[4]भावनां वितनुते बध्नाति मिथ्या शिखाम् ।
साटोपं कुरुते कमण्डलुमुखे लीलामृदङ्गध्वनिं
रागेण च्छुरिका[5]प्रकम्पनकलाकेलिं विधत्ते क्षणम् ॥ १३ ॥

इत्यादि बहुविकारो[6] वर्तते । कथय कारणम् ।

दा॰—भगवति[7] ! गुह्यमेव, तथापि त्वं भगवतीति निवेद्यते । (उपसृत्य, कर्णे) एवमिव ।

शं॰—(आकर्ण्य सरोषम्) आः दुरात्मन् भिक्षुवराक[8] !

---

1. B. C. °दिकं स्थापयित्वा 2. B. C. पूजाग्रामपि तमेव 3. B. C. लीलया
4. A. श्मश्रून्मज्जन° B. मश्रूण्यार्जन° C. श्मश्रून्मार्जनं 5. B. C. च्छुरितं
6. A °प्रकारैः 7. A. पदं नास्ति 8. A. °दारक

भिक्षापरेण भवता, ननु बाल्य एव
निर्यातभर्तृकतया जननीगृहस्था ।
नीतास्मि मुक्तनिजबन्धुजनानवद्या
तामद्य मामपि विहाय वृथा विटोऽसि ॥ १४ ॥

अरे[1] दुराचारक्षपणक (इत्यर्धोक्ते विरम्य)[2]—

ज्ञातोऽसि तेन यदि मूर्ख तुरुष्कयूना
कान्तां वितन्तुमिव कांचन भिक्ष[3]माणः ।
क्षुत्क्षोभसत्वरतरक्षुसमक्षरङ्ग-
सारङ्गडिम्भकविडम्बनमेष्यसि त्वम् ॥ १५ ॥

शं०—[4]'दामोदर ! त्वं चिरकालशिष्यतया सर्वमपि गुरोर्वृत्तान्तं जानासि [5]वा न वा?

[6]दा०—कथय, को वायम् ?

शं०—भद्र ! किमितः परं प्रच्छाद्य ? अयं खलु[7] क्षपणकः केशोल्लुञ्छनभीरुः स्वमत[8]परित्यागेन देशान्तरं परिव्रज्य[9] स्वयमेव भिक्षुवेषं गृहीत्वा अभेदवादिनो वयमिति प्रलपन् प्रभुगृहेषु भिक्षामाददानो[10] वर्तते ।

दा०—कथमयं क्षपणकः !

शं०—अथ किम् । तेनैव खलु गुरुपरम्पराभावादात्मयोनितीर्थोऽयमिति परमार्थयतयः परिहसन्ति ।

---

1. B. C. अये 2. A. कुण्डलितानि पदानि न सन्ति 3. B. C. काङ्क्ष°
4. A. इदं दामोदरस्य वाक्यतया दृश्यते; 'भगवति' इति सम्बोधनं च वर्ततेऽत्र
5. A. 'वा न वा' न सन्ति 6. A. नास्ति 7. A. घनः 8. A. स्वदेश°
9. A. पर्यट्य 10. A. कुक्षिंभरिः

(प्रकाशम्)[1], भगवति! स्वयमीदृशोऽयं भिक्षुः किमर्थं भवतीं[2] 'वैष्णवदेवलकपुत्री इयं[3] व्यभिचारिणी' इति निर्भर्त्सयति?

शं०—गच्छतु, किमनेन प्रसङ्गेन? अहं गत्वा मठस्थितं[4] भाण्डजातमन्यत्र स्थापयामि। कदाचिदुन्मत्तोऽयं भञ्जयेद्वा।

दा०—अलं भयेन। मदनोन्मादः स्थायी न भवति।

शं०—तर्हि कथय, कथमेतस्माद् व्यापाराद् निवर्तते?

दा०—अलं भयेन। भगवति! तावद् उन्मत्तोऽयमिति मठस्तम्भे बन्धनीयः।

शं०—न युज्यते। यतो मदनोन्मादः न स्थायी भवति[5] इति त्वयैवोक्तम्[6]।

दा०—अथवा [7]आगमिष्यसि खलु रङ्गवल्लीप्रदानाय कृष्णायतनम्। तत्र नर्तनार्थमागतां[8] चन्द्ररेखामेव[9] 'अयि दुराचारे[10]! त्वया गुरुर्मे भ्रंशित' इति केशेष्वादाय[11] ताडय।

शं०—[12]न युज्यते अवश्यमिदम्। देवस्य धूपावसरमिलिताः[13] सर्वे तदीया विटा निवारणायैवागत्य महति सम्मर्दे पञ्चाङ्गुलीवलयेन प्रत्येकं शिरसि मां निहन्युः।

दा०—अथवेदं वृत्तान्तम् अहम्मदखानायैव निवेदय।

---

1. C. नास्ति
2. B. कथमीदृशीं भगवतीं
3. B. 'त्वम्' अधिकम्
4. B. अधःस्थितं
5. B. पदं नास्ति
6. B. त्वयोक्तम्
7. B. गमिष्यसि
8. B. नर्तनागतां
9. B. ष्यति C. °खां मे
10. B. पदद्वयं नास्ति
11. B. आकृष्य
12. B. C. पदद्वयं नास्ति
13. B. मिलितविटा

शं०—[1]युक्तमेवेदम्। तथापि निवेदितुमेव मयि गतायां कलञ्जमत्तोऽयं मामेव गृह्णाति चेन्महाननर्थः स्यात्।[2]

[3]दा०—तथा चेत्तव मनोरथस्सफल एव।

शं०—तत् कथम्?

दा०—युष्मदनुग्रहदाक्षिण्येन सोऽपि तां प्रति मम गुरुं निवारयति भीषयति च।

शं०—वत्स! एतत् समीचीनमेव भवति। किंतु कलञ्जमतस्य तुरुष्कस्य मान्मथीयगदो(प)[4]मानसमुत्थापितदण्डप्रहारान् सोढुमशक्ताऽहम्।

दा० — तुरुष्कसम्भोगजनितसक्थिकामदण्डप्रहारादिकमस्मदनुनयादेकवारं क्षमस्व।

शं०—कथं सहे? पूर्वेद्युः कामसत्रे रङ्गदेवभट्टस्य गृहे भिक्षापरितृप्तस्य युष्मद्गुरोरूरुदण्डप्रहारैः केवलं जडीभूतास्मि। तदद्यापि न शाम्यति। तस्मान्महाप्रमादः स्यात्।

दा०—भगवति! युष्मद्गुह्यमज्ञात्वा मयैतदुक्तम्। अहो तव बुद्धिकुशलता!

शं०—एतद् दूरदृष्ट्या योजनीयमेतत्। इतःपरं किम्?

दा०—सर्वं त्वमेव जानासि।

---

1. B. C. नास्ति
2. B. C. गतां स तुरुष्कोऽहम्मदखानाख्यो गृह्णाति चेत्, ततः किम्?
3. B. इत आरभ्य ग्रन्थपातः
4. B. ०गदोऽयं

श०—(स्वगतम्, विचार्य) अहं तावत्तुरुष्कवद् हृष्टपुष्टाङ्गी ।[1] तेनाहम्[2] अहम्मदखानकिङ्करस्य हिम्मीर[3]खानस्य वेषं गृहीत्वा देवोद्याने कचित्तमालच्छायायां स्थास्यामि[4] । यदा भिक्षुः पत्रपुष्प[5]ग्रहणाय तत्रागमिष्यति तदा तं भिक्षुं[6] भीषयामि[7] तथा यथा चन्द्ररेखां पुनः[8] मनसापि न स्मरिष्यति । तथा हि—

गुल्फालम्बितकूर्पासां खड्गखेटकधारिणीम् ।
लम्बकूर्चां लसद्वेणीं न हि ज्ञास्यति[9] मां गुरुः ॥ १६ ॥

कर्णगोपनं तु प्रयत्नेन कारयामि । (प्रकाशम्) भद्र, किमनया चिन्तया ? गोविन्द एव जानातु ।[10] साधयामि तावत् । इयत्यन्तरे मठे किं कृतवान् भिक्षुः ?

(इति सत्वरं निष्क्रान्ता ।)

(ततः प्रविशति भिक्षुः ।)

भिक्षुः (निःश्वस्य)[11]—

सन्त्यक्तदण्डमधिगत्य[12] स मन्मथोऽयं
सम्प्रत्यपास्ततुलसीदलबाणसङ्घः ।
प्रायो निहन्ति कुसुमेषुभिरेव यस्मा-
दापाण्डुरोऽस्मि पतितै[13]रिव यत्परागैः ॥ १७ ॥

---

1. B. C. अवद्धम्
2. B. C. 'अहं' नास्ति
3. B. हमीधु०
4. B. C. 'इति' अधिकम्
5. B. C. ०पुट०
6. B. पदं नास्ति
7. B. C. 'इति' अधिकम्
8. B. C. नास्ति
9. B. जानाति
10. B. C. वाक्यं नास्ति
11. B. विहस्य
12. B. अभिगम्य
13. B. C. पलितै०

(इति चिन्तयति ।)

दा० —(विलोक्य) कथमित एवागतो भिक्षुः ? गच्छामि तावत्तन्नियोगानुष्ठानाय ।

(इति निष्क्रान्तः ।)

भि० —(सविचिकित्सम्) वत्स[1], चन्द्ररेखागृहं गतेन दामोदरेण[2] तद्घटनां कर्तुं शक्यते वा ?

गो० —कथं न शक्यते ? बहुकुहनायुक्तिचतुरः खलु दामोदरः !

भि० —जानाम्येव तदीयं घटना[3]कौशलम् । तथाहि(पि) सा[4] अहम्मदखानसीमनि वर्तत इति महानुद्वेगः ।

गो० —अलमाशङ्कया ।

(भिक्षुः सहर्षं गच्छति ।)

गो० —कुतस्तावदनिर्दिश्य[5] गम्यते गुरुणा ?

भि० —वत्स, कृष्णनमस्कारार्थं प्रवृत्तोऽस्मि । तावदरिक्तहस्ततयैव देवोद्यानं गच्छावः ।

(परिक्रामतः ।)

गो० —भगवन्, इदमुद्यानं, प्रविश्यताम् ।

(उभौ प्रविशतः ।)

भि० —(समन्तादवलोक्य) अहो रामणीयकमुद्यानस्य ! तथा हि[6]

---

1. A. वत्सेन 2. B. नास्ति 3. B. द्विरुक्तिः, अबद्धम्
4. B. पदानि न सन्ति 5. B. C. अनुद्दिश्य 6. B. नास्ति

खेलत्कीररवा निबद्धमधुरारम्भालिगीतान्विता:
कूजत्कोकिलकाकलीकलकलोपाङ्गा[1]दितूर्यस्वना: ।
कृष्णस्य प्रमदाय मन्दपवनव्याकीर्णपुष्पालयो
लोलै: पल्लवपाणिभिर्विदधते लास्यं लतायोषित: ॥ १८ ॥

अपि च—

कुसुमस्मितानुरञ्जित[3]पल्लवनिवहा[4] सकोकिलालापा ।
आभाति भृङ्गकेशा सहकारलतात्र चन्द्ररेखेव ॥ १९ ॥

(तत: प्रविशति चन्द्ररेखा सखी च ।)

च°—हला कौमुदिके! अवसरसूचकेन घण्टाशब्देन आवामेवागते देवस्य सेवायै । यावत्कनकलेखागमनं देवोद्याने कुसुमान्यवचिनुव: ।

कौ°—हला चन्द्ररेखे! प्रेषयिष्यति खलु तव[5] अहम्मदखान: किङ्करेण कुसुमताम्बूलादिकम् ।

च°—यदि प्रेषयिष्यति तत् सर्वं [6]विलम्ब्यानीतमिति तस्यैव प्रतिप्रेषयिष्यामि । अलीककुपितापदेशेन[7] अहम्मदखानेन क्रीडिष्यामि ।

कौ°—यत्ते रोचते ।

(उभौ उद्यानप्रवेशं नाटयित्वा वकुलपालीमुपसरत: ।)

---

1. B. C. °वङ्गा°
2. A. नास्ति
3. A. °रज्यत्°
4. A. °हास° B. C. "नवहापको
5. A. तदा
6. A. विलम्ब्य
7. A. अलीकमपि तां प्रदोषे

भि०—वत्स, भिक्षूणां तु[1] हस्तेन[2] तुलसीदलनं निषिद्धम्। तेन त्वं पत्र[3]-ग्रहणं कुरु, अहं कुसुमान्यपचिनोमि।

(इति वकुलपालीं प्रविशन् चन्द्ररेखां विलोक्य निःश्वस्य[4] साश्चर्यम्) कथमत्रैव चन्द्ररेखा! (संज्ञया शिष्यमाहूय दर्शयन्) अहो लावण्य-मेतस्याः!

किं प्राप्ता सतमालमम्बुदधिया विद्युल्लतेदं वनं
देवस्योत्सवदर्शनाय ससखी स्वर्गाद् गता मेनका[5]।
देवोद्यानमिहास्थितेव[6] निलयात्[7] किं वा मधुश्रीः स्वयं
मूर्ता मोहयितुं जगन्ति वलते[8] मायाथवा मान्मथी ॥ २० ॥

वत्स, एतस्या इहागमनज्ञानाय निकुञ्जान्तरितौ भवावः।

(तथैव स्थितौ।)

च०—(उपसृत्य वकुलपालीं[9] पश्यति।) हला, अत्रोद्याने स्थितो[10] वानर इदानीं कुतो भवेत्?

कौ०—स इदानीं बलिग्रहणार्थं कृष्णायतने तिष्ठति।

च०—यथा तथा वा भवतु[11]। कलकलं तावत् कुरु[12]।

(उभे करास्फालन[13]पूर्वकं कोलाहलं कृत्वा पुष्पाण्यपचिनुतः।)

---

1. A. नास्ति 2. A. नास्ति 3. A. नास्ति 4. A. नास्ति
5. A. स्वर्गाङ्गना वाप्सराः 6. A. इति स्थितेह 7. A. विनयात्
8. A. ललते 9. B. C. मधुकरपालीं 10. A. स्थितोऽयम्
11. A. भवेत् 12. A. कुरुतः 13. A. सकरास्फालनम्

भि० —कथं पुष्पार्थमेतस्या इहागमनम्? (साभिलाषं पश्यति।)

गो० —भगवन् पश्य[1], यैषा[2] हि चन्द्ररेखा—

[3]अंसाग्रलम्बिकचभारमुदस्तकण्ठा[4]
भ्रूभङ्गभिन्न[5]तिलकं प्रविलोकयन्ती।
गृह्णाति कङ्कणवता करपल्लवेन
पुष्पाणि निर्भरमरन्दमनोहराणि ॥ २१ ॥

भि० —स्वरूपं [6]तावत् त्वयो[7]क्तम्। पश्य—

तिष्ठन्ती प्रपदद्वयेन कुचयोर्भारेण नम्रा मुहु-
र्लक्ष्यालक्ष्यवलित्रया दर[8]गलन्नीवी [9]गलन्मेखला।
धृत्वैकेन करेण केसरलतामन्येन पुष्पावलिं
चिन्वाना स्फुटबाहुमूलमबला पारं गिरां गाहते ॥ २२ ॥

(सौत्सुक्यम्) [10]अविषह्यो वत्स, सन्निकृष्टप्रियावियोगः। अयुक्तमस्माभिरेवाग्रतो गन्तुम्। तेन त्वमेव पुरो गत्वा नागरिकरीत्या[11] मामिहस्थं निवेदय।

गो० —तथैव[12]। (सहसाग्रतो गत्वा) रे रे को वात्र मद्गुरोर्जपविघ्नं कोलाहलं करोति?

---

1. B. C. पश्य पश्य 2. A. इह हि 3. A. अग्र°
4. B. C. °कर्णम् 5. A. °भग्न° B. भ्रूभग्न° 6. B. C. नास्ति
7. B. C. त्वयैवोक्तम् 8. B. C. प्रवि° 9. B. C. वल°
10. B. C. वत्स, अविषह्योऽपि प्रियाविप्रयोगः, मया चाग्रतो गन्तुं नोचितम्।
11. A. °वृत्त्या 12. तथेति

(श्रुत्वा चन्द्ररेखाकौमुदिके सम्भ्रान्ते ।)

भि०—(स्वगतम्) सम्यगुपक्रान्तं वत्सेन । (सहसोपविश्य जपं नाटयति ।)

कौ०—आर्य, दर्शय, प्रणमावः ।

गो०—(सरोषमिव) कथं भवतीभ्यां कृतोऽयं कलकलः ? तर्हि तथा[1] क्रियताम् ।

(चन्द्ररेखाकौमुदिके गोविन्देन सह भिक्षुमुपेत्य सभयम्[2]) भगवन्, अपराधः क्षम्यताम् । (इति सपादग्रहणं भिक्षुं[3] प्रणमतः ।)

भि०—(सरोमाञ्चम् आत्मगतम्) अहो सुखस्पर्शता[4] वेश्याकरस्य !

रण्डाभिर्बहुधा स्पृष्टे व्यासपूजासु मे पदे ।
नैतादृशं सुखं क्वापि वञ्चितोऽस्मि चिरं वृथा ॥ २३ ॥

(स्पर्शसुखमनुभवन् हस्तेन चन्द्ररेखामुन्नमय्य, प्रकाशम्)

गतापराधा सुभगे प्रणामेनैव जायसे ।
कामं कुरुष्व मे किञ्चित् [5]प्रीत्यै कुसुमधन्वनः ॥ २४ ॥

च०—सखि, पृच्छ[6] शिष्यं, कः कामो भगवतः कर्तव्य[7] इति[8] ।

कौ०—तथा । (इति गोविन्दं पृच्छति ।)

---

1. A. तथैव 2. A. नास्ति 3. B. C. नास्ति
4. B. स्पर्शसुखता 5. B. C. प्रत्येकं सुमधन्वनः 6. A. पृच्छस्व तावत्
7. A. करणीयः 8. B. C. नास्ति

गो०—(उपसृत्य, कर्णे) एवमिव ।

कौ०—(सहासं भ्रूसंज्ञया चन्द्ररेखायै भिक्षुं दर्शयति ।)

च०—(सस्मितम्[1]) सखि, एहि, गच्छावः। अतिक्रमिष्यति देव[1]सेवावसरः । (इति दर्शितबाहुमूलस्तनतटा घम्मिल्ले कुसुमानि स्थापयन्ती स्थिता ।)

भि०—(उत्थाय) भद्रे, अप्यलङ्कारपर्याप्तानि कुसुमानि? (चन्द्ररेखाया उरोंऽशुकन्यस्तकुसुमस्पर्शव्याजेन स्तनौ स्पृशति ।)

च०—(सावहित्थम्) भगवन्, प्रांशुतया वृक्षस्य बहूनि न लभामि । तस्मात् परशुमुद्रासनाथो दण्ड उपनीयताम् ।

भि०—अबले, किं दण्ड[3]प्रयासेन?

त्वामेव तन्वङ्गि समुत्क्षिपामि
द्वाभ्यां कराभ्यामिह पुष्पहेतोः।
प्रह्वे मयि न्यस्तपदाम्बुजा वा
सुखेन सम्पादय पुष्पजातम् ॥ २५ ॥

(चन्द्ररेखायाः पुरतः प्रह्वस्तिष्ठति ।)

गो०—[5]भगवन्! बाहुभ्यामेवो[6]त्क्षिप तन्वङ्गीम् ।

भि०—तथा । (इति चन्द्ररेखां नितम्बे गाढमालिङ्ग्य उत्क्षिपति[7] ।)

---

1. A. देवस्य
2. B. C. 'अपि' नास्ति
3. A. दण्डग्रहण°
4. B. प्राङ्मे C. ब्राह्मे
5. B. C. नास्ति
6. A. 'एव' नास्ति
7. A. उपरि तिष्ठति

च०—(हसन्ती [1]शाखामवलोक्य सभयम्) भगवन्, मुञ्च मुञ्च[2], अत्र वानरो वर्तते ।

भि०—वत्स, पाषाणेन ताडयैनम्[3] ।

गो०—([4]हुङ्कारेण तर्जयति ।)

भि०—(निःश्वस्य, आत्मगतम्) सत्यमेतत्, श्रेयांसि बहुविघ्नानीति यदुच्यते। यतः—

गाढं समाश्लिष्य नितम्बमस्याः
करान्तसंस्पृष्टनितम्ब[5]मूलः ।
हा हन्त शाखामृगरूपभाजा
हतेन[6] दैवेन निवारितोऽस्मि ॥ २६ ॥

च०—अहो कुपित इव वानरो वृक्षादवतरति ! (इति सभयं भिक्षुमालिङ्गति ।)

भि०—(आलिङ्गनसुखमनुभवन्, स्वगतम्) साधु रे वानर साधु ! त्वमेव मे[7] प्रियशिष्योऽसि । यतः—

आलिङ्गति स्तनभरस्खलितांशुकान्तं
कान्तानुबन्ध[8]करुणाक्षरमालपन्ती ।
त्रासाकुलैर्विदधती तरलैः कटाक्षै-
रुद्यानमुत्पलदलैरव[9]कीर्णमध्यम् ॥ २७ ॥

---

1. A. शाखावलि॰ 2. A. द्वित्वं नास्ति 3. A. पातयैनम्
4. A. C. फूत्का॰ 5. A. वरोरु॰ 6. B. C. हन्ताय 7. नास्ति
8. A. सुमद॰ 9. A. ॰दलाचलि॰

(प्रकाशम्) भीरु, न भेतव्यं न भेतव्यम्[1] तुरुष्कवदारत्नमुसमेनं ताडयामि। (इति सम्भ्रमति।)

(ततः प्रविशत्युत्पाटित[2]खड्गस्तुरुष्कः।)

तुरुष्कः—रे रे, को वा मम स्वामिवल्लभां भाययति?

कौमुदिका—हला, मा भैषीः मा भैषीः[3]! एषोऽहम्मदखानस्य किङ्करो जरत्खाणः[4] तव कुसुमताम्बूलादिनिवेदनार्थमागच्छति।[5]

चन्द्ररेखाकौमुदिके—(तुरुष्कमुपेत्य) भद्र! इह स्थिते आवां कथं त्वया विज्ञाते?

तु॰—युष्माभिरेव भीषिताभिः[6]।

उभे॰—भद्र! कुसुमार्थमागते आवां वानरेण भीषिते।

तु॰—कुत्र सः?

च॰—इहैव समीपे।

तु॰—भद्रे! त्वं कृष्णायतने दासीकरात् कुसुमताम्बूलादिकं गृहाण। अहं वानरं शिक्षयामि।

---

1. A. नास्ति 2. A. उत्खात॰ 3. A. द्वित्वं नास्ति
4. A. रजाय्खानः 5. A. चन्द्ररेखा सहसा अपसरति। गोविन्दः भद्रतरुमारोहति। भिक्षुः पार्श्वस्थं निकुञ्जं प्रविशति।' इत्यधिकम्
6. A. कोलाहलेन इह स्थिते जानामि।

च०—किमेतैरसमयानीतैः ? देवसेवायै [1]पुनर्गमिष्यामि ।

(इति सख्या सह निष्क्रान्ता ।)

तु०—(पुरोऽवलोक्य) अरे, अत्र निकुञ्जे वानरस्तिष्ठति, येन लता कम्पते । (उपसृत्य निकुञ्जमभितः कोलाहलं करोति ।)

भि०—(सकम्पम् 'जय जय श्री[2]नृसिंह महाभयनिवारण' इति[3] नृसिंह-श्रु(स्तु)तिहनूमत्कवचादिकं पठति ।)

गो०—अनुभवत्वेष वैधवेयः स्वयं तस्य [4]दुश्चेष्टितस्य फलम् । क्वेदं भिक्षुत्वं, क्व च न दुर्घटवेश्यागमनम्[5] । यत्र काप्याराधनेषु पुनरस्मान् बहिः स्थापयित्वा स्वयमन्तरुपविश्य [6]माषवटकादिका(क)मा(मृ?)ष्ठोष्ठं भक्षयति ।

तु०—कथमिदानीमपि न निर्गतो वानरः ? (इति दण्डमादाय निकुञ्जं ताडयति । भिक्षुः निभृतस्तिष्ठति)।

गो०—(पुनः स्वगतं भिक्षुं प्रति) दुरात्मन्, अनुभवेदमत्याहितम् ! किंच चन्द्ररेखां सामान्य[7]प्रव्राजिकामिव मन्यसे। किं तुरुष्काधीनेति न[8] जानासि ?

(नेपथ्ये)

भो भो, उद्यानस्थितो वानरः कथमपि चिरेण गृहीतः । कृष्णायतन-द्वारस्तम्भे बन्धय एनं दृढं मूर्खम् ।

---

1. B. C. पुरो गमि॰ 2. A. 'श्री' नास्ति 3. A. इति पठति 4. A. कुचे॰ 5. B. C. अक्षरभ्रंशः 6. A. माषवटकादि देव...... भक्षयति 7. A. परिव्रा. 8. B. C. ॰ष्काधिपेन तेन, अबद्धम्

तु°—कथं वानरो गृहीतः !

(इति निष्क्रान्तः ।)

भि°—(किंचिदुच्चैः) वत्स, पश्य पश्य, दूरं गतः किं तुरुष्कः ?

गो°—अलं शङ्कया, निर्गच्छतु भवान्, अहमप्यवतरामि वृक्षात्। (इति वृक्षादवतरति, भिक्षुः निकुञ्जान्निर्गत्य स्थितः ।)

गो°—(भिक्षुमुपेत्य) अहो भगवतस्सामर्थ्यं येन तथाविध[1]मत्याहितं क्वापि गतम् ।

भि°—[2]मया यन्त्रोद्धारणं[3] कृतम् ।

गो°—(भिक्षोर्मुखमवलोक्य) भगवन्, इमे मुखे दंश[4]ग्रन्थय इव दृश्यन्ते।

भि°—वत्स, तदा तुरुष्केण निकुञ्जे ताड्यमाने निजावासचलनोत्कुपित[5]गण्डो-(न्धो)ऽलिकाभिर्दष्टोऽस्मि।

गो°—अहमपि वृक्षे वनपिपीलिकाभिर्दष्टोऽस्मि ।

भि°—वत्स, तादृशी बाधा कुत्र वर्तते[6] ? पश्य, कपिकच्छूगुच्छस्पर्शेन सर्वतोऽप्युच्छूनं ममाङ्गम् ।

---

1. A. तथागत° 2. A. वत्स तथा इत्यधिकम् 3. A. °धरणं
4 A. दृग्° B. दम्य° C. दध्य° 5. A. °नोत्कम्पिताभिः गन्धोली गरटाल्यो दंशविशेषः 6. A. तु किमुच्यते 7. B. पिच्छूनं C. पिं छणं

गो०—भगवन् ! आरक्तोच्छून[1]सर्वाङ्गतया परिपुष्ट[2] इव दृश्यसे । तेन त्वमेव अहम्मदखानाच्चन्द्ररेखायाः प्रियतमो भविष्यसि । त्वर्यतां तावत् पत्रपुष्पग्रहणाय ।

भि०—अलम्, इतः परमन्योऽपि तुरुष्क आगच्छेद्वा !

(ततः प्रविशति हिम्मीर[3]खानवेषा शङ्करकौशिकी ।)

शं०—अहो मया खड्गखेटादिकं सम्पादयन्त्या[4] बहुकालो नीतः । तथापि सुसदृश[5]हिम्मीर[6]खानवेषा देवोद्यानं प्रविष्टास्मि । तावद् भिक्षुमन्वेषयामि । (इति परि[7]क्रामति ।)

भि०—[8]इतः परं किं करिष्यावः, ? यदयमहम्मदखानस्य किङ्करो हिम्मीर[9]खानस्समायाति !

गो०—भगवन्, अलमुद्वेगेन !

भयशीलेषु[10] सर्वोऽपि भवति प्रौढविक्रमः ।
अतो भीतिं समुत्सृज्य भज धैर्यमनाकुलः ॥ २८ ॥

भि०—तथा । (इति स्थितः ।)

शं०—(विलोक्य स्वगतम्) कथमग्रत एवाभिवर्तते भिक्षुः !
(अनालोकितकेन खड्गं कम्पयन्ती[11], प्रकाशम्)

---

1. B. C. °रक्तमान° 2. C. परिप्लुष्ट° 3. A. हमीधु°
4. A. °दयित्वा 5. B. C. पदं नास्ति 6. A. हमीधु°
7. B. C. अप° 8. A. वत्स इत्यधिकम् 9. A. हमीधु°
10. B. मूलेषु 11. B. C. °यति

अरे, कदा वा चन्द्ररेखाकामुकं भिक्षुं खण्डयित्वा स्वामिनोऽनृणो भविष्यामि ?

[1]भि०—श्रुतं वत्सेन ?

गो०—भगवन्! मा कातरो भूः[2]।

शं०—(भिक्षुं विलोक्य) अरे भिक्षुक! त्वं चन्द्ररेखामिदानीमभिलषसि किल ? यदि तां चक्षुषा[3] पश्यसि ततः[4] कर्णयुगलं खण्डयिष्यामि।

गो०—अरे तुरुष्कापशद! कथं मे गुरोः कर्णयुगलं खण्डयिष्यसि ? यदि न खण्डयसि तर्हि तव श्मश्रूणि न श्मश्रूणि[5]।

शं०—(स्वगतम्) अपि[6] विदितास्म्यनेन किम्[7] ? (प्रकाशम्) एष खण्डयामि। (इति करवालं दर्शयति।)

गो०—किं करवालदर्शनेन ? खण्डय तावत्, पश्यामि।

भि०—(स्वगतम्)[8] धूर्तप्रायोऽयं[9] गोविन्दः क्षणमात्रमेवाडम्बरं विधाय तुरुष्केण कर्णखण्डनं कारयेद्वा! अवकुण्ठितो भवामि तावत्। (इति वस्त्रेण शिरोऽवकुण्ठयति।)

गो०—(बद्धपरिकरस्सन्) अरे तुरुष्क! [10]अण्डवानसि[11] चेदितः परं विजृम्भस्व।

---

1. C. ग्रन्थपातः 2. B. C. भव 3. A. 'वा' आधिकम्
4. A. ततस्ते B. तर्हि 5. A. तव श्मश्रूणि कृत्रिमाणि 6. A. अपि न
7. A. नास्ति 8. B. C. नास्ति 9. A. नास्ति
10. A. अखण्डितवानसि B. खण्डवानसि 11. 'पुमानसि' इत्यर्थः

शं०—(स्वगतम्) यतः बृहद्भूतं पुरुषचिह्नमधो नालम्बितम्। (प्रकाशम्) अरे, सन्नद्धो भव। किं मया युद्धं करोषि ?

गो०—([1]दत्तदशार्धः [1]) करिष्यामि युद्धम्।

शं०—अरे! तथा यदि ते गुरोरेव शीर्षे दशार्धं[1] ददामि। (सहसोपसृत्य पञ्चाङ्गुलीवलयेन भिक्षुं शिरसि ताडयति।)

भि०—(स्वगतम्) अहो, भीषणकरस्यापि तुरुष्कस्य [2]करस्पर्शश्शङ्करकौशिक्या इव सुखयति माम्। (प्रकाशम्) वत्स, किमतः परं कर्तव्यम् ?

गो०—भगवन्, निश्शङ्कं तुरुष्कं दण्डेन ताडय। अहं पाषाणानाहरिष्यामि। (इतस्ततः परिभ्रमति।)[3]

भि०—(सरभसमुपेत्य शङ्करकौशिकीं दण्डेन ताडयति।[4]) (शङ्करकौशिकी खड्गेन दण्डं खण्डयति।[5])

गो०—भगवन्! अत्र पाषाणा न लभ्यन्ते। तावत्पादुकया जहि तुरुष्कम्। अहमितो दण्ठकाष्ठमाहरिष्यामि।[6]

भि०—(यथोक्तं करोति।)

शं०—(सहेलं[7] निवारयन्ती खड्गं पातयति।)

---

1. A. B. दष्ट°. 'दशार्ध' शब्दः पञ्चाङ्गुलीकृतचपेटार्थे मुष्टिकुट्टनार्थे वा पारिभाषिक इति भाति। 2. A. 'कर' नास्ति 3. B. C. नास्ति
4. 5. B. C. अस्य स्थाने 'अहमितो दण्डकाष्ठमाहरिष्यामि' 6. B. C. अस्य स्थाने 'अपसृत्यान्यतः स्थितः' 7. A. सावहेलम्

गो०—(सहसोपसृत्य खड्गं गृहीत्वा फुल्लपङ्कजयुतायां[1] निकटवर्तिन्यां[2] सरस्यां पातयति।)

शं०—(स्वगतम्) अहो पतनमात्रादेव खड्गं सरस्यां पातितवानयम्! भवतु मुष्टिघातेन भिक्षुं मुखे ताडयामि। (उपसृत्य[3] तथा करोति।)

भि०—(हस्तेन चक्षुषी[4] पिधाय) वत्स, चक्षुषोर्महान् प्रमाद उपगतः।

गो०—(कक्ष्यां[5] दृढीकृत्य शिखाबन्धनं कुर्वन्) अरे[6] तुरुष्क! इतः परमेकवारं ताडय, पश्यामि। (इति भिक्षुहस्ते[7] अन्यां[8] पादुकां ददाति।)

शं०—(स्वगतम्)[9] तावदेतस्य पादुकां[10] खेटकेन वारयामि[11] (साटोपं खेटकमुद्भ्रमयति,[12] तत्रान्तरे[13] शिर[14]श्चूलिकाबन्धः पतति।) रोमान्तरित[15]-शिरसः प्रस्निग्ध[16]मुण्डनस्नैग्ध्यात् प्रशिथिलबन्धश्चूलिकाबन्धः पतितः। तावत् खेटकेन शिरः प्रच्छादयामि। (तथा करोति।)

गो०—भगवन्! खड्गशून्यो वर्तते तुरुष्कः। तदिदानीमेव दर्शय बलम्।

(उभौ सज्जीभवतः।)

शं०—(स्वगतम्)[17] अहो तयोस्संरम्भः! अहं तुरुष्कक्रोधोचितं कूर्चो[18]त्पाटनमभिनयामि, यत् सत्यं क्रुद्धोऽयं तुरुष्क इति भीतः सशिष्यो[19] भिक्षुः [20]पलायेत वा।

---

1. A. नास्ति 2. A. नास्ति C. वर्तिन्यां नास्ति 3 B. C. प्रकाशमित्यधिकम् 4. A. चक्षुः 5. A. कच्छम् 6. A. रे रे 7. A. 'भिक्षु' नास्ति 8. B. C. नास्ति 9. A. 'तथा कृत्वा' इत्यधिकम् 10. A. °क्षेपम् इत्यधिकम् 11. A. निवा° 12. A. यन्त्याः 13. A. नास्ति 14. B. शिरसि 15. A. हन्त 16. A. प्रत्यग्र° 17. A. नास्ति 18. A. कूर्पासो° 19. B. C. नास्ति 20. B. C. नास्ति

([1]ततः कूर्चोत्पाटनं करोति ।)

[2]भि°—वत्स! अतिक्रुद्धोऽयं तुरुष्कः, [3]इतः [4]परमस्माकं अब्रह्मण्यमेव शरणम् ।

उभौ°—(उच्चैः) अब्रह्मण्यम्! अब्रह्मण्यम्!

श°—(मुखमवनम्य आत्मगतम्) अहो कूर्चमपि त्रुटितम्। इतः परं किं करिष्यामि? एष भिक्षुर्ज्ञास्यसि चेन्मुष्टिघातैरेव[5] मां[6] मारयेत्। [7]किंच एतयोरब्रह्मण्यवचनेन बहवो मिलन्ति चेन्महाननर्थः स्यात्। तदेतावत्येव समये[8] पलायनमेव करिष्ये। (पलायनं निरूप्य निष्क्रान्ता।)

गो°—भगवन्! एष तुरुष्कः शङ्करकौशिकीव प्रतिभाति।

भि°—ममाप्येवं मनसि वर्तते। नूनं सैव बन्धकी यद[9]स्याः लताकण्टकच्छिन्न[10]गात्रकूर्पासं पलायमानायाः लम्बमानस्तनद्वयमपि दृष्टम्। अपि चेयं मां चन्द्ररेखानुरक्तं विज्ञाय तुरुष्कवेषेण मां भीषयितुमुद्यतेति[11] तर्कयामि। वत्स! तदा तथा तया[12] विरचितपञ्चाङ्गुलीवलयप्रहार एव मे संशयो जातः। अहो स्त्रीसाहसम्! यदियमस्माकमब्रह्मण्यपर्यन्तमत्याहितमुत्पाद्य पश्यतोरेवावयोः पलायिता रण्डा।

(उभौ प्रहसतः।)

---

1. A. सक्रोधं हस्ताभ्यां कूर्चं त्रुटति 2. B. C. वाक्यानां क्रमभेदः 3. B. C. ततः 4. A. परं त्वस्माकं 5. A. °घातेनैव 6. A नास्ति 7. B. C. नास्ति 8. A. संशये 9. B. C. 'अयम्' अधिकम् 10. A. विच्छिन्न° 11. A. प्रवृत्तेति 12. B C. पदद्वयं नास्ति

भि°—अहो अद्यापि भयं न मुञ्चति मे हृदयम्। (विलोक्य सस्मरणम्)

वनचरभयव्यग्रा गत्या[1] रणन्मणिनूपुरं
स्तनभरपरिभ्रंशिक्षौमं क्षणं परिरब्धया।
मम सललितं मध्ये वक्षो विच[2]क्षणया तया
नखपदमवि[3]स्मर्तुं नाम स्वकीयमिवार्पितम् ॥ २९ ॥

वत्स, त्वमपि गत्वा दामोदरं त्वरय प्रयोजनसिद्धये। अहं पुनः प्रावृषायणी[4]-स्पर्शकण्डूलमात्मानमिह सरस्यां प्रक्षाल्य[5] कृष्णायतने चकोर इव चन्द्ररेखावलोकनं प्रेक्षे।[6]

[7]गो°—भगवन्! कथं गण्डस्थलमुच्छूनमिव वर्तते। तदत्रैवोद्याने जम्बीर-रसं प्रक्षिप।

[8]भि°—तथा क्रियते (इति निष्क्रान्तः।)

[9]गो°—(उद्याननिर्गमं नाटयित्वा परिक्रम्य) कथमागत एव। (वेशवाटीं विलोक्य) अहो बहुवर्णनीयसौभाग्यायामेतस्यामवलोकनीयबाहुल्ये[10]ऽपि त्वरयति मां गुरुप्रयोजनं चन्द्ररेखागृहगमनाय। (कतिचित् पदानि

---

1. A. गत्वा 2. B. C. विल° 3. A. °मपि 4. प्रावृषायणी पूर्वोक्ता कपिकच्छूः 5. A. प्रक्षालयामि C. क्षालयामि; 6. B. C. उभयत्र एतत्पदात् परं वाक्यं नास्ति 7. B. C. नास्ति 8. B. C. नास्ति 9. B. C. नास्ति वेशवाटीं विलोक्य इत्यन्तम्; तत्स्थाने लघुग्रन्थो दृश्यते, यथा—'प्रक्षालयामि' इत्यनन्तरं भिक्षुविषये 'इति प्रक्षालनं नाटयित्वा परिक्रम्य' इत्युक्त्वा दामोदरोचितं वाक्यं भिक्षुमुखेनैव दत्तं 'कथं गत एव वेशवाटीम्' इति 10. B. C. अवद्यम्

गत्वा[1]) [2]इदं चन्द्ररेखागृहं, यावत् प्रविशामि। (प्रविश्यावलोक्य) अहो सौभाग्यं गणिकाभवनस्य—

शालानां रतिबन्धभेद[3]ललितालेख्यान्विता भित्तयो
मन्दं मोहनमन्दिरं च परितश्चञ्चन्ति[4] पारावताः।
अश्रान्तश्रवणेन पञ्जरशुकैराम्रेडितानि स्फुटं
प्रौढस्त्रीमणितान्यहो सुकृतिनां कुर्वन्ति कर्णोत्सवम् ॥ ३० ॥

(सकौतुकम्)

आविर्भवत्पुलकमाकुलकेशपाश-
मालोलहारमनवेक्षितमध्यभङ्गम्[5]।
वल्गत्कुचं च वनजायतलोचनायाः
पुम्भावकेलिमिह पुण्यकृतो लभन्ते ॥ ३१ ॥

(विलोक्य सस्मितम्) कथं दामोदरः अभ्यन्तरा[6]दागच्छति।

मह्यं मुखस्य कान्त्यैव कथयन् सिद्धकार्यताम्।
विलोक्य विहसन् दूरादायात्यानन्दि[7]मानसः ॥ ३२ ॥

(ततः प्रविशत्याभरण[8]हस्तो दामोदरः।)

दा०—नूनं मामेव त्वरयितुं गुरुणा प्रेषितो गोविन्दः। तावद्गुरोः कुशलं पृच्छामि। (उपसृत्य) सखे! अपि कुशलं गुरोः?

---

1. A. 'विलोक्य' इत्यधिकम् 2. B. C. नास्ति 3. A. °खेद°, अबद्धम् 4. A. कूजन्ति 5. B. C. °भागम् 6. A. अन्तरा° 7. B. C. °न्द 8. A. पेटी° इत्यधिकम्।

गो°—कुशलमेव। तथापि त्वयि विनिर्गते महदावाभ्यामत्याहितमनुभूतम्। तत् सर्वं पश्चात् कथयिष्यामि। तावत् कृष्णायतने स्थितेन गुरुणा प्रेषितोऽस्मि। अपि घटनोपायो लब्धः?

दा°—(सगर्वं)[1] सखे! कार्यसिद्धिमेव पृच्छ।

गो°—सखे! राहुगृहीताया इव अहम्मदखानगृहीतायाश्चन्द्ररेखाया दर्शनमपि दुर्घटनं प्रथमम्[2]। कथं[3] घटना सिद्धा? तत्पार्श्वगौ[4] वा कथमङ्गीकृतवन्तौ?

दा°—सखे! ताभ्यामनभ्युपगत[5]मेव। पश्चान्मया उपाये तर्किते सम्यगनुमतम्।

गो°— [6]किं द्रव्याल्पत्वेन[7] ताभ्यां[8] प्रथमं[9] नाङ्गीकृतम्।

दा°—न हि न हि; यदा वा[10] चन्द्ररेखायाः कृते अहम्मदखानस्य दस्तुरखानेन सह वैरं प्रवृत्तं, तदारभ्य तत्किङ्करैस्संरक्ष्यते तद्गृहम्। [11]तदुन्मत्तकेनापि द्रव्येण न शक्यते घटनम्[12]।

गो°—तर्हि कथय तवोपायपरिपाटीम्।

दा°—यदा सायंसमये अहम्मदखानो हालां पीत्वा मत्तः[13] स्वशरीरानभिज्ञो भविष्यति तदा (आभरणपेटीं दर्शयन्) अनेनाभरणजातेन[14] कौमुदिकावेषेण द्वारपालानतिसन्धाय[15] नो गुरोश्चन्द्ररेखागृहप्रवेशो लभ्यते।

---

1. B. C. नास्ति 2. नास्ति 3. B. C. नास्ति 4. A. पितरौ
5. B. C. अनभ्यासगत, अवद्धम् 6. A. सखे इत्यधिक्रम् 7. B. C. कीदग्रीत्याल्प°
8. B. C. एताभ्यां 9. B. C. नास्ति 10. A नास्ति 11. A. यदु°
12. A. नां कर्तुम्. 13. A. हालामत्तः 14. A. °जालेन 15. A. अवद्धम्

ततस्तदीयवृक्षवाटिकालतागृहे खण्डिका[1]द्वारेणागतायाश्चन्द्ररेखायास्सङ्गमो भविष्यतीति[2] ममोपायः।

गो°—साधु[3], साधु। किमेतानि कौमुदिकाभरणानि?

दा°—अथ किम्। (समन्तादवलोक्य) सखे[4] पर्यवसितप्रायोऽयं दिवसः। तदनेनाभरणजातेन गुरोः कौमुदिकावेषं विधाय त्वमपि तच्चेटिकावेषधारी शीघ्रमेव तमानय। अहं त्वत्रैव चन्द्ररेखाचेटीवेषधारी भवदागमनं प्रतीक्षे।

गो°—तथा। (इत्याभरणपेटिकामादाय निष्क्रान्तः।)

दा°—(सर्वतोऽवलोक्य)[5] कथं पर्यवसितो दिवसः। सम्प्रति हि—

अहःश्रीगणिकासङ्गादम्बरैकान्तलम्बनः।
भानुः पल्लवरक्तोऽयं वसुशून्यो विभाव्यते[6] ॥ ३३ ॥

अपि च—

रागे वेश्याजनस्यैव सान्ध्ये याते क्षणादहो।
गोलाङ्गूलमुखश्यामैस्तमोभिः छाद्यते जगत्[7] ॥ ३४ ॥

तथा हि—

निर्णिक्त[8]मुक्ताफलकान्तिकान्ता
विभान्ति तारा वियदन्तराले।
विष्वग्विमुक्तास्त्रिजगज्जिगीषोः
प्रसूनबाणा इव शम्बरारेः ॥ ३५ ॥

---

1. A. खण्डिता°; उभयथापि अर्थो न स्पष्टः 2. A. 'अयं' अधिकम् 3. A. 'सखे' अधिकम् 4. A. इत आरभ्य अधः चत्वारि वाक्यानि भ्रष्टानि 5 A. ग्रन्थत्रुटिः एतत्पर्यन्ता भवति 6. A. विराजते 7. B. C. बहुबद्धम् 8. B. C. निर्मुक्त°।

(नेपथ्ये ध्रुवा गीयते)[1]

पाऊण महुवतरुणो
वियसितणीलुप्पलमहुरमहुमज्झम् ।
णच्चिअमाणो हिज्जं
चिठ्ठइ पज्जुण्णसुत्तधारेण[2] ॥ ३६ ॥

[पीत्वा मधुपतरुणः विकसितनीलोत्पलमधुरमधुमद्यम्
नर्त्यमानो हृद्यं तिष्ठति प्रद्युम्नसूत्रधारेण ॥]

दा०—(आकर्ण्य विलोक्य) [3]अहम्मदखानस्य प्रावेशिकी ध्रुवा गीयते । तथा ह्येषः—

बिभ्राणो नवमल्लिकागुणभरं शीर्षेण रागं दृशा
ताम्बूलं वदनेन हल्लकरुचा कम्पं कराभ्यामपि ।
स्खालित्यं चरणद्वयेन बहुशो हालामदा[4]घूर्णनं
सर्वाङ्गैर्यवनः स्वयौवनमदप्रौढिं[5] समाढौकते ॥ ३७ ॥

(ततः प्रविशति यथानिर्दिष्टो अहम्मदखानः ।)

---

1. A. इत आरभ्य सर्वत्र प्राकृतपाठोऽपि दत्तः B. C. संस्कृतच्छाया नास्ति 2. A. B. C. प्राकृते सर्वत्र, किन्तु अशुद्धम् A. संस्कृतच्छाया अधिका 3. A. 'कथम्' अधिकम् 4. A. °मदोद्घू° 5. B. C. °ढिः

अ०—(निमीलिताक्षि[1] स्खलनमभिनीय[2]) अरे रे[3] को मामन्धकारं प्रापयति । (विलोक्य) कथं न कोऽपि ! (सकरतालम्)—

तालीमध्यं खेलति हृद्यं
शीर्षे फुल्लं दृश्यते माल्यम् ।
को वा शम्भुः को नु स्वयम्भूः
को वा विष्णुः को नु खलु जिष्णुः ॥ ३८ ॥ (छाया)

(हस्तौ प्रसार्य नृत्यति ।)

दा०—अहं तावत् चन्द्ररेखाचेटीवेषं गृहीत्वा आगच्छामि ।

(इति निष्क्रान्तः ।)

अह०—(पुनर्निमीलिताक्षः पश्चादपसरन्) अरे[4] कियद्दूरे प्रियागृहम् ? (विलोक्य सहासं) कथमेतदेव ! (पुनस्सकरतालम्)-

प्रफुल्लमल्लिकावना[5]वलीनिलीन[6]भृङ्गाङ्गना-
गणानां गानप्रियाः पिबन्ति शीधु साधवः ।
कुर्वन्ति नित्यनर्तनं किंच सौम्यसंमदा
मदाकुलं विलासिनीस्नेहदोहनोन्मुखाः ॥ ३९ ॥ (छाया)

(पुनः पुरो[7]ऽनुसरन् उच्चैर्विहस्य सानुसरणम्) अहो वक्रस्वभावा चन्द्ररेखेति लोकवादः सत्य एव, यतो दूतहस्तेन प्रेषितं कुसुमताम्बूलादिकं विलम्ब्यानीत[8]मिति तया प्रत्यर्पितम् । (छाया)। [9](सकरतालमितस्ततो भ्रमति ।)

(प्रविश्य चेटीवेषधारी दामोदरः)

---

1. A. °क्षः 2. A. °नयन् 3. A. रे रे 4. A. अरे रे 5. A. C. वना° लुप्तम् 6. C. नलिन, अवद्धम् 7. A. पुरतः 8. B. C. विलम्बित° 9. A सदरान्दोलमितस्ततो धावति

दा°—अहमितः परं निश्शङ्कं गुर्वा[1]गमनपर्यन्तमेतस्य देशी[2]नर्तनं पश्यामि।
(इति स्तम्भान्तरितस्तिष्ठति।)

अह°—(सवैलक्ष्यम्)[3]

भावा वेषा मनोज्ञास्सम्पूर्णा
लीलालोलाः प्रेमप्लुतीक्ष्णा अपि कटाक्षाः।
एवं सर्वं साधु प्रियाणां प्रमदानां
एको वक्रस्तासां[4] रोष एव दोषः॥ ४०॥ (छाया)

(साङ्गहारं गायं गायं नृत्यति।)

दा°—(चिरं विलोक्य सविमर्शमात्मगतम्) समीचीनोऽयमवसरः, किमर्थं
चिरायति भिक्षुः। तावद् द्वारस्थितः प्रतीक्षे। (यथा कृत्वा विलोक्य)
[5]अयं खलु[6] भिक्षुरायाति। यथा—

मूर्धालङ्कृतकूटकेशनिवहस्ताटङ्कचञ्चन्मुखः
प्रोत्तुङ्गस्तनलोलहारलतिकः कौसुम्भरक्ताम्बरः।
लीलान्दोलितबाहुकङ्कणरणत्कारो रणन्मेखला-[7]
मञ्जीरस्वनसूचितागतिरसावभ्येति भिक्षुर्जवात्॥ ४१॥

(ततः प्रविशति यथानिर्दिष्टो भिक्षुः शिष्यश्च।)

भि°—वत्स! अपि युज्यते[8] मे कौमुदिकावेषः?

---

1. C. शिष्या, अबद्धम् 2. A. देशिक°, अबद्धम् 3. B. C. 'संस्कृतमाश्रित्य' इत्यधिकमनपेक्षितम्, यतो मूले प्राकृतमेव दत्तम् 4. B.C. पदत्रयं लुप्तम् 5, A. 'अये' अधिकम् 6. B. किल 7. A. °कारोन्मिलन्मेखलः 8. A. सदृशः

गो°—अथ किम्। भगवन्तं[1] कौमुदिकायाः प्रतिबिम्बं तर्कयामि। तथापि कबरीबन्धरशङ्करकौशिक्या इव शिथिल[2]बन्धो मा भूत्।

भि°—([3]कबरीदार्ढ्यं सूचयित्वा) वत्स! द्वारपालैरविज्ञातावा[4]गतौ स्वः[5]। दामोदरः [6]कुतो वर्तते?

गो°—(विलोक्य) एष खल्वन्तर्द्वार[7]स्थितोऽस्मानेव प्रतीक्षते। उपसरावस्तावत्। ([8]उपसरतः।)

दा°—(उपसृत्य) अपि कुशलं गुरोः?

भि°—[9]भद्र! एवं गुरुशुश्रूषापरायणे त्वयि कथं न कुशलमस्माकम्? कथय अहम्मदखानः कुत्र वर्तते?

दा°—[10]अयमित एव हालामदवशेन वर्तते। (हस्तेन दर्शयति।)

(सर्वे[11] परिक्रामन्ति।)

[12]अङ्गकान्तिविनिर्जितज्वलनानङ्गचापलताश्रीः
अङ्गनाजनभूषणं यदि सङ्गता सा मया पुनः।
तुङ्गपीनस्तना अस्या मङ्गलाननपङ्कजं
भृङ्गको नवपङ्कजमिव तद्गलावधि घयामि ॥ ४२ ॥

---

1. A. C. भवन्तम् 2. A. प्रशिथिल° 3. A. 'संज्ञया' अधिकम् 4. A. रविदितावेवा° 5. A. नास्ति 6. A. क्व 7. °द्वारि 8. A. 'उभौ' अधिकम् 9. B. C. 'भद्रमेवम्' इत्येतावदेव 10. B. C. वाक्यं नास्ति 11. A. 'सहर्षम्' अधिकम् 12. A. श्लोक एष प्राकृते संस्कृते च दत्तः; B. C. नास्त्येव।

अह॰—(मद्यमदमभिनयन्)—

अरे [1]कदा वा चन्द्ररेखां द्रक्ष्यामि ! कदा वा तस्याः कण्ठं[2] ग्रहीष्ये[3] ! कदा वा तन्मुखे[4] मुखताम्बूलं दास्यामि ! कदा वा तया सह नर्तिष्ये ?[5] (इति घूर्णमानो[6]विचिनोति ।)

भि॰—(अपवार्य) वत्स ! कदा वा चन्द्ररेखां द्रक्ष्यामीति[7] तुरुष्कः प्रलपति[8] । इतः परं कथम्[9] ?

दा॰—किमेतैरुन्मत्तप्रलापैः ? त्वं तावदवकुण्ठनं विधायाग्रतो गच्छ । आवामप्यधि[10]गतचेटीवेषतया पश्चादागच्छावः[11] ।

भि॰—तथा । (इत्यग्रतो गच्छति ।)

अह॰—(विलोक्य) एषा खलु चन्द्ररेखा कुसुमताम्बूलविलम्बकुपिता मां दृष्ट्वा अन्यतो गच्छति । अनुनेष्यामि तावदेनाम् ।

(सहसोपसृत्य भिक्षुं गाढमालिङ्गति ।)

भि॰—(वेपमानश्शिष्यावलोकते[12] । शिष्यौ तूष्णीमास्स्वेति करसंज्ञां[13] कुरुतः ।)

---

1. A. नास्ति 2. A. तां करे 3. A. प्रहिष्यामि
4. B. C. मुख॰ नास्ति 5. A. नर्तिष्यामि 6. A. 'सर्वतः' अधिकम्
7. B. C. पश्यामीति 8. A. वदति 9. B. C. किम्
10. अव॰ 11. A. ॰देव गच्छावः 12. B.C. ॰वेवावलोकते 13. A. संज्ञया ।

अह०—[1]हृद्यं मद्यं पीतं[2] शीर्णः[3] पार्श्वे[4] मल्लीमाल्यम्।
[5]सम्प्रति त्वमपि[6] च लब्धा मुग्धा आश्चर्यं[7] अहम्मदखानो धन्यः ॥४३॥

(आलिङ्गितं भिक्षुमुत्क्षिप्य नृत्यति। शिष्यौ अपवार्य प्रहसतः।)

अह०—(भिक्षुमुत्क्षिप्य सप्रार्थनम्) अयि—

[8]मदकृतमपराधं क्षान्त्वा शीधुं पीत्वा मधुरमधुरं च।
मम धत्स्व मदनदीक्षां कटाक्षपातैः प्रिये प्रसीद॥ ४४ ॥

(इति पादयोः पतति।)

(भिक्षुः 'नारायण' इति ब्रवीति।)

गो०—[9]जानाति किमेष दुरात्मा तूष्णीमास्स्वेति संज्ञापितो[10]ऽपि नारायणेति ब्रुवन्नावयोः पीडनान्यानयेदिति[11]वा ?

दा०—सखे ! किं कर्तव्यम्, चिरकालवासनाभ्यासः !

अह०—(भिक्षोर्मुखं विलोक्य) [12]कथं ताम्बूलं[13] न गृहीतं प्रियया ! मुखगतं ताम्बूलं दास्यामि[14]।

(भिक्षुः परावर्तते।)

---

1. A. प्राकृतं छाया च B. C. छायामात्रम्; उभयत्र त्रुटिरस्तीति भाति 2. A. 'पीतं' द्विर्लिखितम् 3. A. B. C. शीर्षे 4. A. नास्ति 5. B. सम्प्रत्यपि C. 'च' अधिकम् 6. B. C. 'त्वमपि' नास्ति 7. A. नास्ति B. C. साश्चर्यम् 8. A. प्राकृतमात्रम्; 'मदकृतम्' नास्ति; छन्दोदोषो वर्तते 9. A. (जनान्तिकम्) एष 10. A. संज्ञितोऽपि 11. A. आनयति 12. A. छायामात्रम् 13. 'अपि' अधिकम् 14. A. (मुखे ताम्बूलं ददाति।)

अह०—[1]कथं पराङ्मुखी भवति ? (पुनः प्रणम्य) प्रिये चन्द्ररेखे !

[2]मदिरां पीत्वा परं मधुरं गात्वा कम्पितवरालिम्[3] ।
चतुरं कृताङ्गहाराः सुचिरं नृत्यन्ति सर्ववनिताः[4] ॥ ४५ ॥

तस्माद्गायन्ती नर्तय[5] नर्तय ।

भि०–अहो प्रमादः ! तूष्णीं स्थिते ताडयत्येवायं मत्तः । नाहं[6] नृत्तगीते तु जाने[7] । का गतिः ? अथवा—

अर्जुनः फल्गुनः[8] पार्थः किरीटी श्वेतवाहनः ।
बीभत्सुर्विजयः कृष्णः सव्यसाची धनञ्जयः ॥ ४६ ॥

(इति पठन् यथायथं नृत्यति ।)

अहं—(विलोक्य) अयि चन्द्ररेखे ? अत्र[9]नगरे त्वमेव[10]श्लाघनीयनर्तकीति श्रूयसे । तत् किमेवं नृत्यसि ? (आत्मगतम्) वक्रस्वभावाः खलु स्त्रियः ताडनमन्तरेण[11] सुलभा न भवन्ति । (पञ्चाङ्गुलीवलयेन भिक्षुं शिरसि ताडयित्वा, प्रकाशम्) वक्रशीले इदानीं नृत्य[12] शोभनम् ।

भि०—(तमेव श्लोकं पठन् पुनः[13] तथैव नृत्यति ।)

---

1. A. छायामात्रम् । 2. A. प्राकृतं छाया च; प्राकृते त्रुटिः; B. C. प्राकृतमात्रम् 3. गमकयुक्तं 'वरालि' नामकं रागं गात्वा इत्यर्थः स्यात् 4. A. वनिता धन्याः 5. A. नृत्यतु; द्विर्न लिखितम् । 6. A. नास्ति 7. A. जानामि 8. A. एतावन्मात्रम् ततः 'इति पठन् यत्किञ्चिदभिनयामि' इत्यधिकम् 9. A. इह 10. B. C. नास्ति 11. A. विना 12. A. नर्तस्व 13. B. C. नास्ति ।

गो°—(अपवार्य प्रहसति ।)

दा°—(सस्मितम्) मूर्ख, किं प्रहसितेन? क्लिश्यति पुनस्तपस्वी ।

अह°—(विलोक्य) मधुपानेन विना तव नर्तनं[1] न शोभते। तावदानेष्यामि मद्यम्। (नेपथ्याभिमुखः) अरे कोऽत्र? मद्यपाल, उपनय मम प्रियायै नीलोत्पलवासितं मद्यम् ।

किङ्करः—(प्रविश्य चषकपाणिः) [2]स्वामिन्, एतन्मद्यम्।

अह°—(चषकं गृहीत्वा) अरे कीदृशं मद्यम्?

किङ्करः— द्राक्षारससम्मिलितं नीलोत्पलनिकरवासितं स्वच्छम्।
आदंशीकृतमांसं गृह्यतां तालसम्भवं मद्यम् ॥ ४७ ॥

अह°—तथा। (इति पीत्वा शेषं भिक्षवे प्रयच्छति ।)

भि°—(गृहीत्वा सजुगुप्सं निःश्वसिति ।)

दा°—(जनान्तिकम्) सखे! किं कुर्मः! एष भिक्षुर्मद्यं पीत्वा माद्यति चेन्महाननर्थः स्यात्। (मदनिर्मुक्तिकाल[3]श्चायं अहम्मदखानस्य। अथवा एवं तावत्। (सहसाग्रतो स्थित्वा,[4] प्रकाशं[5], प्राकृतमाश्रित्य[6]) साधु रे कुहनाविट! अहम्मदखान! साधु! यतो मम स्वामिन्या चन्द्ररेखाया वल्लभोऽपि तस्याः सख्या कौमुदिकया सह अभिरमसे।

अह°—(सम्यङ् निरूप्य) कथं नैषा चन्द्ररेखा! हञ्जे इदानीं कुतश्चन्द्ररेखा?

---

1. वदनं 2. B. 'किम्' अधिकम्। 3. A. निर्गमावसर°
4. A. पुरो गत्वा 5. B. C. नास्ति 6. A. नास्ति; तथा संस्कृतच्छायैव दत्ता।

दा०—भद्रमुख! त्वं कौमुदिकया अभिरमसे इति श्रुत्वा शीर्षवेदना समुत्पन्नेति विमनायमाना गृहान्तरे तिष्ठति।

अह०—अहो ग्रीष्मसन्तापम्लानस्य तरोरुपरि निर्घातपातः। यतः कुसुम-ताम्बूलविलम्बनकुपिताया एतदन्यदपि कोपकारणमासीत्। हंजे! अहं तावद्[1] इदानीं चन्द्ररेखायाः कोपावसरं परिहृत्य पश्चादागमिष्यामि। त्वं पुनरेतद् वृत्तान्तं तस्या अन्यथा कथय।

(इति सकिङ्करो निष्क्रान्तः।)

भि०—भद्र! भवदुपायविशेषादपगतोऽस्माकमकालमृत्युः।

दा०—अलमितः परं शङ्कया।

गो०—इतः परं[2] किं भविष्यतीति को वा जानाति?

भि०—(सरोषम्) दुरात्मन्! उपश्रुतिमि(रि)व किमसमंजसं[3] प्रलपसि?

दा०—भगवन्! नीचैर्भण, स्वरवैपरीत्येन[4] क्षणादाशङ्को[5]त्पद्येत।

(ततः प्रविशति गृहीतदण्डः षण्डः।)

षण्डः—भो भोः, गृहान्तर[6]स्थिता चन्द्ररेखा कुपितेति गृहान्निर्गतो अहम्मदखानः। तदिह[7] भवद्भिरवहितैः स्थातव्यम्।

भि०—(सभयम्) वत्स, कोऽयमनुरणनमिव अहम्मदखानघण्टायाः?

---

1. A. नास्ति 2. A. इतोऽपि 3. A. असम्बद्धम् 4. A. °त्ये
5. A. रक्षकाणां शङ्का 6. A. राल° 7. A. अथ

दा°—(अपवार्य) भगवन्, एहि तावत्। इतो भित्तिकोणस्थोऽयं,[1] [2]प्रकृतिवक्रो दुरात्मा तुरुष्क[3] एवाक्रन्दति।

[4]दा°—(अपवार्य)[5] सखे गोविन्द! अपि सत्यं वृश्चिकदष्टोऽसि?

गो°—अथ किम्। सर्वाण्यङ्गानि शिमिशिमायन्ते!

दा°—तर्हि तूष्णीमास्स्व, अभिमन्त्रयामि। (तथा करोति।)

षं—अरे, के यूयम्?

दा°—(प्राकृतमाश्रित्य) आर्य, वयं चेटिकाः।[6]

षं—तर्हि किमर्थमेषा रोदिति?

गो°—आर्य, एषा गृहान्तरालरक्षणे नियुक्ता भुजगमनुगच्छन्ती स्वामिन्या ताडिता।

षं—युक्तमेव। तेन खलु यूयमभ्यन्तरं प्रविशत। अहं पुनर्द्वारस्थानारक्षकानुद्योजयामि[7]।

(इति निष्क्रान्तः।)

भि°— जायते विघ्नमेघालिश्चन्द्ररेखावलोकने।
सच्छिष्येण त्वया भद्र मारुतेनापसार्यते[8] ॥ ४८ ॥

---

1. A. °कोणे स्थास्यामः ; (तथेति स्थिताः) इत्यधिकम् 2. A. नास्ति 3. C. तूष्णीम् 4. B. C. त्रुटिः ; A. (वृश्चिकदंशं सूचयित्वा महावृश्चिकदष्टोऽस्मीति क्रन्दति भिक्षुः) A. मातृका एतत्पर्यन्तमेव वर्तते ; तदन्तिमवाक्याद् भिक्षुरेव वृश्चिकेन दष्टः ; B. C. मातृकयोः गोविन्द एव दष्ट इति दृश्यते 5. B. त्रुटिः 6. प्राकृतमशुद्धम् 7. B. C. °द्योतयामि 8. B. °वार्यते ।

दा°—अत्र सर्वोऽपि श्रीमतामेव प्रभावः ।

भि°—भद्र, तुरुष्कभीतिपरम्परया श्रान्तोऽस्मि। पटीरतुहिनवाटी कुत्र वर्तते ?

दा°—इतोऽपि(स्ति ?) भगवन् !

(सर्वे परिवृत्य[1] वृक्षवाटिकां प्रविशन्ति ।)

भि°—(सर्वतोऽवलोक्य) अहो वृक्षवाटिकायाः सौभाग्यम् !

हसन्तीव लताः पुष्पैर्वर्धयन्ति[2] पिकस्वरैः ।
मानसावर्जने पुंसां वेश्याभिरिशिक्षिता इव ॥ ४९ ॥

गो°—(स्पर्शमभिनीय)

गायन्निव मधुपरवैर्नृत्यन्निव चलितवल्लरीसंस्थैः ।
मधुगन्धादिव मन्दं मत्त इवायाति मलयपवमानः ॥ ५० ॥

भि°—(अनाकर्णितकेन) भद्र, कियद्दूरे लतागृहम् ?

दा°—इतश्चम्पकवाटिकामुपगम्य वकुलपालिकाप्रान्ते वर्तते ।

(सर्वे लतागृहमुपसर्पन्ति ।)

दा°—इदं लतागृहम्। तावदेतस्यामलिन्दवेदिकायां क्षणमात्रं विश्रम्यताम्।

---

1. B. C. परिक्रम्य 2. B. C. वर्धन्तीव

भि॰— लतागृहमिदं भाति भृङ्गझङ्कारसङ्कुलम् ।
मरन्दधाराधारालं धारागृहमिवापरम् ॥ ५१ ॥

(सोत्कण्ठम्) भद्र, चन्द्ररेखा समागच्छति वा, न वा ?

गो॰—[1]वृक्षवाटिकाद्वारं प्रतीक्षस्व ।

दा॰—(कतिचित्पदानि गत्वा स्थितः ।)

भि॰—(गोविन्दं प्रति) वत्स, त्वमपि गच्छसि वा ?

गो॰—किं त्वरया ? हृदयं तावद् दृढीकुरु । आगता चन्द्ररेखा ।

भि॰—(शिष्यं प्रतीक्षते ।)

(ततः प्रविशति चन्द्ररेखा करण्डिकावाहिनी च ।)

च॰—[2]हंजे चकोरिके ! अपि सत्यं त्वया कथितं–स भिक्षुः कौमुदिकावेषेण आगच्छन् द्वारस्थितेन[3] अहमदखानेन गृहीत इति ।

चको॰ अथ किम् ।

चं॰—अपि नर्तितोऽनेन मदिरामत्तेन ?

---

1. B. त्रुटिः 2. B. C. प्राकृतेन दत्तं वाक्यम् 2. B. द्वारमंधिरेण

चक्रो°—तथा नर्तितो यथा विपण्यां कालयोगी नाम मर्कटो[1] नर्तितः।

चं°—कथय, [2]स इदीनां शोभननृत्ये अनेन [3]पञ्चाङ्गुलीवलयेन ताडितो भिक्षुः ?

चक्रो°—किं भणामि, स तस्य दशार्धप्रहारे मज्जितः[4]।

चं°—(विहस्य) [5]हञ्जे, त्वया कथं दृष्टः ?

चक्रो°—अभ्यन्तरस्थितथा मया जालमार्गेण।

चं°—हञ्जे, महान् भिक्षुणा प्रयासोऽनुभूतः। तदेहि तावत् शिष्यावेष उपचरामः(वः)।

(उभे परिक्रम्य वृक्षवाटिकां प्रविशतः।)

चं°—(भिक्षोः पार्श्वे दामोदरं विलोक्य) हञ्जे, एषा माधविका कुसुमगन्धादिकं सज्जीकुरु इति प्रेषितापि इतस्ततो भ्रमति। तत् केनापि लतापाशेन बद्ध्वा ताडयैनाम्।

[6]चक्रो°—तथा। (इति लतापाशेन दामोदरं बद्ध्वा ताडयति।) एहि दुर्विनीते माधविके! स्वामिन्याः समीपम्।

(दामोदरं कर्षति।)

माधविका—(प्रविश्य पटलिकाहस्ता)[7] किमिति मां त्वरयसि? एषा आगतास्मि।

अयं सन्दर्भः सर्वः प्राकृत एव दत्तः, बहुत्र अबद्धं च प्राकृतम्। 1. B. णक्कन्धो 2. B. स दाणिं C. पतदाणिं 3. C. 'पञ्च' नास्ति 4. मड्डितः ; मर्दितः इति स्यात् 5. C. त्रुटिः 6. B. C. चन्द्ररेखा 7. B. C. माधविकाशब्द इतः परं दत्तः

चं०—(विभाव्य सहासम्) मुञ्च मुञ्च। न हि न हि माधविका[1]। माधविका-वेषधारी एष दामोदरः।

चको०—(विहस्य मुञ्चति।)

चं०—हञ्जे, क्षामय दुःस्थितम्। अस्य प्रणामं कुरु।

दा०—किं प्रणामेन? अनभ्यन्तरः खलु अहं भवत्याः।

चं०—तत्कथय, कुतो युष्माकं गुरुः?

दा०—भद्रे! लतागृहालिन्देऽपि भवतीं प्रतीक्षते[2]।

मा०—स्वामिनि! चन्दनरसे कर्पूरमेलनार्थं विलम्बितम्। सर्वं सज्जीकृतम्[3]।

(इति पटलिकां प्रदर्शयति।)

चं०—[4]हञ्जे, एतच्चकोरिकाया हस्ते समर्प्य त्वं वृक्षवाटिकाया द्वारे अप्रमत्ता तिष्ठ।

मा०—(पटलिकां चकोरिकाया हस्ते समर्प्य निष्क्रान्ता)

चं०—आर्य दामोदर! कृतं तावत्। अग्रतो भव।

(सर्वे लतागृहमुपसर्पन्ति।)

चं०—(सविलासं वामहस्तेन प्रणमति।)

भि०—नारायण! (इति ब्रवीति।)[5]

---

1. B. माधविका इत्येकवारमेव 2. C. एतत्पर्यन्तं ग्रन्थपातः
3. B. वाक्यं नास्ति 4. C. त्रुटिः 5. B. C. ब्रुवति

चं०—भगवन्! नात्र नारायणशब्दं भण। किंतु कन्दर्प, कन्दर्प इति भणितव्यं हि।

भि०—तथा क्रियते। उपविशन्तु[1] भवत्यः समीपे।

(सर्वे यथोचितमुपविशन्ति।).

भि०—इतः परं स्त्रीवेषं परित्यज्य स्ववेषेण स्थातुमिच्छामि

दा०—कोऽत्र विशेषः? तथा क्रियताम्।

भि०—(स्त्रीवेषं परित्यज्य कौपीनाच्छादनमात्र उपविशति।) चन्द्ररेखा-कौमुदिके विलोक्य हसतः।)

दा०—(गोविन्दं प्रति) सखे, आगमनप्रयासेन श्रान्तो[2] भगवान्[3]। तदिद कंचित् कदलीदलमादाय वीजय।

गो०—(तथा करोति।)

चं०—हञ्जे चकोरिके! त्वमपि भगवतश्चन्दनानुलेपनं कुरु।

चको०—तथा। (इति भिक्षोश्शिरसि मण्डलाकारं चन्दनरसं निक्षिप्य सर्वाङ्गमनुलेपयति।)

भि०—कन्दर्प कन्दर्प! (इति सौख्यं निरूपयति।)

चं०—हञ्जे! पुष्पमालादिभिरपि अलंकुरुष्व भगवन्तम्।

चको०—तथा। (इति भिक्षोश्शिरसि वेष्टयित्वा कण्ठे भूयसीं पुष्पमालामामुञ्चति।)

---

1 B. C. उपविश्यताम् 2. C. श्रुटिः 3. B. भवानि

भि°—(सहर्षं शिष्यौ प्रति)[1] भद्रौ। महाप्रभुगृहाराधनेष्वपि नैतादृशं सौख्यमनुभूतम्।

शिष्यौ—एवमेतत्।

भि°—(आत्मानं विलोक्य) भद्र दामोदर! कथय[2] कथमिव स्थितोऽस्मि?

दा°—[3]भगवन्!

आलिप्तचन्दनरसस्फुतरामाभाति पुष्पमालाभिः।
अम्बुनिधिफेनपिहितो मन्दर इव निर्झरश्रेण्या ॥ ५२ ॥

चं°—हञ्जे[4] ताम्बूलमपि देहि भगवतः।

चको°—तथा। (इति ताम्बूलं ददाति।)

भि°—अनुचितमस्माकं ताम्बूलम्।

चको°—अलं शङ्कया[5]। तस्मात् जम्बीरादिदा(पा)नमेवोपनयामि।

भि°—तथा चेत् गृह्यते। (इति ताम्बूलं गृह्णाति।)

चं°—हञ्जे! दामोदरगोविन्दयोः गन्धकुसुमताम्बूलादिकं दत्त्वा स्वमपि गृहाण।

चको°—(तथा करोति।)

चं°—(भिक्षोर्भुजे भुजमर्पयति।)

---

1. B. त्रुटिः 2. A. B. अहम् C. कथम् 3. C. त्रुटिः
4. C. त्रुटिः 5. C. शङ्काभिः

भि०—(सहर्षं, गोविन्दं प्रति) वत्स, त्वमपि कथय चन्द्ररेखासहितः कथमिवास्मि ?

गो०—(स्वगतम्) कथं वर्णयामि गोलाङ्गूलसदृशं कुहनाभिक्षुम् ?

भि०—किं तूष्णीं स्थितोऽसि[1]।

गो०—(प्रकाशम्) अशक्यवर्णनं भगवतः सौभाग्यमिति।

कुहनाभिक्षुवेषेण सेव्यमानस्सुभद्रया[2]।
भगवान् कान्तया युक्तो भासि[3] साक्षादिवार्जुनः ॥ ५३ ॥

दा०—भद्रे चन्द्ररेखे! भगवता सह लतागृहं प्रविश। आग[4]तोऽयं कुमुदिनीबन्धोरिन्दोरभ्युदयसमयः। तथा हि—

कृतनिखिलतिमिरभङ्गास्तिर्यगभिव्यक्तजीवितोर्ध्वं[5]कराः(?)।
उदयान्तरितस्य विधोः प्राचीं कलयन्ति पञ्चषाः किरणाः ॥ ५४ ॥

चं०—तथा। (इति भिक्षुणा सह लतागृहप्रवेशं नाटयन्ती निष्क्रान्ता।)

दा०—कथमुदित एव भगवान् प्रालेयकिरणः। सखे, पश्य—

[6]कन्दलितकिरणकेसरमरुणमिदं भाति शिशिरकरबिम्बम्।
प्राची दिशा मृगदृशा कर्णतटन्यस्तकर्णिकारमिव ॥ ५५ ॥

(शिरोविनिहिताञ्जलिबन्धम्)

---

1. A. B. दीर्घा त्रुटिः 2. C. त्रुटिः 3. C. त्रुटिः 4. C. त्रुटिः 5. A. B. C. °ताध्व 6. C. त्रुटिः

कुवलयवलयैकबन्धो शीतकर[1] गौरीशमौलिदृश्यमूर्ते ।
गङ्गास्मर(घर)सौधालिप्राकारालङ्कार चतुर नमस्ते ॥ ५६ ॥

(नेपथ्ये) हन्त, चरितार्थोऽस्मि । (सर्वे आकर्णयन्ति ।)

गो०—प्रियं नः प्रियं नः[2] । कृतकृत्यो गुरुः ।

चको०—अनुभूतबहुप्रयासोऽपि दिष्टया सुखितो भिक्षुः ।

दा०—(विलोक्य) कथमिहैवायाति भिक्षुः । यथा—

आकुञ्चिताङ्गुलिदलप्रवरप्रहारै-
राकर्ण[3]मस्तकपटीररसानुलेपः ।
आयाति भिक्षुरलसं हृदये दधानः
कान्ता(तां ?)कुचद्वयविलेपितचन्दनार्द्रं (र्द्राम् ?) ॥ ५७ ॥

अपि चेयं चन्द्ररेखा च—

धम्मिल्लश्लथमाल्यराजिरभितः प्रस्विन्नगण्डस्थला
श्वासाकम्पितपीवरस्तनतटव्याकीर्णहारावलिः ।
बन्धक्रीडनवेल्लदूरुसुरतश्रान्त्या नितान्तालसा
मन्दं मन्दमिहोपयाति मदनव्यापारपारङ्गता ॥ ५८ ॥

(ततः प्रविशति यथानिर्दिष्टव्यापारो भिक्षुश्चन्द्ररेखा च ।)

---

1. B. शंकर 2. C, 'अलम्' अधिकम् 3. B. C. 'कीर्ण'

भि०—(सुखातिशयमभिनयन्)—

सद्यः प्रभवति शमयितुमहमदखानस्य[1] शतभवं[2] शोकम्।
अस्या वामकराग्रप्रहार एकोऽपि मस्तकन्यस्तः ॥ ५९ ॥

दा०—(उपसृत्य) भगवन्! अपि विद्यते[3] प्रव्राजिकापण्याङ्गनयोर्विशेषः ?

भि०—कथं न विद्यते ? इयमेकैव—

वेश्याजनोचितविनोदविधौ विदग्धा
प्रत्यग्र[3]केलिपुरुषायितमावहन्ती।
ताटङ्कयुग्मपतनेन[3] विलोलकर्णा
वैतन्तवीं सुखकलामपि च व्यतानीत् ॥ ६० ॥

चं०—(स्मितं करोति।)

भि०—दामोदर! भवत्प्रभावेण[4] महान्तमानन्दमनुभूतवानस्मि। इतः परमस्माकं निर्गमोपायं कथय।

दा०—भगवन्! यामत्रयं जागरूका[5] आरक्षकाश्चतुर्थयामे निद्रालवो भवन्ति। तत् सुखेनैवनिर्गन्तुं शक्यते।

भि०—भद्र[6], सर्वत्राप्यस्खलितबुद्धिर्महत् खलु प्रियं करोषि।

दा०—भगवन्! किं ते भूयः प्रियमुपहरामि ?

---

1. C. खान् 2. त्रुटिः ; शतभवं शतप्रहारभवम् 3. C. त्रुटिः
4. C. प्रतापेन 5. C. °रिकाः 6. B. नास्ति

भि०——भद्र ! किमतः परं प्रियमस्ति ?

अतिसन्धाय तरसा तुरुष्कसरघव्रजम् ।
सच्छिष्येण त्वया यस्मान्मधुधारा ममार्पिता ॥ ६१ ॥

तथापीदमस्तु भरतवाक्यम्——

काले सन्तु समन्ततोऽपि जलदा धाराळधारामुचो
धात्रीयं चतुरर्णवीवलयिनी सस्यातिशस्या भवेत् ।
कुर्वन्तु द्विजसत्तमा दिविषदामिष्टैरभीष्टैः प्रियं
कान्तासंमितया गिरा कृतविदो दीव्यन्तु भव्या बुधाः ॥६२॥

(इति निष्क्रान्तास्सर्वे ।)[1]

॥ इति बोम्मगण्टिगङ्गाधरसुततिरुमलनाथकृतिषु[2] कुहनाभैक्षवं[3]

नाम प्रहसनं सम्पूर्णम् ॥

---

1. B. ॥ समाप्तमिदं कुहनभैक्षवं नाम प्रहसनरूपकम् ॥ ॥ हरिः ओम् ॥
2. B. कृतौ 3. B. भैक्षवं समाप्तम्

